राष्ट्रिय संस्कृत संस्थान, जयपुर

परिसर

वर्गीकरण सं. ....

पुस्तक सं. ....13862........ दिनाङ्क..................

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

राष्ट्रिय संस्कृत संस्थान जयपुर ... जयपुर

3
.2
SS
3862

JACL-KRC
013862

13862

The Kalpataru Research Academy, established in 1981, is an institution dedicated to the cause of the preservation of heritage in India. Its broad aim is to promote research-oriented scholarship in the different branches of knowledge relating to the Vedas and Sanskrit. Encouragement is meant to be given through the Academy to the study of the Vedic literature along with the traditional angas such as Jyotisha. Kalpa, Nirukta and Vyakarana. It also promotes work in related disciplines, manuscriptology, Etymology, Linguist Sciences, Lexicology and Literary criticism. Generally, the Academy will help spread and promote education, culture, science, art and learning in all its branches. It will be broad based and multi-disciplinary in approach.

In order to further the above objectives, the Academy has planned to publish a quarterly journal in English, entitled 'Kalpataru', commencing from January 1984. The journal which is an official organ of the Kalpataru Research Academy, will focus attention on subjects of traditional value and contemporary interest. It invites articles of research interest, and articles which highlight the contribution of India in the field of religion, philosophy, astronomy, astrology, literature and the positive sciences in India. The journal seeks to bridge the gap between the ancient ideals and the present-day needs.

The journal, which is a quarterly, will contain regular features like articles on relevant themes, descriptive notices of rare manuscripts, book section, book reviews and notes on important eve in the field of indology and related subjects. There will b section where Sanskrit manuscripts, hitherto unpublished, will edited and printed along with translations in English or content analysis. The Journal will appear during the first wee January, April, July and October of every year.

29
S
JAC

DAIVAJNA K. N. SOMAYAJI
Editor and Publisher

महामहोपाध्यायकृष्णमिश्रविरचितम्

शुद्धिसर्वस्वम्

बोधिन्याख्यया टिप्पण्या सहितम्

संस्कृत संस्थान जयपुर पुस्तकालय 13862

SV-2024

टिप्पणीकारः सम्पादकश्च

डॉ० विश्वनाथस्वाईं, पीएच्० डी०

प्राध्यापकः, धर्मशास्त्रविभागः,

श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः,

पुरी, ओड़िशा ।

12.22

महामहोपाध्यायकृष्णमिश्रविरचितम्

शुद्धिसर्वस्वम्

डॉ० विश्वनाथस्वाईँ कृत—

बोधिनी· टिप्पणीसहितम्

प्रकाशिका :

श्रीमती जयन्तीदेवी

सर्वोदयनगरम् , पुरी - 752002

जयन्तीदेवीकर्तृकसर्वस्वत्वं संरक्षितम्

प्रथमसंस्करणम् - 500

पौषशुक्लैकादशी (4-1-1993 खीष्टदिनाङ्कः)

प्राप्तिस्थानम् : ......

श्रीमती जयन्ती देवी

सर्वोदयनगरम् , पुरी-752002

*

सांविदी

प्राच्यविद्याप्रकाशकः विक्रेता च

15, महोदधिमार्केट, पुरी-752001

मूल्यम् :

रू० 30/-

JACL-KRC

013862

पुरीनगरे श्रीजगन्नाथमन्दिरस्योत्तरद्वारसमीप-रमाप्रेस-मुद्रणयन्त्रे मुद्रापित-मिदं पुस्तकम् ।

पुरोवाक्

धर्मसम्पादनार्थमहरहः शुद्ध्या सुकर्मानुष्ठेयम् । यथाकालं स्नानोपवासादिना शुद्धिर्जायते । महामहोपाध्यायकृष्णमिश्रेण शुद्धिसर्वस्वाभिधेये ग्रन्थेऽस्मिन् शुद्धिः साधुविचारिता । ग्रन्थेऽस्मिन् विज्ञानेश्वरविप्रमिश्रादीनां मता न स्वीकुर्वन्नपि ग्रन्थकारः स्वकीयचिन्तां न जहातीति परिलक्ष्यते । मरणे उत्कलेषु सर्ववर्णानां दशदिनाशौचम्, स्त्रीणां वपनाभावश्चेत्यादि स्पष्टमुक्तमत्र । कौत्सगोत्रोत्पन्नोऽयमुत्कलीयो ग्रन्थकारोऽष्टादशशतकमध्यभागीयः । अस्य वंशक्रम एवं यथा—श्रीजगन्नाथपुरीसमीपे वीरनरसिंहपुरग्रामे आनन्ददीक्षितनामा महान्पण्डित आसीत् । तस्य पुत्रो देवानन्दमिश्रस्तत्र जगन्नाथविद्याधरपुरग्रामे निवसति स्म । तस्य पुत्रौ हरिहरो बलभद्रश्च ।

कनिष्ठस्य बलभद्रस्य कृष्णः, दक्षेश्वरः, त्रिलोचनः, नारायणः, भुवनेश्वरः, वनमाली, सिद्धेश्वरः, भगवान् चेत्यष्टौ पुत्राः, दुर्गा सरस्वतीति पुत्र्यौ चासन् । त्रिलोचनस्य पुत्रोऽनन्तः, तत्पुत्रः लोकनाथः, तत्पुत्र उमेशः । अधुना नयागडनगरनिवासिन उमेशस्य गृहे ग्रन्थकर्त्तुराराध्या सिद्धेश्वरीदेवीप्रतिमा विराजते । नारायणस्य पुत्रः मृत्युञ्जयः, तत्पुत्रः लिङ्गराजः, तत्पुत्रौ दीनबन्धुः विश्वनाथश्च । दीनबन्धोः पुत्रौ चन्द्रशेखरो गङ्गाधरश्च । विश्वनाथस्य पुत्रः प्रसन्नमिश्रोऽधुना नयागडसमीपलड्डुकेश्वरपुरग्रामनिवासी । 'कालसर्वस्वम्', कृष्णमिश्रेण पूर्वमेव प्रणीतम् । तत्तु मया पूर्वं मञ्जूषासहितं सम्पादितम् । 'एतत्साङ्गाह्निकं पद्यं यच्चास्मद्भक्तिसर्वस्वे' इति शुद्धिसर्वस्ववचनात् 'भक्तिसर्वस्वम्' कृष्णमिश्रस्यापरकृतिरस्ति । अन्याः कृतयोऽपरिचिताः । शुद्धिसर्वस्वसम्पादने उत्कलराज्यसङ्ग्रहालयमातृकाविभागस्य नं० Dh/794 तालपत्रमातृका मयाऽऽधारीकृता । ग्रन्थार्थस्फुटीकरणाय मया बोधिनी टिप्पणी रचिता ।

'शुद्धिसर्वस्व'ग्रन्थरत्नस्योद्धारार्थं सम्पादनार्थं चाहं मम गुरुपादैः भारतराष्ट्रपतिसम्मानितैः स्वर्गतपण्डितकुलमणिमिश्रशर्मपादैः तथाच पण्डितसोमनाथदाशशर्मपादैः प्रचोदित इतिकृत्वा तेभ्यः प्रणामाञ्जलिः समर्प्यते । श्रीरवीन्द्रदाशः मम दुर्लिखितमपि पठित्वा मुद्रणाय अक्षराणि समयोजयदिति हेतोः सोऽयं धन्यवादार्हः ।

अन्तिमे पाठकैः सहृदयैः सूरिभिश्च मत्कृतास्त्रुटयो मार्जनीयाः इति सम्प्रार्थ्य विरमामीति शम् ।

श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः, पुरी

विदुषां विधेयः
विश्वनाथस्वाईं

पौषशुक्लैकादशी (4-1-1993)

विषयसूचो

विषयः	पृष्ठम्
नित्यादिकर्मविचारः	001
शुद्धिनिरूपणम्	002
अशौचविचारः	003
साग्निनिरग्निशुद्धिविचारः	005
जन्माशौचम्	C09
गर्भस्रावाद्यशौचम्	012
पित्रोरशौचे विशेषः	013
बालमरणाशौचविचारः	016
कालादाशौचम्	021
एकजातीयाशौचद्वयविचारः	031
देशान्तरलक्षणम्	037
असपिण्डानामशौचविचारः	038
पर्णदाहविचारः	056
प्रेतनिर्हरणविधिनिषेधाः	058
क्रियाकर्त्तृविचारः	060
अशौचे वपनविचारः	065
अशौचे विधिनिषेधविचारः	073
अशौचे श्रौतकर्मणामनुष्ठानम्	075
अशौचे विष्णुनामकीर्तनविचारः	082
नामकीर्तनफलम्	085
अशौचे वृषोत्सर्गविचारः	089
अङ्गाशौचम्	093
प्रथमाब्दनियमाः	095
पूर्तेष्टविचारः	098
उपवासविचारः	101

॥ श्रीः ॥

शुद्धिसर्वस्वम्

'बोधिनी'-सहितम्

(श्रीगणेशाय नमः)

श्रीरामं कुलदेवञ्च सिद्धेशीं कृष्णसूरिणा ।
प्रणम्य शुद्धिसर्वस्वं सतां बोधाय रच्यते ॥1
"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छती"ति याज्ञवल्क्यात् 2,
"आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।" इति भारतात् 3;
"आचारहीनं न पुनन्ति वेदा" इत्यादिवचनाच्च4

शुद्धिरूपं जगन्नाथं चतुर्मूर्त्तिधरं हरिम् ।
प्रणम्य शुद्धिसर्वस्वे "बोधिनी" क्रियते मया ॥

1- प्रारिप्सितकर्मणो निर्विघ्नपरिसमाप्तिनिमित्तं कुलदेवं श्रीरामचन्द्रम् इष्टदेवीं सिद्धेश्वरीञ्च प्रणम्य कृष्णसूरिणा महामहोपाध्यायकृष्णमिश्रेण सज्जनानां बोधाय "शुद्धिसर्वस्व"मित्यभिधेयो ग्रन्थो विरच्यत इति भावः ।

2- याज्ञ० 3/219 । विहितं सन्ध्योपासनादिकं नित्यम् अशुचिनिवारणाय नैमित्तिकं स्नानादिकञ्चोभयम्, तस्याकरणात्, निन्दितस्य निषिद्धस्य सुरापानादिकर्मण आचरणात् इन्द्रियाणामसंयमनात् नरः पतनं गच्छति प्रत्यवायी भवति । प्रतिलोमजानामपि प्रायश्चित्तप्राप्त्यर्थं नर-पदस्यात्र साधारण्येन व्यवहारः यतः "ब्राह्मणार्थे गवार्थे वे"ति प्रतिपादयन्

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥"

"इति (मनु०-10/63) उक्तम् ।

3- "सर्वागमानामाचारः प्रथमं परिकल्पते ।"

इति महाभारते (अनु० 149/137) पूर्वार्द्धम् ।

4- "आचारहीनं न पुनन्ति वेदा यद्यप्यधिताः सह षड्भिरङ्गैः ।

नित्यनैमित्तिककर्मानुष्ठानमावश्यकम् । तच्च शुद्धौ सत्यामुपपद्यते ।

"स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि ।"5

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।।"

इति परिशिष्टात्6 ,

"सन्ध्या पञ्च महायज्ञा7 नैत्यकं स्मृतिकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तते ।।"

इति वक्ष्यमाणात्8 , शुद्ध एव कर्म कुर्यादित्युक्ते शुद्धेः कर्माङ्गत्वम् । सा च क्षालनादिजन्यः पुरुषगतोऽदृष्टविशेषः । अतएव न शुद्धेः सप्तपदार्थातिरिक्तत्वमिति9 वैशेषिकानुकूल्यम् । न च शुद्धेः कुशवस्त्रपात्रादिनिष्ठत्वेन कथं तादृशादृष्टस्य तत्रास्तित्वं वाच्यम् ?

छन्दांस्यैनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ।।"
इति (वसिष्ठ०-6/3) ।

5- "पवित्राणां तथा जाप्ये दाने च विधिचोदिते ।" इति नित्याचारप्रदीपे (P. 291) विष्णुवचनस्योत्तरार्द्धम् । अत्र स्नानेन सहोपवीतधारणादि आवश्यकम् यतः—

"सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ।।"

इति कात्यायनेन (कर्मप्रदीप०-1/4) उक्तम् ।

6- "यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ।"
इति (दक्ष० 2/23) उत्तरार्द्धम् ।

7- बलिकर्म स्वधा होमः स्वाध्याय अतिथिसत्कारश्चेति पञ्च महायज्ञाः ।

8- निर्णयसिन्धौ (P. 386) जाबालवचनं यथा—

"सन्ध्या पञ्च महायज्ञा नैत्यकं स्मृतिकर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ।।" इति ।

अपि च स्मृतीनां समुच्चयान्तर्गतदक्षस्मृतौ (15/25) वचनं यथा—

"दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तते ।।" इति ।

वस्तुतस्तु एतत्पूर्णसन्ध्यापरम् अन्यथा "अर्घ्यान्ता मानसी सन्ध्या कुशवारिविवर्जिता ।" इति नि० सि०-P. 386) वचनं व्यर्थं स्यात् ।

9- द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः सप्त पदार्थाः ।

तस्य आत्मनिष्ठत्वेऽपि स्वाश्रयाश्रयित्वरूपपरम्परासम्बन्धेन कुशपात्रादिवत्त्वेऽभ्युपगमात् । अदृष्टानां वैयधिकरण्येन कार्योत्पादनस्य गयाश्राद्धादौ दर्शनाच्च । यद्वा शुद्ध्यात्मकत्वं क्षालनसन्ध्यादिजन्यत्ववृतयोगिवत्त्वादिवच्चेतनाचेतनगतस्वरूपसम्बन्धविशेष इति न क्वाप्यनुपपत्तिः । अशौचापरपर्यायाव्यक्तिप्रीतिसिद्धिरूपमादाय तत्संसर्गाभावविशिष्टात्मानादिसंयोगध्वंसाधिकरणसमवायसम्बन्धः शौचमिति तु वैशेषिकाः । तदभावोऽशौचम् । तन्निराकरणद्वारा शुद्धिः । सुज्ञानात्तूपघातेनाशौचं निरूप्यते ।

"अशौचं द्विविध प्रोक्तं बाह्यमाभ्यन्तरं तथा ।"10

बाह्यं स्पर्शभक्षणादिजन्यमशौचं स्नाना11दिनैच्छिककालनिवार्यम्, आभ्यन्तरञ्च नित्यनैमित्तिकादिजन्यं शारीरं कर्मानर्हत्वम् ।

"अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।"

10-"बाह्यं चाभ्यन्तरं तथा" इति गदाधरपद्धतौ (P 271) देवलवचनम् । अत्र गदाधरः "आभ्यन्तरं कर्त्रशौचं प्रायश्चित्तापनोद्यमघलक्षणम् । बाह्यमपि द्विविधम्, शरीरस्य कर्मानर्हत्वरूपमेकम्, अशौचिस्वत्वाश्रयद्रव्यस्यापि । इदं च बाह्याशौचं जन्ममरणादिना जायते स्त्रीणां ऋतुप्रसवादिना च । तच्च वक्ष्यमाणकालविशेषेण स्नानेन चापगच्छति ।" इति प्रकारान्तरेण प्रकाशयति ।

11-यद्यपि "नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् ।।"
इति शङ्खेन (8/1) षड्विधस्नानान्युक्तानि तथापि "चण्डालशवभूषाद्यं स्पृष्ट्वा स्नानं रजस्वलाम् । स्नानानर्हस्तु यः स्नाति स्नानं नैमित्तिकंच-तत् ।।" इति तद्वचनात् (शङ्ख०-8/3) नैमित्तिकस्नानमत्र विवक्षितम् । आदिपदेन भगवन्नामोच्चारणस्य ग्रहणम् 'मानसं स्नानं विष्णुचिन्तनम्' इति श्रीविष्णुसहस्रनामशाङ्करभाष्यात् (श्लो०-10) ।

12-वामनपुराणम् 33/6 । तथा चोक्तं शाण्डिल्यभक्तिसूत्रव्याख्याने (2/2/76) स्वप्नेश्वरेण—'महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम् । पुनस्तपस्वी भवति पङ्क्तिपावनपावनः ।।' इति ।

इति विष्णुस्मरणस्य सामान्यप्रायश्चित्तत्वेऽपि विशेषसामग्रीसहितैव सामान्यसामग्रीकार्यजनिकेतिसिद्धान्तस्य चोपन्यासो युक्तः । अन्यथा दण्डचक्रादिविनाऽपि कपालो दृष्टः । तत्र द्वयोर्निरूपणत्वसाम्येऽपि विषमकलाद्रुतप्रसारादौ लघुद्रुतयोरिव वैशेषिकाणां द्रव्यगुणाद्यनन्तरं कर्मनिरूपणमिव सूचिकटाहन्यायेनापि वादादावाभ्यन्तराशौचं लिख्यते । देवलः13—

जनने मरणे नित्यमशौचमनुधावति ।
सपिण्डान् पितृबन्धूंश्च यत्र क्वचन तिष्ठतः ॥

पितृबन्धवो वक्ष्यमाणा असपिण्डा अथवा पितुरष्टमाद्याश्चतुर्दशपुरुषावधिकाः । यत्र क्वचनेति स्वदेशविदेशयोः श्रवणतात्पर्यकम् । श्रुतमशौचं धावतीति न्यायात् । सपिण्डाः सप्तमावधिकाः । यथा मात्स्ये (18/29)—

"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ।"

मनुः (5/60)—"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावश्च जन्मनाम्नोरवेदने ॥"

स्वसारभ्य सप्तमान्तं सापिण्ड्यमिति भावः । बृहस्पतिः—

"समानोदकभावश्च निवर्त्तेताचतुर्दशात् ।"

त्रयोदशपुरुषानन्तरं जन्मनामज्ञानेऽपि समानोदकत्वनिषेधः, प्राङ्मनूक्तौ चास्तीति विकल्पः ।

"सम्पर्काद्दुष्यते विप्रो जनने मरणे तथा ।"14

विप्र इति प्राधान्याच्चातुर्वर्ण्योपलक्षणम् । सम्पर्कः सूतकान्नभक्षणादिः । इदमशौचं श्रुतमेव दूषकम्, दृष्टराहुग्रासवत् ।

"अपि दातृग्रहीत्रोश्च सूतके मृतके तथा ।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथञ्चन ।
विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्रमात् ॥" इत्यादि ।

मनुः(5/77)—"निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥"

पुत्रस्येतिलिङ्गाद्दशाहोत्तरं पितुरेव पुत्रजन्मश्रुतौ स्नानं, न सपिण्डानाम् ।

13-'पितृबन्धून्' स्थाने हारलतायां (P-2) 'मातृबन्धून्' इति पाठः ।

14-'सम्पर्काच्च निवृत्तस्य न प्रेतं नैव सूतकम् ।' इति (परा०-3/20)उत्तरार्द्धम् ।

दशाहशेषे तच्छ्रुतौ स्नानं कैमुतिकन्यायसिद्धमित्याशयः ।

'प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः ।' (याज्ञ०-3/21) ।

दशाहमध्ये मरणश्रुतौ दशाहशेषे शुद्धिः । दशाहानन्तरं श्रुतौ स्नात्वोदकमात्रदानमिति भावः । प्रोषितपदमदृष्टसामान्यान्मृतौ गौणम् ।

'अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ।'15

'नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि ।'

यत्तु वसिष्ठेनोक्तम् 4/36)— 'ऊर्द्ध्वं दशाहात्तु श्रुत्वैकरात्रमाशौचम् ।'

'मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा ।

अहस्तु नवमादर्वागूर्द्ध्वं स्नानेन शुद्ध्यती'ति 16

तत्पूर्ववचनविकल्पितमपि नास्मद्देशे आचर्यते ।

'उभाभ्यामपरिज्ञाते सूतकं नैव विद्यते ।

एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् ॥' (षट्त्रिंशन्मतम्)

इत्यादिना योग्यस्यैव विवाहव्रतादेः सन्निधौ लाभे पाकानधिकारभृतोऽप्रधानपित्रादेः पितर्यशौचयोगेन एकशो दोषः, न तु बहुषः । भोजनविषये तु भक्षकस्यापि दोष इत्याशयः । सूतकमशौचम्, करिकलभगशाङ्कुशादीनां लक्षणया साम्यार्थकत्वात् ।

'रात्रावेव समुत्पन्ने मृते रजसि सूतके ।

पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ॥' (कश्यपः)

बृहस्पतौ— दशाहादशौचं विज्ञेयं सर्वेषामग्निहोत्रिणाम् ।

मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना ॥'

---

15 याज्ञ० 3/20 । वर्णवयोवस्थाद्यपेक्षया यस्य यावानशौचकालः तदन्तरा तत्तुल्यस्य न्यूनस्य वाऽशौचस्य जनने मरणे वा जाते पूर्वाशौचावशिष्टैः पर्याप्तदिवसैः शुद्धिः इति साधारणम् । किन्तु सूतिकाशौचमध्ये पतितस्य शावाशौचस्य न पूर्वशेषेण शुद्धिः । तत्रापि मातृमरणजनिताशौचकाले पितृमरणाशौचपाते पितुरशौचकालेन शुद्धिः कर्त्तव्या । विपरीतं चेद्भवेत्तदा पितृमरणाशौचं समाप्य एकाहोरात्रात्परं शुद्धिरिति ।

16 याज्ञ० मिताक्षरायां (3/21) वृद्धवसिष्ठवचनम् ।

दाहोऽत्र श्रौतो न तु लौकिकः । साग्नेः संस्कारकर्मेण इत्र वक्ष्यमाणसंस्कार-पदात् । संयोगोऽग्न्याधानजन्यपूर्वसम्बन्धः, न तु व्यासज्यवृत्तिगुणः । असम्भवात् स्वरसातिप्रसङ्गात् । अङ्गिराः —

'अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः ।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथाविधि ॥'

उत्क्रान्तेर्मरणात् । अरणिवह्निदाहस्यैव संस्कारपदार्थत्वेन साग्नेः कदाचिल्लौकिकाग्निना दाहेऽपि न तत आरभ्याशौचम् । किन्तु पश्चादरणिवह्निनाऽस्थिपर्णदाहानन्तरमिति विद्याकरः । एतच्चाशौचं नष्टाग्नेरपि विद्यमानाग्निवदनग्निजन्यपूर्वसाम्याद्दाहावध्यशौचसर्वम् अग्निवदिति एकाग्निर्निरग्निश्च द्वावनुगतौ । एवं च यस्य नाग्निस्तस्य लौकिकाग्निनेतिपदं साम्यार्थकम्, अग्निरिति वह्वर्थकम् । इदञ्च स्फुटमाह जातुकर्ण्यः —

'एकाग्नेर्मरणादूर्द्ध्वमाशौचं श्राद्धमेव च ।
यस्य तु त्रयमग्नीनां तस्योर्द्ध्वं दाहकर्मणः ॥
ऊर्द्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृतेऽहन्येव तद्भवेत् ।
अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः ॥' इति ।

अध एकादशाहकप्रथममासिकत्रैपक्षिकाणि दाहावधिकानीत्यर्थः । यदि तु

'श्राद्धमग्निमतः कार्यं दाहादेकादशे हनि ।
ध्रुवाणि तु प्रकुर्वीत तन्मृताहनि सर्वदा ॥' इति

कात्यायनीय[17]माक्षेप्यते तदा द्विमासिकत्रैपक्षिकयोर्मृताहदाहमूलत्वविकल्पः । त्रैपक्षिकस्यापि षट्चत्वारिंशद्दिनपूरणार्थं मृताहापेक्षणाच्च । 'मृताहस्तु यथाविधि' इत्यधोवाक्ये सामान्यतो मृताहपदमप्यत्रानुकूलम् । अतएव तदात्वे साग्नेर्दाहाद्यशौचमुक्त्वा द्विमासिकत्रैपक्षिकश्राद्धे दाहावधिकेनोक्तेः । यत्तु सिंहराजनृपिनोक्तम्—दम्पत्योः पूर्वमृतश्रवणे त्रेताग्निना दाहात्पश्चान्मृतस्य वचनान्तरेणारणिजन्यलौकिकाग्निना दाहेऽपि मरणावध्यैवाशौचमिति । अत्र पृच्छामः - किं पश्चान्मृतस्य साग्नित्वाभावात् तथात्वमिति ? नैवम्, साग्न्याहिताग्न्यादिपदानामग्न्याधानजन्यतदर्थकत्वेन पश्चान्मृ-

---

17- 'प्रत्याब्दिकन्तु कर्त्तव्यं प्रमीताहनि सर्वदा ॥' इति कर्मप्र (24/7) ।

तस्य पूर्वमृतवत्तादृशत्वानपायात् । अन्यथा तस्य स्वर्गादिफलमपि न स्यात् । अतएव विद्याकरपद्धतावुक्तम्-आत्मनिष्ठस्याग्न्याधानजन्यसंस्कारस्याग्निमत्पदवाच्यत्वस्य पत्नीमरणानन्तरमपि पुंसः सत्त्वात् पुनर्विवाहानन्तरमग्नीन् सम्पादयेन् 'अपत्नीकोऽप्यग्नीनाहरेदि'ति ऋग्वेदब्राह्मणात्18 ।

'दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ।
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ।।' इति याज्ञवल्क्याच्च19 ।
'आत्मनातिशयः कश्चित्कृते कर्मणि नैव तत् ।
प्रागवस्थासमानत्वादात्मनो न भवेत्फलम् ।' इति च ।

किञ्चानग्निमत इति अत्रानग्निमत्पदस्याग्निमत्त्वावच्छिन्नप्रतियोगिताकभेदाश्रयार्थकतया पश्चान्मृतस्य न तादृशानिमद्युक्तत्वम् । भेदस्य व्याप्यवृत्तित्वात् । तस्याव्याप्यवृत्तित्वे तु प्रतियोग्यवृत्त्यग्निमदभेदस्य विचक्षणान्मृताहसत्त्वम् । अन्यथा विद्यमानाग्नेरपि बाल्यकालीनाचरितहृदमादायाग्निमत्त्वा-

---

18- 'अपत्नीकोऽप्यग्निहोत्रमाहरेत् ।' — ऐतरेयब्राह्मणम्-32/8 । तत्र सायणभाष्ये मृतभार्योऽपि वैदिककर्म न त्यजेदित्युक्तं, यथा- 'विष्णुः— मृतायामपि भार्यायां वैदिकं न त्यजेद् द्विजः । उपाधिनापि तत्कर्म यावज्जीवं समापयेत् ।। इति । उपाधिः कुशमयादिपत्नीकल्पना । तथा च स्मृत्यन्तरम्— अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः । अग्निहोत्रमुपासन्ते यावज्जीवमनुव्रताः ।। इति । तथा च मैत्रायणीयश्रुतिरप्याम्नायते— यस्तु स्वैरग्निभिर्भार्यां संस्करोति कथञ्चन । असौ मृतःस्त्री भवति स्त्री चैवास्य पुमान् भवेत् ।। इति । तस्मान्मृतभार्योऽपि स्वकीयानग्नीनवस्थाप्याग्निहोत्रमाहरेत् ।' इति ।

19- याज्ञ०-1/89 । अत्र अनुत्पादितपुत्रोऽनिष्टयज्ञो वा पतिःपुनर्विवाहेच्छया सदाचारवतीं सवर्णां स्त्रियमग्निहोत्राग्निना तदभावे स्मार्ताग्निना दाहयित्वा पुनर्दारानग्नींश्च विधिवदाहरेदिति । अन्यथा हेममयी कुशमयी वा पत्नी कर्त्तव्या यतः, 'न सीतायाः परां भार्यां वव्रे स रघुनन्दनः । यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनीभवत् ।' इति वाल्मीकीयरामायणे उत्तरकाण्डे (99/8) उक्तमस्ति । एषा व्यवस्था प्रथमायाः कृते न द्वितीयादेः यतः 'द्वितीयां चैव यो भार्यां दहेद्वैतानिकाग्निभिः । जीवन्त्यां प्रथमायां हि सुरापानसमं हि तत् ।। इति तथा-मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् । ब्रह्मघ्नं तं विजानीयाद्यश्च कामात्समुत्सृजेत् ।।' इति (याज्ञ० मिताक्षरा-1/89) ।

पत्तिः । अत एव 'अनागसे शंसति बालचापलमि'ति20वदनग्निरप्यग्निवदिति भाव इत्यर्थेऽप्यनिस्तारः । उक्तदोषाभावाय तदभावे प्रतियोगिवैयधिकरण्यस्य हेयत्वात् । अतः परिशेषे दाहान्मृतस्य साग्निमत्त्वम् । साग्निर्निरग्निर्वान्यतरस्य केवलान्वयित्वात् । एवं 'संयोगो यस्य नाग्निने'त्यत्रापि संयोगपदेनाग्न्याधानापूर्वस्य प्रागुक्तत्वात् वाक्यादपि तदुपलम्भः । न च साग्नित्वमपि नष्टाग्नित्वं साग्नेरित्यस्यार्थ इति शङ्क्यम् । दर्शत्रयचण्डालस्पर्शादुच्छिन्नयज्ञपात्रादिनोच्छिन्नाग्नेरपि मरणावध्यशौचापातात् । इष्टापत्तौ आचारविरोधः । न द्वितीयः । सर्वयज्ञपात्रकृतदाहस्य संस्कारत्वे लौहशीलायज्ञपात्रैरदाहात् सर्वासम्भवेन यत्किञ्चित्काष्ठकृतदाहस्य संस्कारत्वापत्तिः ।

'अप्सु क्षिपेत्सदा लौहमयान्यश्ममयानि च ।

पात्राणि दद्याद्विप्राय ...' इति वचनात् यत्किञ्चित्पात्रकृतदाहस्य21 संस्कारत्वे स्पर्शजोलूखलमूषलादिकृतं यत्किञ्चिद् वचम् । विनिगमनाविरहात् सर्वपात्रग्रहापत्तिश्च । अपि च गृहदाहाशुद्ध्यादिना यज्ञपात्राभावकालीनमृते विद्यमानाग्नेरपि सर्वपात्रं विना दाहात्तस्य मरणावध्यशौचापत्तिः । नूतनसर्वयज्ञपात्रस्य संस्कारापेक्ष्यत्वात् । किञ्चापरानियुक्तायां साग्निकपत्न्यग्निप्रविष्टायां पत्न्यामिति व्याप्तिः । तस्याः पत्या सह सर्वयज्ञपात्रैर्दाहात् । अन्यथा साग्निकायां पतिचिताप्रविष्टायां न व्याप्तिः । अनियुक्तायामिष्टापत्तावाचारव्यत्यासः । अनियुक्तपत्न्यास्त्वग्निप्रविष्टत्वेऽप्याहिताग्नित्वाभावात्मृताह एव मासिकत्रैपक्षिकादिश्राद्धमिति विप्रमिश्रवचनविरोधश्च22 । नापि तृतीयः ।

---

20 नैषधमहाकाव्ये (1/25) सम्पूर्णवचनं यथा— 'स्ववालभारभारस्य तदुत्तमाङ्गवस्त्वयं चमर्येव तुलाभिलाषिणः । अनागसे शंसति बालचापल पुनः पुनः पुच्छविलोलनच्छलात् ।' इति ।

21- यज्ञपात्राणां दाहादिव्यस्था कात्यायनस्मृतौ (23/5-6) यथा—'प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि । गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदम् ॥ सादयेदुभयं वाप्सु हृद्भ्योऽग्निरभवद्यतः । पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत् ॥' इति ।

22-'अनियुक्तपत्न्यास्त्वग्निप्रविष्टत्वेऽप्याहिताग्नित्वाभावात् मृताहत्रिपक्ष एव तच्छ्राद्धम् ।' इति श्राद्धप्रदीपः (P-224) ।

पश्चान्मृतस्यारणिजन्याग्नेर्येऽस्याग्नयो······स्वर्गमिमं प्रेतं नयन्तीतिशाखान्तरसन्त्रकृतमन्थनजन्यत्वेन वैदिकत्वप्रकाशात् । न च तद्वह्नेः लौकिकत्वमिति युक्तिसत्त्वम् । वाङ्मात्रेण निरासे पूर्वमृतस्य साग्निदाहेऽपि तथापत्तिः । न च

'आहिताग्न्योश्च दम्पत्योर्यश्चादौ म्रियते भुवि ।

तस्य देहः सपिण्डैस्तु दग्धव्यस्त्रिभिरग्निभिः ॥

पश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निने'ति ब्राह्माच्चदग्नेः लौकिकत्वमिति वाच्यम् । लौकिकस्यारणेरग्निर्वैयर्थेन लौकिकपदपूर्व श्रौतारणिभिन्नत्वाल्लौकिकाग्नीत्यर्थकत्वात् ।

'अग्नयो न विद्यन्ते अरणी च न दृश्यते ।

यजमानश्च सङ्क्रान्तः किं करिष्यन्ति याज्ञिकाः ॥

अश्वत्थपर्णदण्डेन निर्मथ्य तत्र कारयेत् ।

प्रायश्चित्तं यथापूर्वं पश्चाद्दाहं तु कारयेदि'ति

स्मृतिसारधृतवचनात्तल्लाभात् । अन्यथा गोष्ठचत्वराद्यग्निना पातित्यापत्तिः । अत एवाह यमः—

'आहिताग्निश्च यो विप्रो दह्यते च वृथाग्निना ।

ब्राह्मण्यात् स परिभ्रष्टः शूद्रयोनौ प्रजायते ॥'

वृथाग्निररणिभिन्नमित्यर्थः । दह्यत इत्यस्य शुद्धिपिण्डदानमित्यादि । तेनारणिपात्रलाभाद्वैदिकाग्निदाहानन्तरं पुनर्यज्ञपात्रादिना स्थायित्वहेत्वदोषः । किञ्च पश्चान्मृतस्य दाहादारभ्यैकादशमासिकश्राद्धं त्रिपक्षस्यापि स्वीकरणं न भवेत् । एवं मृतपत्नीकसाग्नेः सपुत्रस्य द्वादशाहे पितृसपिण्डीकरणं नेत्यादि बहुव्याकुलं स्यात् । इष्टापत्तावाचारविरोधः एकशेपे मानाभावश्च । तस्मात् विज्ञानेश्वर रामवाजपेयि-कालिदास-विद्याकर-कालादर्शकार-माणिक्यदेवादिबहुकृतग्रन्थेष्वेतदनुपलम्भान्महतोऽपि वाजपेयिनो भ्रमकल्पनायां न वर्त्तितव्यम् । तद् बहुभिरित्यलं प्रपञ्चेन ।

जन्माशौचम् –

जन्माशौचं तु नाभिच्छेदनानन्तरमेव, न तु ततः प्राग्जन्मनागतम् ।

'यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् ।

छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते ॥' इति' जैमिनिस्मरणात् ।

देवलः — 'शूद्रस्य त्रिंशता शुद्धिर्विंशत्या दिवसैर्विशः ।
राज्ञः पञ्चदशाहेन दशभिर्ब्राह्मिणस्य तु ॥'

ब्राह्मे— 'शौचाशौचं प्रकुर्वीरन् शूद्रवद्वर्णसङ्कराः ।' 23

वर्णसङ्कराः प्रतिलोमजा वैदेहकादयः24, न त्वनुलोमजा अम्बष्ठकरणादयः25

'प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसङ्करः ।' इति नारदस्मरणात्26 ।

'अपि शूद्रस्य शेषाणं सदाऽशुचित्वमिष्यते ।' इति जावालिस्मृत्याऽम्बष्ठानुलोमशूद्रप्रतिलोमजातचण्डालादीनां शेषपदेन नित्या-शौचवचनाच्च ।

पराशरः — 'सत्यपूताश्च ये शूद्रा नित्यं धर्मपरायणाः ।
शुद्ध्यन्ति तेऽर्धमासेन पराशरमतं यथा ॥'

धर्मपरायणाः 'भार्यारतिः शुचिर्भृत्यभर्ताश्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्च यज्ञान्न हापयेत् ॥' इति (1/21)

याज्ञवल्क्यादितिलक्षणाः पञ्चयज्ञकरणवैश्वदेवविमुखाः सच्छूद्राः गोपनापितादयः 27 । भार्ये च शूद्रस्य द्वे, भृत्यैका, बाल्यक्रीतपोषादिपालिताऽनूढान्या चेति ।

'त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्त्तिनः ।' इति (याज्ञ०-3/22) न्यायवर्त्तिशूद्रोऽप्ययम् । केचित्तु द्विजशुश्रूषावृत्तेः शूद्रस्य न्यायवर्त्तित्वम् ,

---

23- वर्णसङ्कराणामभिधानं मनुस्मृतौ (10/24) यथा – 'व्यभिचारेण वर्णानामवेद्यावेदनेन च । स्वकर्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः ॥' इति।

24- 'क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः । वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥ शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् । वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥' मनु० (10/11-12) ।

25- ब्राह्मणाद्वैश्यकन्यायामम्बष्ठः, शूद्रकन्यायां निषादः, क्षत्रियाच्छूद्रकन्यायामुग्रः, वैश्याच्छूद्र्यां करणश्च अनुलोमजाः पुत्राः जायन्ते ।

26- नारदस्मृतौ (12/102) सम्पूर्णवचनं यथा – 'आनुलोम्येन वर्णानां यज्जन्म स विधिः स्मृतः । प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसङ्करः ।'

27- सच्छूद्रलक्षणमाहोशनाः (श्लोकः-49)—'द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः । सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा ॥' इति। ते च मनुना (4/253) चिह्निता यथा—'आर्धिकः कुलमित्रञ्च गोपालो

वाणिज्यादिवैश्यवृत्तिजीवने तु वैश्यवदशौचम् ,

'शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् ।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन् ॥' इति

योगीश्वरा (याज्ञ०- 1/120) दित्याहुः ।

वस्तुतस्तु, 'अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ।
मृत्युं समधिगच्छेत्तु मासं तस्यापि बान्धवाः ॥
शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ॥'(शङ्खः-15/6-7) ।

मासमिति पूर्णाशौचार्थकत्वेन पाक्षिकदशाहस्यापि ग्राहकम् ।

'विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ।' (बृहन्मपु०) ।

अपिना तत्समस्त्रीणामपि ।

'चत्वारिंशद्वत्सराणां साष्टानां च परे यदि ।
प्रिया वियुज्यते काचिन् स तु खण्डाश्रमी स्मृतः ॥'' (भवि०)इति

वचनादौ प्रियामृत्यनन्तरं मध्ये वाऽष्टचत्वारिंशद्वर्षाधिकविवाहाभावे शूद्रस्य वर्णान्तरवत्पातित्यम् , षोडशवर्षाधिकानुपनीतविप्रवत् 28 । प्रियेतिसामान्याच्चतुर्वर्णपरमिदमुक्तं विवाहतत्त्वे । यद्वा काचिदित्यनूढजायासूचनेन केवल-

---

दासनापितौ । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥' इति । नापितस्य विशेषलक्षणमाहोशनाः (श्लो० 34-35)—नाभेरूर्द्ध्वं तु वपनं तस्मान्नापित उच्यते । कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः ॥ काकाल्लौल्यं यमात्क्रौर्यं स्थपतेरथ कृन्तनम् । आद्यक्षराणि सङ्गृह्य कायस्थ इति कीर्त्तितः ॥ इति । पराशरेणापि (11/23-25) तेषां स्वरूपमुक्तम् - ''शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः । असंस्काराद्भवेद्दासः संस्कारादेव नापितः ॥ क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः । स गोपाल इति ख्यातो भोज्यो विप्रैर्न संशयः ॥ वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः । स ह्याधिक इति ज्ञेयो भोज्यो विप्रैर्न संशयः ॥' इति ॥

28- स्मृतिशास्त्रे ब्राह्मणादिवर्णत्रयस्योपनयनार्थं यथा साधारणतो गर्भाष्टमाब्दादिकाला निरूपितास्तथा तदर्थं परमावधिरपि प्रदर्शितः, यथा मनुः (2/38)-'आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्त्तते । आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥' इति । अत्र 'आङ्मर्यादावचने' (पाणिनि०-1/4/89) इत्यनेन वचनग्रहणादभिविधावाङ्प्रयोगः । अनेन

शूद्रपरमिदम् । एतेन षोडशाब्दन्यूनद्वित्रिवर्षबालमृतौ केषाञ्चिच्छूद्राणां पूर्णाशौचक्रिया निर्मूलेत्यायातम् । उपरि शूद्रेऽधिकं वक्ष्यामः ।

'एकाहाद् ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥'

इत्यादिकं तु कलियुगाग्राह्यम् ।

'दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणाः कलौ व्यामोहकिल्बिषी ॥' इति हारीतात् ।

मरणपदं जन्मनोऽप्युपलक्षणम् । देवलः—

'आशुच्यं दशरात्रं तु सर्वत्राप्यपरे विदुः ।
जनने मरणे चैव पश्यन्तः कर्मणः क्षयम् ॥'

सर्वत्र चतुर्वर्णाभास:29 । अङ्गिराश्च—

'सर्वेषामेव वर्णानां सूतके मृतकेऽपि वा ।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत् ॥'

अयं पक्ष इदानीन्तनैः30 पाल्यते । शूद्रैः क्वचित्परम्पराचारान्मासेनापि ।

गर्भस्रावाद्यशौचम्—

स्मृतिः - 'आचतुर्थात्पुनर्मासाद्भवेद् गर्भस्य विद्रवः ।
अतः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ।
ततोऽपप्रसवो यावत् सप्तमाष्टममासयोः ॥'' इति ।

मनुः (5/66)—"रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥' इति ।

षोडशवर्षपर्यन्तं सावित्रीग्रहणे ब्राह्मणस्य नातिक्रान्तकालम् । मर्यादायामत्राङ्प्रयोगोऽसमीचीनो गर्भाष्टमाब्दादिनिर्दिष्टकालस्य परमावधिरूपद्विगुणकालार्थं मन्वभिप्रायस्याविवक्षितत्वात् । निर्दिष्टसमयाभ्यन्तरेऽनुपनीते दोषमाह मनुः, यथा (2/39)-'अत ऊर्द्ध्वं त्रयोप्यते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥'इति ।

29- अत्यन्तोत्कृष्टस्य कर्महानौ पीडावतो विप्रपरिचर्यापरशूद्रस्य दशरात्रमिति हारलतावचनं निर्णयसिन्धु (P-369) कारेण समर्थितमिति शूद्रस्यापि दशरात्राशौचम् ।

30- गदाधरेणापि इदं स्वीकृतं यथा—दशरात्राशौचपक्षस्य अस्मद्देशे सर्ववर्णानामादृतत्वात् । 'सूतिका सर्ववर्णानां दशाहेन विशुद्ध्यति ।' इति वचनान्तरेण सर्वस्त्रीणामपि दशरात्रात्पर स्पर्शयोग्यत्वमेव ।' इति (गदाधरपद्धतिः — P. 297) ।

मरीचिः— 'गर्भस्त्रुत्यां यथामासमचिरे तूत्तमे त्र्यहः ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ।
अष्टाहेन च शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ॥'

अचिरे प्रथमद्वितीयमासीयगर्भे । उत्तमे ब्राह्मणे त्र्यहः । क्षत्रियायां प्रथमादिमासत्रये चत्वारो, वैश्यायाञ्च प्रथमादिमासचतुष्टये पञ्च, शूद्रायां प्रथमादिमासषट्के अष्टौ दिनानीत्यर्थः । मासतुल्यदिनैः स्पर्शे शुद्धिस्तदधिकदिनैक्ये दैवपित्र्यादिकर्मयोग्यता रजस्वलासूतिकयोः पञ्चाहैकविंशाहवदिति माणिक्यदेवः । विज्ञानेश्वर31 वाजपेय्यादयस्तु,

'तदा तासां माससमैर्दिवसैः शुद्धिरिष्यते ॥
अत ऊर्द्ध्वं स्वजात्युक्तमशौचं तासु विद्यते ।
सद्यः शौचं सपिण्डानां गर्भस्य पतने सती'ति

ब्राह्मवाक्यं तासामिति बहुत्वात् स्वजात्युक्तमितिलिङ्गाच्च चतुर्वर्णसाधारणं मन्वाना मासतुल्यदिनैः स्पर्शजत्वादिकर्मयोग्यत्वमित्याहुः । तेन स्वतो दीर्घ स्वल्पशेषस्य दशाहाशौचस्यान्त्यदिनपतितेन त्र्यहाशौचेन नैकदिनदशाहाशौचबाधः । त्र्यहाशौचस्य दृश्यमानबहुदिनकत्वेऽपि दशाहापेक्षया स्वतो गणनान्यूनत्वात् । इदञ्च 'गुरुणा लघु शुद्ध्येते'त्येतावता सिद्धे 'लघुना नैव तद् गुर्वि'ति पुनर्वचनात्प्राप्यते । एवं क्वचिदघवृद्धिरपि शिष्टैः गृह्यते ।

पित्रोरशौचे विशेषः—

पैठीनसिः—''पितरौ प्रमृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥'

आग्नेये—32'पितृमात्रोरुपाघाते आर्द्रवासा ह्युपोषितः ।
अतीतेऽब्देऽपि कुर्वीत प्रेतकार्यं यथाविधि ॥'

31- याज्ञवल्क्यस्मृतिव्याख्याने (3/20) विज्ञानेश्वरः कथयति यथा— ''सप्तमादिषु पुनः परिपूर्णमेव प्रसवाशौचं कार्यं, तत्र परिपूर्णाङ्गगर्भस्य जीवतो निर्गमदर्शनात् । तत्र च लोके प्रसवशब्दप्रयोगात् , 'षण्मासाभ्यन्तरे यावत् गर्भस्य पतते सति ॥' इति स्मरणात् । एतच्च सपिण्डानां सद्यः शौचविधानं द्रवभूतगर्भपतने वेदितव्यम् ।' इति ।

32-'पितृमात्रादिपाते तु' 'अतीतेब्दे प्रकुर्वीत' इति मुद्रितकूर्म० (158/43)पाठः वपनं पिण्डदानादिकं यथारीति कर्त्तव्यमित्यर्थः ।

उपाघाते मरणश्रुतौ । अपिना वा पूर्वग्रहः । दशाहमध्ये मृतिश्रुतौ दशाहशेषेण शुद्धिरिति वक्ष्यामः । रागार्थकयथाविधिपदात् यत्र शूद्रादीनामपि द्वादशाह-मासाद्यशौचम् , तावच्च प्रेतकार्यम् । पूर्ववाक्येऽपि दशाहपदं मासाद्युपलक्षणं चतुर्वर्णविकल्पकर्मिति दशाहबोधकं वा ।

'मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् ॥' (शङ्खः) ।

मातृदशाहमध्ये पितृमृतौ पश्चाच्छ्रुतेन पितृमरणेन पुत्रस्य शुद्धिः, द्वयोरेकादशाहकृत्यं पित्र्यैकादशाहे कार्यम् । पितृदशाहमध्ये मातृमृतौ तु पितृदशाहाशौचं समाप्याधिकां पक्षिणीं प्रक्षिप्य पुत्रस्य शुद्धिर्न तु पितृदशदिनशेषमात्रेण । मातृपक्षिण्यनन्तरं द्वयोरेकादशाहश्राद्धं कार्यमिति तात्पर्यार्थः । इत्थं सम्भत्रो मातुरग्निप्रवेशेऽपि स्यात् । पक्षिणीक्षेपस्य प्राच्यैरलिखनेऽपि विज्ञानेश्वर 33 वाजपेय्याद्युक्तत्वेन प्रामाण्यम् । अयं पक्षिणीक्षेपो मृतिदशाह इव श्रवण-दशाहेऽपि समः । इदं तु बोध्यम् । 'श्रुत्वा तद्दिनमि'ति वाक्ये तु न्यूनाधिक-दशाहाशौचस्य पित्रोर्मृतिदशाहानन्तरं सावकाशत्वेन तद्दशाहमध्ये मृतिश्रुतौ दशाहशेषेणैव पुत्रस्य शुद्धिर्न तु पूर्णदशाहैः । उत्सर्गप्राप्तमृतदशाहाशौचस्य त्यागो योगात् । इयं श्रुतिः पर्णदाहे वक्ष्यते । अतएव स्मृतिः—

'शृणोत्यनिर्दशं पित्रोः पुत्रस्तु मरणं यदि ।
मृताहात्प्रेतकार्यं स्याच्छुद्धिः स्यात्तद्दशाहतः ॥' इति ।
'पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः ।
सम्वत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत् ॥' (दक्षः) ।

33- 'मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमः स्यात्तदा न पूर्वशेषेण शुद्धिः, किन्तु पूर्वाशौचं समाप्योपरि पक्षिणीं क्षिपेत् इति ।' याज्ञ० मिताक्षरा (3/20) । अधिकन्तु प्रोषितमृताशौचप्रकरणे (3/21) तेनोक्तं यथा—'यद्यपि गौतमवचनम् (2/5/17) 'श्रुत्वा चोर्द्ध्वं दशम्याः पक्षिणीम्' इति तन्मासत्रयादूर्द्ध्वमर्वाक् षष्ठात् । तथा च वृद्धवसिष्ठः—मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वागूर्द्ध्वं स्नानेन शुद्ध्यति ॥' इति । एतच्च मातापितृव्यतिरिक्तविषयम् ।' इति ।

अप्यर्थक-तु-शब्दात् सम्वत्सरात्पूर्वमपि त्रिदिनाशौचमिति भावः। 'तु'-स्थाने क्वचि'दपि' पठ्यते। न च कनिष्ठमातरमाचक्षते। बह्वस्त्वेतन्मतमाद्रियन्ते।
शातातपः—'गर्भस्रावे च त्रिरात्रम्, यावन्तो वा मासास्तावन्त्यहानी'ति34।
अत्र मासतुल्यदिनस्थाने त्रिदिनविकल्पोऽशक्तविषयः।
बृहन्मनुः— 'जीवञ्जातो यदि प्रेयान्मृतो वा जायते यदि।

सूतकं मातुरेव स्यात्पित्रादीनां त्रिरात्रकम्।'

जीवञ्जातलिङ्गात् सप्तमाष्टममासपरमिदम्।

'आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः।
अपप्रसवसञ्ज्ञा तु सप्तमाष्टममासयो'रितिवचनात्।

एतन्मासयोः कदाचिद्बालजातमरणे तु नवमदशमवदशौचम्। तदुक्तं कालिदासचयनिना —35(शुद्धिचन्द्रिका-श्लोकः-8)

'तत्सप्ताष्टममासयोरुभयथा गर्भच्युतौ सद्गुणे
ज्ञातौ वा विगुणे यथेष्टचरिते सद्योऽहरेकं त्र्यहम्।
त्रीण्येवात्र पितुः परं मृतजनौ सर्वस्य पूर्णं भवे—
दन्तःसूतिमृते पितुश्च जननाशौचद्वयं नान्यतः॥' इति।

34- गौतमेनापि (2/5/15- 6) तथैवोक्तम्-'गर्भमाससमा रात्रीः स्रंसने गर्भस्य। त्र्यहं वा।' किन्तु मनुः (5/66) याज्ञवल्क्यश्च (3/20) यथाक्रमं 'रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति।' 'गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणमि'ति प्रकाशयतः। अत्र हरदत्तः 'द्वितीयेऽपि मासे त्र्यहं वाऽपि भवति। चतुर्थे तूत्कर्षः।' इत्याह। कुल्लूकभट्टस्तु 'षण्मासाभ्यन्तरं यावदि'त्यादिपुराणवचनमुपन्यस्यैतच्च षण्मासपर्यन्तमित्याह। विज्ञानेश्वरेणापि तथैवोक्तत्वात् मासतुल्यदिनस्थानेऽशक्तपरत्वात्त्रिदिनाशौचरूपको ग्रन्थकारस्याभिप्रायः षण्मासपर्यन्ते ज्ञातव्यः।

35- सप्तमाष्टममासयोर्यदि जीवञ्जातो मृतः, मृतो वा जायते तर्हि सप्तमोद्ध्वजाः सद्यः, चतुर्थोद्ध्वजाः सप्तमपुरुषावधिका एकेनाहोरात्रेण तथा च तृतीयपुरुषपर्यन्ताः त्रिभिरहोरात्रैः शुद्धाः भवेयुः। अत्र त्रीण्यहोरात्राणि पित्रोरशौचम्। अतः परं मृतजाते जातमृते वा सर्वेषां पूर्णदशाहाशौचम्। जननमरणावसरे यदि मृतो जायते जातो वा म्रियते तर्हि पित्रोः सम्पूर्णाशौचम्। अन्येषामेतद्व्यतिरिक्तानामशौचद्वयं नास्त्येव इति।

कलौ सगुणविगुणभावस्य दुर्वचत्वाद् यथेष्टचरितत्वेनैव सर्वग्रहे सप्तमाष्टममासयोर्जातमृते मृतजाते वा पित्रादिसपिण्डानां त्र्यहाशौचमिति भावः ।
नवमदशममासयोस्तु पारस्करः—

'गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत् ।'

अविशेषात् पित्रादिसर्वसपिण्डपरमिदम् ।

'जातमृते मृतजाते वा सपिण्डानां दशाहम् ।' इति हारीतः ।

यद्यपीदं दशाहवचनं विज्ञानेश्वरेण36 सप्तमाष्टममासयोरप्युपन्यस्तं तथापि 'जातमृते मृतजाते कुलस्य त्रिरात्रमिति' (हारीत) स्मृत्या 'पित्रादीनां त्रिरात्रकमि'त्यधोवाक्येन च विकल्पेऽष्टदोषापत्तिः 37 । अतो व्यवस्थया नवमाष्टममासयोः परमेव दशाहवाक्यमिति युज्यते । तथाच कालिदासवाजपेय्यादिबहुग्रन्थकारविरोधादनाचाराच्च तन्मतमनादेयम् । इयं मृतजनिः सूतकीतिलिङ्गाज्जन्माख्यया च जन्यन्तर्भूता न तु मृतौ ।

'अधस्तु क्षणयोगस्य क्षणयोगो जनौ मृते ।' इति ।

उदयनसिद्धान्ताज्जनेश्चेतनाचेतनसमानत्वात् । तेनासम्पूर्णसूत्या मृत्या च सिद्धिः । यथा निषेकगर्भकृतं शत्रुघ्नज्यैष्ठ्यमगणय्य वहिः प्रथमं दृष्ट्वा लक्ष्मणज्यैष्ठ्यं गृह्यते तथाऽन्येष्वपि । तद्वद् गर्भकृतापि मृतिरत्राकिञ्चित्करा । ततोऽज्ञाताशौचमत्स्यमांसादिनिषेधोऽप्यत्र नाशङ्क्यम् । अतएव यामल-

---

36- 'सप्तममासप्रभृति मृतजनने जातमृते वा सपिण्डानां जननिमित्तं परिपूर्णमाशौचम् ।' इति याज्ञवल्क्यमिताक्षराकारः (3/20) ।

37- 'तुल्यबलविरोधे विकल्पः ।' इति गौतमः । तस्मिन् विकल्पे चाष्टौ दोषाः सन्ति, यथा— 'प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पने । प्रत्युज्जीवनहानिभ्यामष्टौ दोषाः प्रकीर्तिताः ।' अत्र दशाहवचनपक्षे त्रिदिनवाक्यप्रमाणत्वस्य परित्यागः, त्रिदिनवाक्याप्रमाणत्वस्य प्रकल्पनम्, त्रिदिनपक्षे परित्यक्तस्य दशाहवाक्यप्रमाणत्वस्य प्रत्युज्जीवनम्, त्रिदिनपक्षे प्रकल्पितस्य दशाहवाक्याप्रमाणत्वस्य हानिश्चेति चत्वारो दोषाः । तथा त्रिदिनपक्षे दशाहवाक्यप्रमाणत्वस्य परित्यागः, दशाहवाक्याप्रमाणत्वस्य प्रकल्पनम्, दशाहपक्षे परित्यक्तस्य त्रिदिनवाक्यप्रमाणत्वस्य प्रत्युज्जीवनम्, दशाहपक्षे प्रकल्पितस्य त्रिदिनवाक्याप्रमाणत्वस्य हानिश्चेति चत्वार इति मिलित्वा अष्टौ दोषा इति ।

जनने मृतजातोत्तरं जीवज्जातस्य मृतौ बलीयसीमुत्तरमृतिमादाय सपिण्डानां सद्यः शौचमिति पारम्परिकाः । तथा हि कौर्मे[38]—

'जातमात्रस्य बालस्य यदि स्यान्मरणं, पितुः ।

मातुश्च सूतकं तत्स्यात् पिता त्वस्पृश्य एव च ॥

सद्यः शौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ।'

अस्पृश्य इति वक्ष्यमाणत्रिभागकृताङ्गाशौचापवादः । न चाशौचविधिः मातृवदङ्गास्पर्शविधिः, गौरवात् । सप्तमाष्टममासजातमृतेऽनुजातपुत्रे मृते तथा दर्शनाभावाच्च । न च मातृवद्रजस्कृतं तत् ।

'रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते ।' इति वाशिष्ठात्[39] ।

यद्वा पितुरस्पृश्यत्वं स्नानाभावहेतुकम् ।

'अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति ।

मातुः प्रासविकं शौचं पिता स्नानेन शुद्ध्यती'ति वृहच्छंखात् । अतएव स्नानोपस्पर्शनादग्निहोत्रार्थं पितुः शुद्धिरिति शुद्धिगु तच्च निरुक्तम् । अस्पृश्यत्वे तदभावः । अनुत्तमादिवन्नास्ति स्पृश्यो यस्मादिति पञ्चमीवहुव्रीहिणा[40] स्पर्शाभावशङ्कानिरासकं वा तम् । अथवा सर्वादिगणे त्वशब्दस्या-

---

38- 'त्वस्पृश्यः' स्थाने 'स्यात्स्पृश्यः' इति कूर्मपु० (उत्त० 23/13-14) पाठः । तथा च 'ऊर्द्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः ।' इति द्वितीयश्लोकस्योत्तरार्द्धम् ।

39- 'नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति ।' इति वसिष्ठ० (4/23) पूर्वार्द्धम् ।

40- वहुव्रीहिसमासप्रकरणे 'अनेकमन्यपदार्थे' (पाणिनि० 2/2/24) इति द्वितीयसूत्रम् । अत्र 'अनेकं प्रथमान्तमन्यपदार्थे वर्त्तमानं वा समस्यते स वहुव्रीहिरि'ति भट्टोजिदीक्षिताः । इदं स्फुटीकुर्वन् सरला-व्याख्याकार आह-द्वन्द्वैकशेषयोरपि प्रथमान्तपदघटिततया ततो विशेषार्थमाहानेकमित्यादि । समर्थमिति सुविति चानुवर्त्तते अनेकं समर्थं परस्पराकाङ्क्षशेषपदप्रतिपाद्यं प्रथमान्तं सुबन्तमित्यस्य पदस्यार्थे वर्त्तमानं सत् बहुव्रीहिरित्यर्थः । अत्रान्यत्वं चोपस्थितसमस्यमानप्रथमान्तपदापेक्षं तथा च समस्यमानपदातिरिक्तत्वमित्यर्थः ।' इति ।

न्यार्थत्वाभिधाना41द्युतः पश्यन्नदर्शवाचमित्यादिश्रुतौ तद्दर्शनाच्च स त्वन्येन स्पर्शयोग्य इति मातृसमप्राप्तास्पर्शशङ्कानिरासकमिदं वचनम् । एतेनैतद्वचनबलाद्दशाहान्तं पितुरवश्यं शौचमिति वाजपेय्यर्थो निरस्तः । विज्ञानेश्वर-शुद्धिगुच्छादिष्वलिखनाच्च । एवं सति दशाहमध्ये जातशिशुमृतिः सपिण्डानां सूत्यन्तरस्य परमृतेश्च बाधिका । तस्य वचनात् सद्यः शौचत्वेऽपि मृतित्वानपायात् । पूर्वमृत्या सूतिः परसूतिर्वा बाधितेत्यस्य वक्ष्यमाणत्वात् । पित्रोश्चानुसूतिमृत्युभयनिरासिका, विरजसोर्बलीयस्त्वात् । केचित्तु, अघवृद्धिकृताशौचस्यानादेयत्वात्तद्दशाहबालमृतिर्न सपिण्डपूर्वमृतेर्बाधिका किन्तु रजोबलान्मातुरेवेत्याहुः । यदि तु,

'दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयत' इति वृहन्मनुवाक्यं
'जातमृते मृतजाते वा सपिण्डानां दशाहम्' इति

वाक्यं च गृह्येते तदा सपिण्डानां दशाहाशौचविकल्पो देशान्तरकुलाचारकृतः । अस्मद्देशे तु सद्यः शौचमुक्तमेव । प्रचेताः—

'सूतिका सर्ववर्णानां दशाहेन विशुद्ध्यति ।
संस्पर्शे सूतिकायास्तु स्नानमात्रं विधीयते ॥'

विशुद्ध्यतीति उत्तरस्य स्पर्शस्वारस्यात् स्पर्शमात्रपरम् , न तु कर्मपरमिति । यद्वा संस्पर्श इति काकाक्षिगोलकन्यायात् विशुद्ध्यति सूतिकाया इत्युभयान्वव्यावृत्तेः । पत्युः स्वपत्नीकालिङ्गनादौ रागात् सूतिकावदस्पृश्याशौचं वक्ष्यामः । प्रायश्चित्तान्तरमित्यन्ये ।

'गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव च ।' इति ब्राह्मात्42

41- सर्वादीनि सर्वनामानि (पाणिनि० 1/1/27) इति विचारणे भट्टोजिदीक्षितेन कथ्यते यत्-'सर्वादयश्च पञ्चत्रिंशत् । सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम ।...'त्व' 'त्व' इति द्वावप्यदन्तावन्यपर्यायौ, एक उदात्तोऽपरोऽनुदात्त इत्येके । 'एकस्तान्तः' इत्यपरे ।'-अजन्तपुंलिङ्गप्रकरणम् ।

42-'ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः ।' इति (नि० सि०P-363) पूर्वार्द्धम् ।

परिणीताशूद्राविषयकमिति गोपीनाथः । पैठीनसिः—

'सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेत्, मासेन स्त्रीजननीमि'ति । नपुंसकस्यानिश्चयात् पुंव्यवहारः । सामान्याच्चतुर्वर्णपरमिदम् । श्रौतस्मार्त्तोभयग्रहार्थं सर्वपदमिति शुद्धिगुच्छः । यद्वा सूत्यां लुक्छन्दसीति सर्वपदात् षष्ठीबहुवचनामो लुक् सर्वेषां वर्णानां सुतिकां पुत्रिणीमित्यर्थः । 'छन्दोवत्सूत्राणि भवन्ती'ति (महाभाष्य तृतीय०-वृद्धिरादैच् सूत्र) भाष्योपसङ्ख्यानात् सूत्रतुल्यसूत्यादीनामपि छन्दस्यतिदेशात् । 'लुग्लुप्तेप्रत्ययलक्षणाभावात्' (पाणिनि०-1/1/61-63 । 'अकृतव्यूहाः पाणिनीयाः' (परिभाषा-57) इति परिभाषया वा न सुट् । केचित्तु कर्माण्यत्र स्मार्त्तानि न तु श्रौतानीति, 'प्रजातायाश्च दशरात्रादूर्द्ध्वंमि'ति कात्यायनात्, एवं 'त्रिरात्रेण गोमूत्रमिश्रेणोदकेन स्नपयित्वा परिधानादिकं चरती'ति कल्पसूत्राच्चतुर्थेऽह्नि स्नाता श्रौतकर्मयोग्या, कल्पसूत्राणां प्रत्यक्षश्रुतिमूलकत्वेनानुमेयस्मृतिकप्रयोगादेर्बलवत्त्वादिति वदन्ति । वस्तुतस्तु, वाजपेयादिबहुदिनसाध्ययागमध्ये क्लेशाभावार्थं कात्यायनोक्तेः चारितार्थ्ये सूतिकादेर्दशत्रिदिनान्तकज्योतिष्टोमादियागारम्भो न स्यात् । यागसम्भारवैयर्थ्ये कालाभावे च स्यादिति विद्वत्सन्तोषेण व्यवहार्यम् । युग्मयोः स्त्रीपुंसोः युगपज्जन्मासम्भवात् स्त्रिया अग्रजातत्वे मासेन, पुत्रस्याग्रिमत्वे विंशतिरात्रैर्मातृशुद्धिः । सूतिमृत्योः पूर्वपूर्वप्राबल्यस्य वक्ष्यमाणत्वादिति गोपीनाथवाजपेयिनः । एतदन्ये न मन्यन्ते ।

'गुरुणा लघु शुद्ध्येत्तु लघुना नैव तद्गुरु ।' 43

इति वक्ष्यमाणत्वात् बहुदिनमासेन पूर्वपरविंशतेर्बाध इति । इदं तु बोध्यम्, गुरुणा लघु शुद्ध्येत,

'स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद् यदि ।
न पूर्वेण विशुद्धिः स्यादि'त्यादिवाक्यानां 44 सपिण्डाशौचप्रकरणे

43- पराशरमाधवे (3/28-29) सम्पूर्णं हारीतवचनं यथा—'शावान्तः शाव आयाते पूर्वाशौचेन शुध्यति । गुरुणा लघु शुध्येत्तु लघुना नैव तद्गुरु ॥ अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी ॥' इति ।

44- 'स्वकालेनैव शुद्ध्यति ।'-याज्ञ०मिता०(3/20) उशनोवचनेचतुर्थचरणपाठः

माणिक्यदेवादिभिरुपन्यासात् तत्परमेव वाच्यम्, न तूक्तरजस्कृतस्त्रीमास-विंशत्यशौचविषयमेव । पुंजनिकायाः शूद्रायाः एकविंशतिदिनाशौचस्य पूर्वपरेण गुरुणा सूतिकान्तराशौचेन बाधप्रसङ्गात् । न च स्त्रीसूतेः परसूतक-मृतकवैगुण्यप्राबल्यान्नायं दोष इति वाच्यम् । तस्यान्यत्रावकाशेनात्र गुरुणा लब्धिवस्य प्रवृत्तियोग्यत्वात् । वस्तुतस्तु, पूर्वपरदिनद्वये सूर्योदयात् पूर्वं परं कदाचिद् द्विदिनान्तरे पुंसः स्त्रियाश्च क्रमाज्जनने सूतिकाया मासात्परम् उक्त-गुरुवचनात्कर्माधिकारित्वकल्पने आचारविरोधः । अस्तु वा पुत्रस्य पुत्र्याश्च पौर्वापर्यसन्देहे एकादिवचनाद् द्वादशकपालन्यायान्मासपदाश्रयः 45 क्रमनिश्चये तु पूर्वाधीनं तत् । किञ्च पुत्रयोर्जन्मक्रमसन्देहस्थलेऽपि ।

'यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम् ।
सन्तानः पितरश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितम् ॥'

इति देवलात् सन्दिग्धयमलपुत्रद्वये विवाहयज्ञज्येष्ठांशादौ46 प्रथमदर्शनेन

45- काम्येष्टिकाण्डे श्रूयते, 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते । यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति । यन्नवकपाल त्रिवृतैवास्मिंस्तेजो दधाति । यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति । यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति । यद् द्वादशक-पालो जगत्यैवास्मिन्पशून्दधाति । यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवती'ति । अत्र द्वादश-कपाले अष्टाकपालादीनामंशत्वविचारः प्रकट्यते माधवाचार्येण जैमिनी-यन्यायमालायाम् (1/4/12)—'यद् द्वादशकपालेष्टौ वैश्वानर्या अनन्त-रम् । श्रुतमष्टाकपालादि तद् गुणो नाम वा स्तुतिः ॥ अन्तर्भावादष्टता-देर्नाम स्यादग्निहोत्रवत् । द्रव्यं द्रव्यान्तरे नोचेद् गुणस्तर्हि फले त्वसौ । वाक्यैक्यमुपसंहाराद् विस्पष्टं तत्तु बाध्यते । नानागुणविधौ तस्मादंशद्वा-रांशिसंस्तुतिः ॥' इति । तथैवात्र पुत्रकन्ययोर्युगपज्जननात् कन्याजन्म-जनिताशौचकालमासेन पुत्रजन्मनिमित्ताशौचस्य शुद्धिरिति ।

46- ज्येष्ठे सति कनिष्ठपुत्रस्य प्रोक्तव्यापारेषु अनधिकारित्वमुक्तं मनुना (3/171-172), यथा—दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ परिवित्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ तथा च 'ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।' (मनु०-9/112), 'एकाधिकं हरेज्ज्येष्ठः' (मनु०-9/117) इत्यादि ।

ज्येष्ठत्वनिर्वाहः, ज्येष्ठस्य प्रथमसार्थकत्वात्47 । अतो गोपीनाथोक्तं सम्यगित्यवदध्महे । इदञ्च मास्यैकविंशतिदिनाशौचं सपिण्डसूतिमृत्यन्तरशोधकम् । 'आर्तवाद् द्विगुणा सूतिरि'त्यादेर्वक्ष्यमाणत्वात् । न चैव तन्मासाशौचं सूतिकायाः मासान्तपातकं कादाचित्कस्य मृत्यशौचमपि बाधेतेति वाच्यम् । अष्टादशदिनादर्वागिति वहूपपत्तेः । इदञ्च रजस्वलाशौचे वक्ष्यते ।

कालादाशौचम् -

कौर्मे - 48 'अजातदन्तमरणे पित्रोरेकाहमिष्यते ।
दन्तजाते त्रिरात्रं स्यादितिशास्त्रविनिश्चयः ॥'

अजातदन्तश्चाजातो दन्तश्चेतिप्राप्तौ पुमान् स्त्रियेति नपुंसकमनपुंसकमिति वैकशेषादजातदन्तपुंस्त्रीनपुंसकानां मरणमित्यर्थः । एवं त्रिलिङ्गदन्तजातपदानां क्लीवैकशेपे एकत्वं वा । नपुंसकस्य तदानीमज्ञानेऽपि तन्निर्णयौचित्यात् ।

'यस्याप्सु प्लवते वीजं ह्लादि मूत्रञ्च फेनिलम् ।
पुमान्तु लक्षणैरेभिर्विपरीतैस्तु षण्ढकः ॥'49

इति स्मृत्या षण्ढत्वनिश्चयाच्च ।

'अप्रत्तासु च प्रत्तासु संस्कृतासंस्कृतास्वपि ।
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि ॥' शङ्खः)

एतेनाजातदन्तकन्यामृतौ सोदरवन्मातापित्रोरपि सद्यः शौचमिति शुद्धिगुच्छे प्रत्युक्तम् । पित्रोः प्राग्रदनादहः ।'आदन्ताद् हितुर्मृतावहरि'ति कालिदास50-वाजपेय्यादिविरोधाच्च ।

47- 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः । पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥' इति (मनु० 9/106) तथा च 'जन्मज्येष्ठेन चाह्वानं सुव्रह्मण्यास्वपि स्मृतम् । यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥' इति (मनु० 9/126) उक्तिरस्मिन् प्रसङ्गे पुरस्कृतैव ।

48- 'इति शास्त्रविनिश्चयः' स्थाने 'यदि स्यातां तु निर्गुणौ' इति कूर्मपु० (उत्त० 23/11) पाठः ।

49- नारदवचनमिति मिताक्षरा (याज्ञ० 1/55) । किन्तु मुद्रितनारदस्मृतौ (12/10) पाठो यथा -'रेतोऽस्योत्प्लवते नाप्सु ह्लादि मूत्रञ्च फेनिलम् । पुमान् स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः ॥' इति ।

50- सम्पूर्णं कालिदासवचनं यथा— 'आदन्ताद् हितुर्मृतावहरतः पित्रोः

शङ्खः— 'प्राङ्नामकरणात् सद्यः ।'

कौर्मे -51 'आदन्तजन्मनः सद्य आचौडादेकरात्रकम् ।
त्रिरात्रं चोपनयनात् सपिण्डानामुदाहृतम् ॥'

तथा— 'प्राक्संस्कारात्त्रिरात्रं स्यात्तस्मादूर्द्ध्वं दशाहकम् ।'52

संस्कार उपनयनम् । षण्मासो दन्तजन्मकालः ।

'प्रथमेऽब्दे तृतीये वा चूडाकार्या यथाकुलम् ।' इत्युक्तचूडाकालः ।53

'गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्'-(याज्ञ० 1/14)

त्युपनयनकालः ।

यद्यपि 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ।
अनाश्रमी व्यपेतश्च आश्रमश्च निरर्थकः ॥
मिथ्याश्रमी च सर्वतो निरयं याति मानवः ॥'

इति गोपीनाथधृतदक्षस्मृत्या गर्भाष्टमादनन्तरमुपनयने दिनमात्रविलम्बेऽपि दोषः स्यात् तथापि तत्काले गोचर54कालशुद्ध्याद्यभावो विलम्बाभावोऽन्यथा नेति तदाशयः । एतत्कालेषु दन्तचूडादीनामसत्त्वेऽप्युक्ताशौचमक्षतम् । कालस्यापि तदुपलक्षणत्वात् । कदाचिद्दन्तानामधस्तुर्यपञ्चममासेऽभूत्पादे चूडाकार्यस्याप्याचारादधस्कृतौ 'पञ्चमे ब्रह्मवर्चसकाम'55 इत्युपनयनेऽधः पञ्चमे सति तत्कालाद्यभावेऽपि तेषां साक्षाद्दर्शनादेव वै त्र्यहाद्यशौचमनुष्ठेयम् । तथा च जाबालिः—

सद्योद्‌र्ध्वं त्र्यहम्, भ्रातुश्चारदनात्क्षुरात्परिणयात्स्नानं तथाहस्त्र्यहम् । सद्यो ज्ञातिषु चाक्षुरादुपरि वा वाग्दानमेका निशा, वाग्दानोत्तयभान्तरोभयकुले तिस्रो न पित्र्ये परम् ॥ इति शुद्धिचन्द्रिका—श्लोकः-10 ।

51- 'आदन्तजननात्सद्य आचूडादेकरात्रकम् । त्रिरात्रमौपनयनात्सपिण्डानामशौचकम् ॥' इति (कूर्मपु० उत्त० 23/12) पाठः ।

52 मनुनाऽपि तथैवोक्तम् (5/67 ,यथा 'नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता । निर्वृत्तचूडकानान्तु त्रिरात्राच्छुद्धिरिष्यते ।' इति ।

53- 'चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः । प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ॥' (मनु०-2/35) । कर्त्तुरिच्छयाऽत्र विकल्पः ।

54- बृहस्पतेः यथार्थस्थानप्रकाशो गोचरमर्थापयति ।

55- 'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।' राज्ञो बलार्थिनः षष्ठे

'वृतचूडाद्विजानान्तु प्रतीतिषु यथाक्रमम् ।
दशाहत्रिदिनैकाहैः शुद्ध्यन्त्यपि हि निर्गुणाः ॥'

प्रतीतिरकालदर्शम् । वस्तुतस्तु,

'नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता ।
निर्वृत्तचूडकानान्तु त्रिरात्राच्छुद्धिरिष्यते ॥' इति मानवीये

(5/67) । 'कृतकृत्ये त्वसंस्कृते त्रिरात्रेणे'ति विष्णौ ।

'अहोरात्राद्भवेच्छुद्धिर्बाले त्वकृतचूडके ।' इति वृहच्छङ्खे च ।

एवं 'निर्वृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरेव च ।
अत ऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥
षड्वर्षान्तमतीतो यः शूद्रः संम्रियते यदि ।
मासिकन्तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥' 56

अत ऊर्द्ध्वं वर्षादूर्द्ध्वम् इत्यादौ षण्मासादूर्द्ध्वं तृतीयाब्दसमाप्तिपर्यन्तं साक्षाच्चूडाविरहे तत्र मृतौ चूडाकालत्वेऽप्येकरात्राशौचम् । न तु दन्तादिवत्काले लक्षणता निर्वृत्तकृतपदलिङ्गात् । अतएव,

'विप्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकी ।' 57

'दन्तजाते त्वकृतचूडेऽहोरात्रेण ।' इत्यङ्गिरो-विष्णुस्मृत्योः (22/[illegible] साम्यमानीयते । यत्तु,

'यद्यप्यकृतचूडो वै जातदन्तश्च संस्थितः ।
दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेत् ॥' इत्यङ्गिरःस्मरणं

वैश्यस्येहार्थिनोऽष्टमे ॥ इति मनुना (2/37) प्रसङ्गेऽस्मिन् कथितम् । अत्र 'वेदाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्चसं तत्कामस्य ब्राह्मणस्य गर्भपञ्चमे वर्षे उपनयनं कार्यम् ।…यद्यपि बालस्य कामना न सम्भवति तथापि तत्पितुरेव तद्गतफलकामना तस्मिन्नुपचर्यते ।' इति कुल्लूकः सुस्पष्टीकरोति ।

56- 'शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः ।' इति शुद्धिकौमुद्यां (P.-25) प्रथमश्लोकस्योत्तरार्द्धम् ।

57- शुद्धिकौमुद्यां (P. 24) सम्पूर्णमङ्गिरोवचनम्—'ऊनत्रिवर्षके विप्रे मृते शुद्धिस्तु नैशिकी । द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते तथा ॥' इति ।

तत्त्वकृतचूडस्य कदाचिद्दाहे सत्येव त्रिदिनाशौचमित्याकूतम्। एवमेव साम्याय 'ऊनद्विवर्षे प्रेते सपिण्डानां त्रिरात्रमि'ति वासिष्ठम् (4/34)।

'अनतीतद्विवर्षन्तु मृतं भूमौ निधापयेत्।
त्रिरात्रं बान्धवानाञ्च तस्याशौचं च सर्वशः ॥'

इत्यादिपुराणे निधापयेदिति दाहार्थकम्।

'अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते।
अशौचं ब्राह्मणानान्तु त्रिरात्रं तत्र विद्यते ॥
राज्ञामेकादशाहन्तु वैश्यानां द्वादशाहिकम्।
अपि विंशतिरात्रेण शूद्राणान्तु भवेत्क्रमात् ॥' (आदिपुराणम्)

इत्यादिवचनेषु58 'चूडाकरणात्प्राक् मृतौ मोहस्नेहादिना संस्कारोदकक्रिया-विकल्पः।' इति मरीचिस्मृतेर्न्यूनद्विवर्षाणामपि दाहस्य पाक्षिकत्वात्59। षड्वर्षान्तमिति शूद्रे मासाशौचाभिधानमूढशूद्राभिप्रायकम्।

'शूद्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु पञ्चभिः।
अत ऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥' इत्याङ्गिरसस्मृति-वैषम्यात्। ऊर्द्ध्वं षोडशवर्षं यावदिति शेषः। षोडशवर्षोत्तरमूढानूढशूद्रमृतौ पूर्णमासाशौचम्, गर्भाष्टमैकादशद्वादशादिवदिति शूद्राह्निककारः। अथवा चतुर्थवर्षादारभ्योपनयनात् प्राक् कृताकृतचूडस्य मृतौ त्रिरात्राशौचम्।

'अविशेषेण वर्णानामर्वाक्संस्कारकर्मणः।
त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्ना विधीयते ॥' इत्याङ्गिरसस्मृतेः। प्रागगर्भाष्टमाब्दाद् ब्राह्मणानां गर्भैकादशाद्राज्ञां च। तदेतच्छुद्धिगुच्छमतं सम्यगित्यस्माभिरनुसृतम्। विज्ञानेश्वर60-वाजपेय्यादयस्तु, 'दन्तजाते

58- 'अतिमोहाभिभूतैश्च देशधर्मेण मार्दवात्।' इति शुद्धिकौमुद्याम् (P.28) आदिपुराणवचने प्रथमश्लोकस्य द्वितीयार्द्धपाठः।

59- याज्ञवल्क्यस्मृति (3/1-2) व्याख्याने विज्ञानेश्वरो मनुते यथा – 'चौल-कर्मानन्तरकाले नियमेनाग्न्युदकदानं कार्यम्। अन्यत्रापि नामकरणा-दूर्ध्वम् अकृतचूडेऽपीच्छया प्रेताभ्युदयकामनया द्वयमग्न्युदकदानात्मकं तूष्णीं कार्यम्, न नियमेनेति विकल्पः।' मनुना (5/70) अपीदं पुरस्कृतम्, यथा—'नात्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया। जातद-न्तस्य वा कुर्युर्नाम्नि वापि कृते सति ॥' इति।

60- द्रष्टव्या याज्ञवल्क्यमिताक्षरा (3/23)।

त्वकृतचूडेऽहोराणेत्रे'ति विष्णुस्मृतेः (22/29) षण्मासाद् द्विवर्षसमाप्तिपर्यन्तं चूडाविरहे दिनैक्यमशौचम् , प्रथमाब्दस्य चूडाकालत्वेन दन्तकालवत्कृतचूडस्य त्र्यहाशौचप्रसक्तावपि उक्तविष्णुस्मृत्या तद्वारणात् । तेन तत्र कृतचूडस्यैव त्रिरात्राशौचं न तु कालमात्रवशादचूडस्यापि, त्रिवर्षे तु चूडाकालस्तदकृतचूडस्यापि मृतौ त्रिरात्रम् ,

यद्यप्यकृतचूडो वै जातदन्तश्च संस्थितः ।
दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेदि'त्याङ्गिरसादित्याहुः ।

यत्तु, 'बालानामजातदन्तानां त्रिरात्र च्छुद्धिः ।' इति मातापितृविषयं विज्ञानगिरिणोपन्यस्तं61 तद्देशकुलाचारवैकल्पिकम् । अस्मद्देशे त्वेकाह उक्तः ।

ऋष्यशृङ्गः—'यत्र त्रिरात्रं विप्राणामाशुचित्वं विधीयते ।
तत्र शूद्रे द्वादशाहः षण्नव क्षत्रवैश्ययोः ॥'
'गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके त्रिशामेके यथाकुलम् ॥' इति

योगीश्वरादिवचनात् (याज्ञ०-1/14) षण्नवमासानन्तरं षोडशाब्दात्रधिककृताकृतोपनयनविप्रमृतौ पूर्णदशाहाशौचं बोध्यम् । एवं क्षत्रवैश्ययोरेकादश-द्वादशाब्दानन्तरं द्वाविंशतिचतुर्विंशत्यब्दावधि पूर्णाशौचमुन्नेयम् । 62

ब्राह्मे— 'अनुपनीतो विप्रस्तु राजा चैवाधनुर्ग्रहात् ।
अगृहीतप्रतोदस्तु वैश्यः शूद्रस्त्ववस्त्रयुक् ॥
म्रियते यत्र तत्र स्यादशौचं त्र्यहमेव च ॥
द्विजन्मनामयं कालस्त्रयाणान्तु षडाब्दिकः । 63
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ॥' इति ।

61- 'यत्तु कश्यपवचनम्—'बालानामदन्तजातानां त्रिरात्रेण शुद्धिरि'ति, तन्मातापितृविषयम् , 'निरस्य तु पुमाञ्छुक्रमुपस्पर्शाद्विशुध्यति । बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम् ॥' इति जन्यजनकसम्बन्धोपाधिकतया त्रिरात्रस्मरणात् ।' इति (याज्ञ० मिता० 3/23) ।

62-चूडाकर्मानुष्ठानात्परं प्रागुपनयनान्मृतौ त्रिरात्रेण शुद्धिः । उपनयनेऽनुष्ठिते सम्पूर्णं दशरात्राशौचम् । गर्भषोडशादिनिर्दिष्टपरमावधिरूपकालाभ्यन्तरेऽनुपनीतेष्वपि ब्राह्मणक्षत्रियवैश्येषु मृतेषु तथैव दशरात्राशौचम् , तेषां तदर्थं प्राप्तकालत्वात् ।

63- अत्र त्रयाणां द्विजातीनां द्विवर्षोपरि षड्वर्षपर्यन्तं त्रिरात्राशौचाभिधानं

'स्वजात्युक्त'स्थाने 'दशरात्रमि'ति क्वचित्पाठः । स्वजात्युक्तं वैकल्पिक-दशाहरूपपूर्णाशौचमित्यर्थः । मासाशौचपक्षे तु शूद्रे दशाब्दादधस्ताद् द्वादशाहाः कथिताः । कन्याशौचे तु 'आदन्ताद् हितुर्मृ तावहरतः पित्रोः सदोर्द्ध्वं त्र्यहम्' इति शुद्धिचन्द्रिकायामुक्तम् ।

कौर्मे64— 'आदन्तात् सोदरे सद्य आचूडादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्याद्दशरात्रमतः परम् ॥' इति ।

सोदर इति त्रिलिङ्गानां सोदरपदानां क्लीवैकशेष एकवद्भावश्च । तेन 'भ्रातुश्चारदनादि'ति कालिदासपद्ये भगिन्या अग्रहानूढता । अन्यथा संस्कृत-सोदरभगिन्याः क्लीवभ्रातुश्च दुर्वचमशौचं स्यात् । न च तयोर्वक्ष्यमाणं सपिण्डाशौचं स्यादिति शङ्क्यम् । विनिगमनाविरहेण क्लीवभ्रातृभगिन्यो-रपि सोदरत्वेन ग्रहौचित्य त् । न चैव संस्कृतसोदरभगिन्या अपि तदशौचा-पत्तिः । 'स्वगोत्राद् भ्रश्यते नारी'त्यादिवक्ष्यमाणविशेषेण तस्या पितृगोत्र-वाधेन तदसम्भवात् । पितुश्च वचनबलेन संस्कृतसुतायां त्र्यहाशौचाच्च । दशरात्रमिति विवाहोत्तरं पतिकुले । सपिण्डानां त्वापस्तम्बः —

'अचूडायान्तु कन्यायां सद्यः शौचं मृतौ भवेत् ।
ततो वाग्दानपर्यन्तं यावदेकाहमेव तु ॥' इति । 65

तद्वेदाग्निसतां निरन्तरं सगुणानामेव न तु गुणहीनानां वेदाग्निकार्य-विहीनानाम् ।

64- 'दशरात्रं ततः परम्' इति मुद्रितकूर्मपुराणे (उत्त० 23/2) पाठः । ततः परमित्यनेन विवाहात् परं पतिकुले दशरात्राशौचमिति भावः । विवाहेन दत्तायाः कन्यायाः पितृमातृगृहे यदि प्रसवो मरणं वा भवेत् तदा भ्रात्रादीनामेकरात्रं मातृपित्रोस्त्रिरात्राशौचम् । याज्ञवल्क्येनापि 'आद-न्तजन्मनः सद्य आचूडान्नै शिकी स्मृता । त्रिरात्रमाव्रतादेशाद्दशरात्र-मतः परम् ॥' इति तथैवोक्तम् याज्ञ० 3/23) ।

65- चूडाकरणात्प्राक्कन्यामृतौ पितृकुले सद्यः शौचम् , वाग्दानात्प्राङ्मृतौ एकाहाशौचम् । वाग्दानात्परं विवाहात्प्राङ्मृतौ पितृपत्युभयकुले त्रिरात्रा-शौचम् । तदुक्तं मन्वर्थमुक्तावली (मनु० 5/72) धृतादिपुराणे— 'आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते । सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥ ततो वाग्दानपर्यन्तं यावदेकाहमेव हि । अतः परं प्रवृद्धानां

वाग्दानानन्तरं मरीचिः66—

'वारिपूर्वं प्रदत्ता तु या नैव प्रतिपादिता ।
असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतम् ॥'

प्रतिपादिता विवाहिता । वाग्दानविवाहयोर्मध्ये कन्यामृतौ पितृपत्योः कुले त्र्यहाशौचमित्यादि । हारीतः67

'स्वगोत्राद् भ्रश्यते नारी विवाहात् सप्तमे पदे ।
स्वामिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥'

मनुः— 'पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥' (मनु० 8/227)

मन्त्राः—'गृह्णामि ते सौभगत्वाय हस्तं मया पत्ये'व (पारस्करगृह्य-1/6/3) मादयः । सप्तपदी68 करणानन्तरं विवाहपूर्वमपि कन्यामृतौ वाग्दानवत् पितृपत्योः कुले त्र्यहाशौचमिति केचित् । अत्राचाराद्विवाहदिन एव वाग्दानम् । तत्सम्बन्धिकाले कदा मृतौ कुलद्वये त्रिदिनाशौचमिति शिष्टाः प्रष्टव्याः । यद्यपि शुद्धिगुच्छे,

---

त्रिरात्रमिति निश्चयः ॥ वाग्दाने च कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् । पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥ स्वजात्युक्तमशौचं स्यान्मृतके सूतकेऽपि च ॥' इति ।

66- 'अवारिपूर्वं प्रत्ता तु' इति पराशरमाधवे (3/17-18) धृतपाठः । सर्वकर्मारम्भे सङ्कल्पः कर्त्तव्यस्तथा च गदाधरपद्धतौ (P.P. 17-18) भविष्यवचनम् 'सङ्कल्पेन विना विप्र ! यत्किञ्चित्कुरुते नरः । फलञ्चाल्पाल्पिकं तस्य धर्मस्यार्द्धक्षयो भवेत् ॥' इति । तस्य च सङ्कल्पस्य 'गृहीत्वौदुम्बरं पात्रं वारिपूर्णं गुणान्वितम् । दर्भत्रयं साग्रमूलं फलपुष्पाक्षतान्वितमि'ति तत्रत्यवचनाज्जलधारणपूर्वकत्वात् विवाह-क्रियायामपि कन्यादात्रा जलदानपूर्वकं कन्यादानं क्रियते ।

67- याज्ञ०मिताक्षरा (1/254) धृतम् । यमस्मृतौ (श्लो० 78) अप्येवम् । चतुर्थीकर्मसमापनात्परमेतत् ज्ञातव्यम् , यतः 'संस्कृतासु स्त्रीषु नाशौच पितृपक्षे, तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रञ्च ।' इति विष्णुना (22/33-34) दर्शितम् ।

68- विवाहकर्मणि अश्मारोहणात्परं वरः कन्याम् 'एकमिषे द्वे ऊर्ज्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षड्ऋतुभ्यः सखे

'गर्भादष्टमवर्षे तु दशमे द्वादशे तथा ।
कन्यापरिणयः69 शस्त इति वात्स्यादिसम्मतमि'ति

वाक्यादुपनयनादिवद् गर्भाष्टमाब्दादौ विवाहकालेऽप्यनूढमृतौ पितृकुलेऽशौचाभावो महाप्रसादनियमादिना पत्यौ निर्णीते तत्कुल70 एव दशाहाशौचमिति लिखितं तथापि विवाहे कृत एव वरकुले दशाहाशौचं न तूपनयनादिवत्तत्कालेऽपि। अन्यथा शस्त इति स्वरसाद् गर्भाष्टमाब्दादधः काले ऊढायाः कदाचिन्मृतौ पतिकुले अशौचाभावः प्रसज्यते। 'वृतचूडाद्विजानां त्वि'ति वचनबला-

---

सप्तपदा भव सा मामनुवृता भव।' इति (पारस्करगृह्य०-1/8/1) मन्त्रेण 'विष्णुस्त्वा नयत्वि'तिमन्त्रभागं सर्वत्र संयोज्य उदीचीं सप्तपदानि प्रक्रामयति। एतत्सप्तपदीकरणं कथ्यते। तदनन्तर सूर्यदर्शनं यावत् आनुषङ्गिककार्यजातेन विवाहकर्म सम्पद्यते। सम्पादिते विवाहेऽपि 'न मिथुनमुपेयातां त्रिरात्रमन्ततः' इति पार० गृह्य०-1/8/21 वचनात् चतुर्थरात्रिं यावत्कन्या भर्तृपिण्डगोत्रादिकं नाप्नोति, 'विवाहे चैव संवृत्ते चतुर्थेऽहनि रात्रिषु। एकत्वं सा व्रजेद्भर्तुः पिण्डे गोत्रे च सूतके ॥' इति यमस्मृतौ (श्लोकः-86) उक्तत्वात्। वस्तुतस्तु, विवाहदिन एव तस्याः पत्नीत्वेन स्वीकरणात् मैथुनसम्पर्काभावेऽपि तत आरभ्य स्वामिकुलसम्बन्धिशौचाशौच तया पालनीयम् इति।

69- यद्यपि, 'अष्टवर्षा भवेद् गौरी नवमे रोहिणी भवेत्। दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता ॥' इति सम्वर्तवचनात् (पराशरमा०-P. 482) 'वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा। अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥' इति देवलवचनानुसार (पराशरमा०-P. 693) द्वादशवर्षे रजस्वलादोषशङ्का जायते तथापि। 'यावन्न लज्जिताङ्गानि कन्या पुरुषसन्निधौ। योन्यादीनि न गूहेत तावद्भवति कन्यका ॥' इति (पराशरमा०-P.482) पुराणवचनात् द्वादशवर्षवयस्यापि सःदोषः सर्वत्र न भवेत्, अधिकन्तु, यदि कदाचिद्विवाहात्पूर्वं विवाहकाले वा कन्या रजस्वला भवेत्तर्हि' विवाहे वितते यज्ञे संस्कारे च कृते तथा। रजस्वला भवेत्कन्या संस्कारस्तु कथं भवेत् ॥ स्नापयित्वा तदा कन्यामन्यैर्वस्त्रैरलंकृताम्। पुनर्मेध्याहुतिं हुत्वा शेषं कर्म समाचरेत् ॥' इत्यापस्तम्बस्मृतिवचनात् (7/9-10 विवाहव्यवस्थाऽस्त्येव।

70- अस्मदुत्कलेषु कन्यादानार्थं पत्यौ निर्णीते तत्कुलेन सह कन्याकुल महाप्रसादादिदानेन प्रथमतः निर्बन्धाख्यसम्बन्धं स्थापयतीति ।

दकालचूडादावेवाशौचं स्यात्तस्य त्वत्र तथाकरणे वाक्यानुपलम्भेन नक्षत्रदृष्टे-र्वाग्निस्पर्शन्यायस्यैव शरणीकरणीयत्वात् । अतएवेदं विज्ञानेश्वर-वाजपेय्या-दिभिर्नोक्तमिति शिष्टैर्नाचक्षते ।

'पक्षिणी संस्कृतास्वेव स्वस्रादिषु विधीयते ।'

इति हारीते तु नास्मद्देशाचारः । तथान्यत्र-'अपरिणीताया रजस्वलाया मृतौ पितुर्दशरात्रम् ।' पितुरिति मातुरुपलक्षणम् । इदं शूद्रपरम् । अपरिणीत-रजस्वलाया विप्रकन्यायाः—

'पाखण्ड्यनाश्रितास्तेना भर्तृघ्न्यः कामगादिकाः ।
सुराप्य आत्मघातिन्यो नाशौचोदकभाजनाः ॥'71

इति वक्ष्यमाणत्वेन सद्यः शौचात् ।

'यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः ।
स याति नरकं घोरमि'त्यादिबहुदोषात् । ब्राह्मे—
'पित्रा दत्ता72 च या नारी स्वतन्त्रा वाऽन्यमाश्रिता ।
यं यं श्रितवती भूयस्तस्याशौचं भवेत्त्र्यहम् ॥
मृतायां वा प्रसूतायां नान्येषामिति निश्चयः ॥'

दत्ता नियमेन वाग्दत्ता ।

'पदे च सप्तमे काचिद्बलाद्यदि धृता भवेत् ।
स्वामिगोत्रं भवेत्तस्यास्तच्च भूयो भविष्यति ॥
पैतृकं त्वप्रसूतायां, ततः पौर्विकभर्तृकम् ।
कामादक्षतयोनिश्चेदन्ये गत्वा व्यवस्थिता ।
तस्यामन्यच्च गोत्रं स्याद्या त्वाश्रितवती स्वयम् ॥'

71- याज्ञवल्क्य०— 3/6 । श्रुतिबाह्यलिङ्गधारणेनेयं पाखण्डी । तस्या उदकदानं निषिद्धम् । मनुनाऽपि समधिकमुक्तं (4/30)-'पाषण्डिनो विकर्मस्थान्वैडालव्रतिकाञ्छठान् । हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेदि'ति । रजस्वलावस्थापूर्वं निर्दिष्टे वयसि विवाहार्थं नियमे सत्यपि अकृतगृहस्थाश्रमपरिग्रहा अनाश्रिता, तस्मात्तस्याः सद्यः शौचम् । आदिग्रहणादत्र स्वगर्भब्राह्मणघातिन्यो गृह्यन्ते ।

72- कन्यादाने पितुः प्रथमाधिकारः सूच्यते याज्ञवल्क्येन (1/63) —'पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥' इति ।

यं यमिति पूर्वपरप्रत्ययवशेन तस्य तस्येति वीप्साश्रयणादन्याश्रितपत्युस्त्र्यहाशौचमिति भावः ।

'अन्यौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते ॥' (शङ्खः-15/13)

इति शङ्खीयस्याप्ययं भावः। क्वचिदन्यौरसे दशाहाचारश्च। हारीतः—

'परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।
मातामहे त्रिरात्रं स्यादेकाहस्तु सपिण्डतः ॥'

ऊढाया अक्षतयोनेर्नान्यभोगवशात् परपतिगोत्रे अशौचम्। क्षतयोनेस्तस्यास्तु पूर्वपतिगोत्रे तदित्याशयः। पैतृकमिति सप्तमे कामादन्याश्रिताविषयकम्। यद्यपि पित्रा दत्तेत्यादि सपिण्डतः क्रियान्तं ब्राह्मणेषु नातीवोपयुज्यते तथापि शूद्रे किञ्चिदपेक्षितमिति शास्त्रदर्शनं न्याय्यम्। मरीचिः—

'मृतसूते तु दासानां दासीनाञ्च तथैव च ।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि तु स्वकम् ॥'

मृत इति त्यागोपलक्षणम्। सर्वमिदं चतुर्वर्णतुल्यम्। माणिक्यदेवेन गर्भदासादिभेदेना73शौचभेदलिखितेऽपि इदानीमनाचाराद्विस्तराच्च इत्यलम्। व्याघ्रपादः—

तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च ।
उपनीते तु विषमं तस्मिन्नेवातिकालजम् ॥

वयसि चतुर्थपञ्चममासादौ यदुक्त'मादन्तजन्मनः सद्य'इति तच्चतुर्वर्णतुल्यम्। एवं दशाहातिक्रमे एव त्रिरात्राद्यशौचं पारम्परिकं समानोदकाशौचम्। एव'मतिकालजम्' 'अन्तरा जन्ममरणे' (याज्ञ० 3/20) 'प्रोषिते कालशेषः स्यादि' (याज्ञ०-3/21)ति शेषकालाशौचमनुपनीते चतुर्वर्णानां समम्। उपनीते तु दशद्वादशपञ्चदशदिनमासादिवशाच्च विषममिति तात्पर्यार्थः। उपनीतपदस्य विवाहोपलक्षणत्वाच्छूद्रे मासग्रहश्च।

'पुत्रिकायाश्च दत्तायाः प्रसवे मरणे तथा ।
पित्रोश्च दशरात्रं स्यादेकाहस्तु सपिण्डानाम् ॥'

73- नारदेन (5/26-28) पञ्चदशविधा दासाः प्रदर्शिताः, यथा-'गृहे जातस्तथा क्रीतो लब्धो दायादुपागतः अन्नाकालभृतो लोके आहितः स्वामिना च यः॥ मोक्षितो महतश्चर्णात् प्राप्तो युद्धात्पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः॥' इति।

इत्यादिकं तु न सद्भिश्चर्यते । यद्यपि 'अप्रदत्तानां कन्यानां त्रिपुरुषं विज्ञायत' इति वसिष्ठेनोक्तं74 तथापि 'अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम् ।' इति विकल्पादस्मद्देशे सप्तपुरुषस्यापि सापिण्ड्याचारः ।

अथैकजातीयाशौचद्वयविचारः—

'प्रतिप्रधानं निमित्तमावर्त्तते' इति न्यायात् सम्पूर्वाशौचवत् पराशौचानामपि पुनर्दशाहादिप्राप्तौ तत्रापवादमाह हारीतः—

'मरणं मरणे चैव सूतकं सूतके तथा ।
उभयोरपि यत्पूर्वं तेनाशौचेन शुद्ध्यति ॥'

उभयोः सूत्योर्मृत्योश्च । कौर्मे75—

'यदि स्यात् सूतके सूतिर्मृतके वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् ।
मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ॥'

शातातपः—'रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात् ।' 76

74- स्मृतीनां समुच्चयान्तर्गतवसिष्ठस्मृतौ (4/18)—'अप्रत्तातां स्त्रीणां त्रिपुरुषं त्रिदिन विज्ञायते ।' किन्तु भण्डारकरसंस्थाप्रकाशिते ग्रन्थे तत्र 'प्रत्तानाञ्च स्त्रीणां त्रिपुरुषं विज्ञायते ।'इति यः पाठो न स समीचीनः ।

75- कूर्मपुराणे (उत्त०-23/18-19) 'मृतके' स्थाने 'मरणे' , 'द्विरात्रकम्' स्थाने 'त्रिरात्रकम्' 'गरीयो मरणं भवेत्' स्थाने 'मरणेन समाप्यते' तथा अन्तिमे 'अघवृद्धिमदाशौचं तदा पूर्वेण शुध्यति ।' इति पाठः ।

76- निर्णयसिन्धु (पृ. 380) धृतम् । प्रसङ्गेऽस्मिन् ग्रन्थकारः कमलाकरः 'क्वचित्पूर्वशेषेण शुद्धेः 'रात्रिशेषे[सति] द्वाभ्याम् (2/5/6), 'प्रभाते तिसृभिः (2/5/7)' इति गौतमवचनादपवादमुपन्यस्य प्रभाते अन्त्ययामे इति यन्मनुते तत्सुरुचिरमेव । विज्ञानेश्वरेणापि (याज्ञ०-3/20) प्रभाते पुनस्तस्या रात्रेः पश्चिमे यामे जननाद्याशौचान्तरसन्निपाते सति तिसृभिः रात्रिभिः शुद्धिः, न पुनस्तच्छेषमात्रेण ।' इति तथैवोक्तत्वात् । प्रभातपदेनात्र परदिनसूर्योदयानन्तरसङ्गवकालकल्पने हरदत्तस्य विचारोऽसमीचीनः, गौतमाभिप्रायस्यान्यार्थप्रतिपादकत्वात् शातातपवचनेन सह गौतमवचनस्य विरोधत्वाच्च । मित्रमिश्रश्च (तत्रैव) 'प्राचीप्रकाशकाले सूर्योदयात्प्राक् तादृशाशौचान्तरपाते सूर्योदयानन्तरत्रिरारेण शुद्धिरि'ति प्रतिपाद्य 'इदन्तु सम्पूर्णाशौचपरम्' इत्युक्तवान् यत्तत् समुचितम् ।

इयं द्वित्रिदिनवृद्धिः 'न वर्द्धयेदघाहानि' इति मनुना 77 निषेधितात् विकल्पिता सत्यस्मद्देशे नाचर्यत इति सिंहवाजपेयिनः ।

'शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी ।' (षट्त्रिंशन्मतम्) न सूतिरितिपादस्य न गुरुसूतिरपि लघुमृतेः शोधिकेति ज्ञापनार्थकत्वान्न पौनरुक्त्यम् ।

'सूतके मृतकश्चैव मृतके सूतकं तथा ।
उभयोः प्रबला मृत्युः ···॥' इति ।

देवलः— 'मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ।'

इति साध्वनुसन्धाने पूर्वपरमृतिः सूतिशोधिनी । एवं लघ्वपि मृतिर्गुरुसूतेर्बाधिका, मृतिमात्रस्य सूतिमात्राद् बलीयस्त्वसूचनात् । 'गुरुणा लघु शुद्ध्यते'ति-वक्ष्यमाणं तु सूत्योर्मृत्योश्च सावकाशम् । एतत् सर्वमभिप्रेत्य' दीर्घाल्पापि पराऽपरापि सततं सूतेर्मृतिः शोधिके'ति 78 कालिदासोऽप्युक्तवान् ।

वृद्धात्रिः— 'सूतकाद् द्विगुणं शावं शावाद् द्विगुणमार्तवम् ।
आर्तवाद् द्विगुणा सूतिस्ततोऽपि शवदाहकः ॥' 79

शवदाहकः क्रियाकर्त्ता । स्मृतिः -
'शेषाहोभिर्विशुद्ध्येत उदक्यां सूतिकां विना ।'

77- 'अहरहः सन्ध्यामुपासीत ।' इति वचनात् सन्ध्याया नित्यत्वे कर्त्तव्यता सूचिता । तस्यास्तु 'सन्ध्या पञ्च महायज्ञा' इति पूर्वोक्तजाबालवचनादशौचमध्ये हानिरेव । अतो 'न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रिया ।' इति मनुना (5/84) अशौचदिनवृद्धिर्निषिद्धा । वस्तुतोऽशौचमध्येऽशौचान्तरपाते सङ्कुचिताशौचदिनेष्वपि दशाहादिरूपेणाशौचदिनानि न वर्धयेत् । अत्यन्ताशौचपालनावस्थायां सन्ध्यादिकर्मणां व्याघातो निर्दिष्टद्वित्र्यादिदिनानि यावद्भवितुं शक्यते ।

78- सम्पूर्णं कालिदासवचनं (शुद्धिचन्द्रिका-श्लोकः 16) यथा—'सर्वाशौचविशोधकं गुरुतरं पित्रोरशौचं ध्रुवम्, पूर्वं वा परतोऽथ चैत्रमनयोर्मातुः पिता शोधकः । दीर्घाल्पापि परापराऽपि सततं सूतेर्मृतिः शोधिका, द्वैधं दीर्घमपीत्थमल्पसदृशो हित्वाग्निदं सूतिकाम् ॥'इति । मृतकाशौचस्य सर्वथा प्राबल्यम् । तत्रापि पितृमृत्यशौचं प्रबलम् । विशेषतः शवमुखाग्निदातृप्रसवकारिण्यो निर्धारितदिवसपर्यन्तमशौचं भवेदिति भावः ।

79- सूतकाशौचात् शावाशौचं प्रबलम्, 'गरीयो मरणं भवेदि'ति देवलवचनात् ।

शेषाहेभिः पूर्वपरसूतिमृतिशेषदिनैः । एतेन तदधिक्रियाकर्त्तुः सुतरां तदभावः । इदमत्र विचार्यते । द्विगुणमिति बाधकार्थम् । बाधश्च द्विविधः, पुंस्त्वरूपो बाधकोत्तरक्षणयोगरूपश्चेति । प्रमाणवशादुभयं शाब्दिकैराचर्यते । आद्यं यथा—गौर्य्यामित्यत्र गौर्यामीति परत्वादाटानुटे बाधे सवर्णदीर्घादावुत्तरमपि न नुट्, "विप्रतिषेधे यद् बाधितं तद् बाधितमेवे'ति 80 न्यायात् । तस्य पुंस्त्वाच्च । द्वितीयं यथा भिन्धकीत्यादौ परत्वाद् ध्यादेशेन बाधितोऽप्यकच् धिभावानन्तरं प्रवर्त्तते,'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति न्यायात् 81 । अत्र स्मृतिशास्त्रेषु कृतध्वंसरूप एव बाधो न पुनरुत्पादकः अन्यथा मृत्या

शावाशौचाद्रजस्वलाशौचं प्रबलम् , 'साध्वाचारा न तावत्से'तिवक्ष्यमाणवचनात् । रजस्वलाशौचात् सूतिकाया अशौचं प्रबलम् , सूतकं मातुरेव स्यात्' (पराशर० - 3/26), (मनु० - 5/62) 'मातुः शुद्धिर्दशाहेन' इत्यादिवचनात् । सूतिकाशौचात् शवदाहप्रेतपिण्डदानादिकर्त्तुरशौचं प्रबलम् , 'प्रथमेऽहनि यो दद्यादि'तिवचनात् , तथा 'प्रेतस्य च सुतानपि' इति नि० सि० P-382 वचनादिति ज्ञातव्यम् ।

80· गौरी ङि इति स्थिते ङेराम्नद्याम्नीभ्यः' (पाणिनि० 7/3/116) इत्यनेन आमादेशे 'आण्नद्याः' (7/3/112) इत्यनेन आडागमे प्राप्ते तथा च 'ह्रस्वनद्यापो नुट्' (7/1/54) इत्यनेन नुडागमे प्राप्ते तुल्यबलविरोधत्वात् 'विप्रतिषेधे परं कार्यम्' (1/4/2) इत्यनेन परत्वात् आटा नुटे बाधे आडागमे 'आटश्च' (6/1/90) इत्यनेन वृद्धौ 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे 'ह्रस्वनद्यापो नुट्' इत्यनेन पुनः नुडागमे प्राप्ते 'सकृद् गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'इति (परिभाषा 41) बलेन तन्निवृत्तौ 'इको यणचि' इत्यनेन यणादेशे सर्वसंयोगे गौर्य्यामिति सिद्धम् ।

81- भिन्धीत्यत्र 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इत्यनेन टेः प्राक् 'अकच्'-प्रत्यये 'भिन्ध् अकच् इ' इति जाते 'हुझलेभ्यो हेर्धिः' इत्यनेन सूत्रेण परत्वात् ध्यादेशे सकृद् गतिन्यायेन 'अकच्' प्रत्ययस्य पुनरवकाशो नास्ति । परन्तु 'पुनः प्रसङ्गविज्ञानात्सिद्धमिति (परिभाषा-40) बलेन अकच्प्रत्ययो ध्यादेशेन बाधितोऽपि पुनस्तस्य प्रयोगे भिन्धकीतिरूपं सिद्ध्यति ।

सूतिबाधवैयर्थ्यम् । न च बाधफलं सूत्या यावद्दिनं, मृतकयोस्तत्र मत्स्यमांसा-नशना82 द्यशौचभाव इति वाच्यम् । तथा सति सूतिमृतियोगे सूतेर्मृतिकार्यं बलीय इत्येतावतैव सामञ्जस्ये साकल्येन सूतिबाधासङ्गतेः । एवम् उदक्याया-श्चतुर्थदिने रजःशुद्धिस्नाने 83 बाधितयोः प्राक्तन्योः सूतिमृत्योर्न पुनः पञ्चमादावुत्पत्तिः । एवं क्रियाकर्त्तुः । परन्तु क्रियाशौचात् पित्रोरशौचं बलीयः प्रतीयते,

'सर्वाशौचविशोधकं गुरुतमं पित्रोरशौचं भुवसि'ति प्रवादात् ।

एवं सूतिकाया सासैकत्रिंशतिदिनानन्तरं न प्राक्तनसूतिमृत्यशौचम् । एवमाद्यादिति ।

देवलः— 'परतः परतोऽशुद्धिरघवृद्धौ विधीयते ।
स्याच्चेत्पञ्चतमादह्नः पूर्वेणाप्यनुशिष्यते ॥'

अघवृद्धिर्यथा पितुः स्वशुक्रजन्यत्वेन दुहितृजन्माद्यशौचं सपिण्डाशौचाघवृद्धि-मत् एवं दुहित्रपेक्षया पितुः पुत्रजन्म प्रबलम् ,

'पुमान् पुंसोऽधिके शुक्रे....।' इति वचनात् । 84

82- मृतके मत्स्यमांसाद्यशनाभावो मनुना (5/73) दर्शितः, यथा—'अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् । मांसाशनञ्च नाश्नीयुः शयीरंश्च पृथक्क्षितौ ॥' इति ।

83- 'त्रिरात्रं रजस्वलाशुचिर्भवति ।' इति वसिष्ठेन (5/6) साधारणेन त्रिरात्रे गते रजस्वलायाः शुद्धिरुक्ता । किन्तु चतुर्थदिवसे रजस्वलास्नानं भर्त्तृकृते नान्योद्देश्येन, यथा शङ्खस्मृतौ (16/17) 'शुद्धा भर्तुश्चतु-र्थेऽह्नि स्नानेन स्त्री रजस्वला । दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ॥' इति । चतुर्थेऽह्नीति रजोनिवृत्तिकालोपलक्षणार्थम् 'साध्वाचारा न तावत्सा रजो यावत्प्रवर्त्तते । वृत्ते रजसि साध्वी स्याद् गृहकर्मणि चेन्द्रिये ॥ प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति ॥' इत्यापस्तम्बेनो (7/3-4) क्तत्वात् ।

84- पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः इति मनोः (3-49) सम्पूर्णवचनम् । अधि-कपदेनात्र सन्तानजन्मक्षमशुक्राणूनां ग्रहणम् ।'

मातुश्च पुत्रजन्मतो दुहितृजन्म अधिकम् , स्वशोणिताधिक्यात् । एवं पत्न्याः पतिमृतिर्मृत्यन्तरादधिका, 'पतिरेव गुरुः स्त्रीणामि'ति85 वचनात् । मृत्यादिकं प्रबलाशौचं पूर्वदिनपञ्चके चेत्पतेत्तदा पूर्वेण शुद्धिः, अपरदिनपञ्चके चेत्तदाऽपि पूर्वाशौचेन शुद्धिरित्याशयः । इदमपि 'न वर्धयेदघाहानी'ति मनुना निषेधिताद्विकल्पितं विना पितृपक्षाशौचसम्मदंशे नाचरितम् । एवमन्तरज्ञादशौचमपीति ज्ञेयम् ।

उशनाः— 'स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद् यदि ।
न पूर्वेण विशुद्धिः स्यात् स्वकालेनैव शुद्ध्यति ॥'

इदं वचनं चतुर्वर्णानां दशाहादिसूतिमृत्यशौचप्रकरणपाठात् तत्परम् । तेन पित्रोर्वार्षिकाशौचेन न पुत्रस्य दशाहादिसपिण्डमृत्यशौचसङ्कोचः । अतएव स्त्रीपुंजननयोः पुंसोऽप्रजातत्वेन विंशतिदिनैः स्त्रियाः शुद्धिरिति गोपिनाथोक्तं प्राक् साधु स्वीकृतमस्माभिः । इदं स्वल्पदीर्घत्वं शास्त्रीयस्वरूपमेव विवक्षितम् , आकाङ्क्षादिवत्86 , न तु दृश्यमानं दीर्घाल्पकालं तु पर्णदाहेन त्रिदिनाशौचप्राप्ते व्यर्थमिदं वचनमिति वाच्यम् । तस्याः प्रेतक्रियानन्तरं

85- 'पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ।' इति (नि० सि० P. 369) शातातपवचनम् । मनुनाऽपि (5/154-155) 'विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः । उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥' इति उक्तम् ।

86- 'सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रतानि यमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः ॥' इति मनुना (2/3) प्रत्येकस्मिन् कर्मणि सङ्कल्पस्य सुस्थितिः प्रदर्शिता । स च सङ्कल्प आकाङ्क्षाव्यतिरेकेण न सिध्यति । तस्याश्च आकाङ्क्षाया विशद्विचारो मीमांसाशास्त्रे भावनामाधारीकृत्य विहितः । भवितुर्भवनानुकूला भावकस्य व्यापारविशेषा या भावना सा शाब्दी आर्थी चेति द्विविधा । प्रत्येका च सा भावना साध्यसाधनेतिकर्त्तव्यतेत्यंशत्रयविशिष्टा । साध्यं नाम किं भावयेत् , साधनं नाम केन भावयेत् , इति कर्त्तव्यता नाम कथं भावयेदिति च । चोदनासत्त्वे भावनाऽभावे नैराकाङ्क्षाद्वा किमपि कर्म यथा न सम्भवति तथाऽत्र स्वल्पाशौचं दीर्घाशौचं वा किमपि शुद्धिफलाकाङ्क्षाऽभावात् यथारीति पालितं न स्यादिति ।

श्रवणे विधित्वावकाशात् । एकपुत्रस्याकृतक्रियस्य गयापर्णदाहवाक्यकल्ला-द्यत्वकल्पनात् । दशाहमध्ये तु पर्णदाहन्यायादीर्घेण दशाहाशौचेन त्रिदिनवाध औत्सर्गिकदशाहस्य दुर्वारत्वात् । एतेन सम्वत्सरात्पूर्वं तन्मृतिश्रुतौ पुत्रस्य दशाहाशौचमिति वाजपेयिमतं परास्तम् । अन्यथार्थात्तन्मृतिदशाहानामपि सम्वत्सरात् पूर्वत्वेन तन्मतेऽपि नियतदशाहापत्तिः । इदञ्च दीर्घेणापि मृत्यन्तरेण न बाध्यम्, 'व्यतीते त्वि'ति पितृवद् गुरुत्वलिङ्गात् । अतएव तुल्यपूर्वमृत्यापि न निवार्य्यम् । तेनापि कृतक्रिययोः पित्रोः मृतिश्रुतौ विशेषः स्यात् । देवलः—87

अशौचाहव्यतीते तु बन्धुश्चेच्छ्रूयते मृतः ।
न तत्त्रिरात्रमाशुच्यं भवेत् सम्वत्सरादनु ॥
ऊर्द्ध्वं सम्वत्सरादर्वाक् श्रुयते चेन्मृतः सुतः ।
भवेदेकाहमेवात्र तच्च सन्यासिनां न तु ॥

अत्राशौचाहपदं प्रेताम्बुपिण्डक्रियोपलक्षणम्,अन्यथा 'पितरौ चेन्मृतावि'88त्य-नेनास्य विकल्पे कृते त्वन्यकुताभ्यासाद्यष्टदोषापत्तिः । तत्तु पितराविति दशाहवाक्यमकृतक्रियविषयकम् । अशौचाह इति त्रिदिनवाक्यं कृतक्रियपरमिति व्यवस्था युज्यते । बाधविकल्पव्यवस्थासमुच्चयानामुत्तरोत्तरस्य बलीयस्त्वात् । बन्धु-पदं प्रकरणात् पितृमात्रार्थकम् । अनु अधः । न त्वित्यातुरसन्यासवतां पितृणां कृतक्रियाणां मृतिश्रुतौ पुत्रस्य सद्यः शौचमित्यर्थः । एतेन पितरौ चेन्मृतावित्यकृतक्रियवाक्येऽपि सन्यासिपितृमृतिश्रुतौ सद्यः शौचमुक्तप्रायम् । यद्यपीदं देवलवचनं विज्ञानेश्वर-वाजपेय्यादिभिर्नोक्तं तथाप्यभियुक्तैर्लिखनात् साधु पालनीयम् ।

'देशान्तरमृतं श्रुत्वा क्लीबे वैखानसे यतौ ।
मृते स्नानेन शुद्ध्यन्ति गर्भस्रावे च गोत्रिणः ॥' इति ।

87- शुद्धिकौमुद्यां (P. 35) देवलवचनं यथा—'अघाहःसु व्यतीतेषु ज्ञातिश्चे-च्छ्रूयते मृतः । तत्र त्रिरात्रमाशुच्यं भवेत्सम्वत्सरान्तरे ॥ ऊर्द्ध्वं सम्वत्सरादाद्याद् बन्धुश्चेच्छ्रूयते मृतः । भवेदेकाहमेवात्र तच्च संन्या-सिनां न तु ॥ बन्धुर्माता पिता चैव स्त्रीणाञ्च पतिरेव च ॥' इति ।

88- 'पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥' इति (याज्ञ० मिता०-3/21) पैठीनसिवचनम् ।

देशान्तरमाह बृहस्पतिः 89 –

'देशान्तरं वदन्त्येके षष्टियोजन90मायतम् ।
चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च ॥'

केचित्तु 'अशौचाहव्यतीते' इति वाक्ये बन्धुपदेन मातृपितृवन्मातृसपत्नीनामपि स्वगृहकृतक्रियमातृसपत्न्या वर्षमध्ये मृतिश्रुतौ पुत्रस्य त्रिरात्राशौचम्, वर्षादूर्द्ध्वं त्वेकाहः, अकृतक्रियायास्तस्या वर्षमध्ये दशाहानन्तरं मृतिश्रुतौ पुत्रस्य दशरात्राशौचम्,

'श्रुताहात् प्रेतकृत्यन्तु आत्रिपक्षं समाचरेत् ।'

इति वाक्येऽप्यकृतदशाहसूचकत्वात्, एतद्वाक्यस्य वर्षान्तावधिपरत्वाच्च वर्षादूर्द्ध्वंन्तु 'सम्वत्सरे व्यतीते त्वि'ति त्रिरात्राशौचमाहुः । वस्तुतस्तु, अकृतक्रियापक्षे दशाहादूर्द्ध्वं पर्णदाहवाक्येन त्रिरात्राशौचस्य प्राप्तत्वात् । 'श्रुताहात् प्रेतकृत्यन्ति'त्यत्र दशाहानामस्फुटत्वाच्च सङ्गतमिदम् । किञ्च कृतक्रियापक्षे कनिष्ठमातुः पित्रोस्तुल्याशौचमुक्तम् ? एवं सत्यकृतक्रियापक्षेऽपि तत्साम्यमपनीयताम् । सम्वत्सरे व्यतीते त्वेतावान् वा भेदोऽस्तु, इष्टापत्तौ स्वमात्रशौचेन तच्चानापत्तिः । अत एव मासाशौचपक्षे शूद्राणां न स मासाशौचप्रसङ्गः । तन्मते तु 'श्रुताहात् प्रेतकृत्यंति'त्यत्र दशाहवन्मासाशौचस्यापि स्फुरणेन तत्प्राप्तावकाशत्वात् । तस्माद् बन्धुपदेन मातृपितृग्रहेऽपि तत्सामान्येन कनिष्ठमातृग्रहे मानाभावादयुक्तत्वात् 'पितृपत्न्यामि'ति वाजपेय्यादिवाक्यविरोधाच्च कनिष्ठमातुरग्रहः । किन्तु तैरवकाशात् पित्रोरेवेति निष्कर्षः । अङ्गिरोयमौ –

'द्विसन्ध्यं सद्य इत्याहुस्त्रिसन्ध्यमहरुच्यते ।
एका रात्रिर्दिने द्वे च पक्षिणीत्यभिधीयते ॥'

89- याज्ञ० मिता०(3/21) । तत्राधिकं बृहस्पतिवचनं यथा-'महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः । वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥इति । नदीलक्षणं यथा –'धनुःसहस्राणि ह्यष्टौ गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥' इति ।

90- योजनलक्षणं यथा पराशरमाधवे (3/10)—'तिर्यग्यवोदराण्यष्टौ पूर्ध्वा वा व्रीहयस्त्रयः । प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलम् ॥ वितस्तेर्द्विगुणोऽरत्निस्तस्मात् किष्कुस्ततो धनुः । धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशन्तु योजनम् ॥' इति ।

एवं स्थितेऽपि कैश्चित् सह इति तत्कालत्वेन व्यवह्रियते । यद्यपि त्रिसन्ध्यमित्युक्ते प्रदोषादारभ्यागामिदिनमध्यन्दिनसमाप्तिपर्यन्तं दिनत्वमित्यपि स्फुरति तथा नासावाचारग्रस्तः । तस्मादहस्त्वदत्तकन्यास्वि'91त्यादावहःपदं केवलं दिवाबोधकम्, लक्षणया दिवारात्र्यन्यतरबोधकमित्युपवासलक्षणे वक्ष्यामः । एवं रात्रावशौचपाते रात्रियुक्तदिनद्वयस्य तत्स्थले पक्षिणीत्वं कल्पनीयम्, अधिकं प्रविष्टं न तु तद्धानिरिति न्यायात् । अथवा तत्स्थले रात्रिद्वयसहितमध्यन्दिनस्यैव पक्षिणीत्वम्, दिवारात्र्यन्यतरस्यैव पक्षिणीपदवाच्यत्वादित्यपि स्फुटमुपवासलक्षणे ।

अथासपिण्डानाम्92 अशौचम्—

बृहस्पतिः—

'दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥'

सकुल्याः सप्तमोर्द्ध्वजाः, गोत्रजाश्च चतुर्दशोर्द्ध्वजाः ।

'बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य सद्य एव विशुद्ध्यति ॥' 93

91- 'अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् । गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥' इति याज्ञवल्क्येन (3/24) उक्तम् । अत्राहःपदेनाहोरात्रग्रहणं समीचीनमाचार्यपुत्रपत्न्यादीनां कृतेऽपि यथा मनु (5/80) मतानुसारमहोरात्रग्रहणम्, विज्ञानेश्वरमित्रमिश्राभ्यामपि अहोरात्रस्योक्तत्वाच्च । परत्र मनुनाऽपि (5/8.) मातुलादीनां कृते कृतं पक्षिण्यभिधानं यथेष्टमेव ।

92- अत्र असपिण्डपदेन सपिण्डसम्पर्कितपुरुषाणां सकुल्यानां ग्रहणमाक्षिप्यते अन्यथा 'सपिण्डान् पितृबन्धूंश्च' इतिवचनात् पितृबन्धु-शब्दो निरर्थकः स्यात् ।

93- मनुः-5/78 । बालपदेनात्राकृतचूडग्रहणं समीचीनम् अन्यथा 'प्राक्संस्कारात् त्रिरात्रं स्यादि'ति वचनं व्यर्थं स्यात् । कुल्लूकभट्टोऽपि 'बालेऽजातदन्ते मृते जातदन्ते वा 'नृणामकृतचूडानाम्' मनु०-5/67) इत्येकाहोरात्राभिधानाद्देशान्तरस्थे च सपिण्डे मृत इत्येकाहाशौचविषयम् ।' इत्यत्राह । गौतमेनापि (2/5/42) 'बालदेशान्तरितप्रव्रजितासपिण्डानां सद्यः शौचम् ।' इति प्रव्रजितेन सह बालाशौचाभिधानात् बालोऽकृतचूडो दर्शितः ।

इति मानवीयव्यवस्थयाऽनुपनीतपरत्वमुपनयनात् प्राक् सपिण्डबोधकत्वम् । पृथक्पिण्डेऽसपिण्डे । सद्यः शौचवाक्येपूक्तावनुक्तौ च स्नानमावश्यकम् । केचित्तु 'एकाहस्तु सपिण्डत' इति हारीतवचनमनुपनीतपरमाचक्षते ।

सुमन्तुः—

'शौचाशौचं त्रिरात्रं स्यान्महागुरुनिपातने ।
दुहितॄणां च विन्नानां सर्ववर्णेष्वयं विधिः ॥'

गुरुः पिता, पितामहः महागुरुः, विन्ना परिणीता । त्रिरात्रमिति आदौ रात्रिस्ततोऽहोरात्रद्वयमित्येतावताऽपि सिद्ध्यति । प्रायशोऽहोरात्रत्रयबोधकं तत् । पित्रोस्तु दशाहादूर्द्ध्वमूढानूढदुहितृमृतौ त्रिरात्रमिति प्राग्वादिषु । अङ्गिराः—

'संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते ।
संस्कृते तु त्रिरात्रं स्यादेषधर्मो व्यवस्थितः ॥'

असंस्कृते सद्यः शौचमिति शेषादागतम् । शङ्खः[94]—

'मातामहे तथाऽतीते आचार्ये च तथा मृते ।
गृहे दत्तासु कन्यासु मृतासु तु त्र्यहस्तथा ॥'

आचार्यो[95] वेदवेदाङ्गाध्यापकः । कौर्मे[96]—

'मातामहश्वश्रू गुरुमृतौ चैव त्रिरात्रकम् ।'
'ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित् ।
ग्रामस्य तावदाशौचं निर्गते शुचितामियात् ॥
मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च ।
अशौचं पक्षिणी रात्रिर्मृता मातामही यदि ॥'
'भगिन्यां संस्कृतायान्तु भ्रातर्यपि च संस्कृते ।' वृद्धवचनम्)

भ्रातृश्वसुश्च पक्षिणी ततो मृतावन्यूनमेकरात्राशौचमिति भावः ।

'अग्न्यादिना विपन्नस्य चातुर्वर्ण्यस्य रोगिणः ।
सपिण्डास्तस्य शुद्ध्यन्ति त्रिरात्रेण न संशयः ॥'

94- 'तथातीते' स्थाने 'व्यतीते तु' इति मुद्रित (शङ्ख० 15/14) पाठः ।

95- आचार्यलक्षणमुक्तं मनुना (2/140), यथा—'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥' इति ।

96- कूर्मपुराणे (उत्त०-23/22) पाठो यथा—'मातामहानां मरणे त्रिरात्रं स्यादाशौचकम् । एकोदकानाञ्च तथा सूतके चैतदेव हि ॥' इति ।

अग्न्यादीत्यादिना विषरज्जूदकादिग्रहः । मनुः (5/80)—

'त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ।
तस्य पुत्रे च पत्न्याञ्च दिवारात्रमिति स्थितिः ॥'

दिवारात्रिक्रमो न नियत इत्युपवासे वक्ष्यते । तेन क्वचिद्रात्रिदिवमिति व्यत्ययोऽपि ।

'श्रोत्रिये97 तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत् ।
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ॥
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ।
अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥' (मनु०-5/81-82)

उपसम्पन्ने मैत्रीगृहवासादिधर्मयुते । सज्योतिः सूर्ये ज्योतिषि मृतौ दिवामात्रं चन्द्रज्योतिषि च रात्रिमात्रमाचरितव्यमित्यर्थः । ज्योतिर्जनपदेतिसूत्रे समानस्य सादेशे तस्य दिवारात्र्यन्यतरबोधकत्वमिति भट्टोजिदीक्षिताः98 । शिष्यः साङ्गवेदाध्यायी, ऋत्विजश्च स्वयंवृतोऽग्न्याधानयज्ञाधानकर्त्ता । यमः99 –

'डिम्बाहवहतानाञ्च तथैव प्राणसत्रिणाम् ।
नदीश्वापददंष्ट्रिभ्यः सद्यः शौचं विधीयते ॥'

वृहस्पतिः – 'सद्यः शौचं हि तत्राहुस्त्र्यह चान्ये महर्षयः ।'

97- 'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च ॥' इत्यत्रिस्मृतौ (श्लोकः-1 8) श्रोत्रियः लक्षितः । 'धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ।' इत्यापस्तम्बः (2/3/4) । 'श्रोत्रियो वेदपारगः' इति याज्ञवल्क्येन (1/111) प्रतिपादितम् । मित्रमिश्रोऽत्र 'सम्पूर्णशाखाध्येता श्रोत्रिय' इति मनुते । विज्ञानेश्वरस्तु 'यद्यप्यध्ययनमात्रेण श्रोत्रियस्तथापि श्रुताध्ययनसम्पन्नोऽत्र श्रोत्रिय' इति साधु प्रकाशयति । मैत्र्यादिना तत्समीपवर्त्तिनि तद्गृहवासिनि तस्मिन्मृते त्रिरात्राशौचम् । मातुलर्त्विक्शिष्यादिषु पक्षिणीं रात्रिं व्याप्याशौचम् । प्रेते राजनि सज्योतिरशौचम् । अश्रोत्रिये साङ्गवेदाध्यायिनि गुरौ च मृते दिनमात्रमशौचमिति ।

98- 'ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ।' इति पाणिनीयं (6/3/85) सूत्रम् । अत्र वृत्तिकारो भट्टोजिदीक्षितः 'एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात् । सज्योतिः, सजनपद इत्याद्या'ह ।

99- शुद्धिकौमुद्यां (P. 73) 'आहव' स्थाने 'अशनि' इति धृतपाठः । डिम्बः

डम्बाहवादिहतानां तत्क्षणं मृतौ सद्यः शौचं, कालान्तरे तु त्र्यहाशौचमिति ावः । वृद्धमनुः100—

'वृद्धः शौचस्मृते लुप्तप्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद् यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ॥'

त्तु वाजपेयिना,

'विषोद् बन्धनशस्त्रेण आत्मानं योऽभिघातयेत् ।
मृतोऽमेध्येन कोपाच्च नासौ संस्कारमर्हति ॥
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्यः श्राद्धादिकं तथा ॥' 101

नृपतिरहितं युद्धम् , आहवः परस्पराह् वानपूर्वककलहः । मनुनाऽपि (5/95) 'डिम्भाहवहतानाञ्च विद्युता पार्थिवेन च । गोब्राह् मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥' इति सद्यः शौचमभिहितम् ।

100- निर्णयसिन्धु (P-389) धृतम् । 'तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ।' इति तत्र द्वितीयश्लोकस्योत्तरार्द्धपाठः । वैधमरणेऽत्र न दोषः । अन्यथा 'आत्मानं घातयेद् यस्तु रज्ज्वादिभिरुपक्रमैः । मृतोऽमेध्येन लेप्तव्यो जीवतो द्विशतं दमः ॥' इति यमस्मृति (श्लोकः-20) वचनं व्यर्थं स्यात् ।

101- कूर्मपुराणे (उत्त० 23/61-62)पाठ एवम्-'नैष्ठिकानां वनस्थानां यतिनां ब्रह्मचारिणाम् । नाशौचं कीर्त्यते सद्भिः पतिते च तथा मृते ॥ पतितानां न दाहः···कार्यं श्राद्धादिकं क्वचित् ॥' इति । ज्ञानपूर्वकमरणे गौतमेन सद्यः शौचमुक्तम् ,यथा(2/5/11)—'प्रायोऽनाशकशस्त्राग्निविषोदकोद् बन्धनप्रपतनैश्चेच्छताम् । इति । प्रायो महाप्रस्थानम् । अनाशकः सत्येव भोज्यद्रव्ये क्रोधादिना भोजननिवृत्तिः । प्रपतनम् उर्द्ध् वस्थानात्पातः । अन्यत् प्रसिद्धम् । प्रसङ्गेऽस्मिन् पिण्डदानादिक्रियानिषेधो दर्शितः कात्यायनेन (24/16) वृह् मदण्डादियुक्तानां येषां नास्त्यग्निसत्क्रिया । श्राद्धादिसत्क्रियाभाजो न भवन्तीह ते क्वचित् ॥' इति । तथा चापि विज्ञानेश्वरेण (याज्ञ० मिताक्षरा०-3/6) दर्शितः, यथा—'चाण्डालादुदकात्सर्पाद् ब्राह मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम् । उदकं पिण्डदानञ्च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥' इति । एतदपीच्छापूर्वमात्महननविषयम् ।' इति ।

इति पराशरीयमुपन्यस्तं तन्निन्दापरत्वें इति क्रोधादिनात्मघातपरम् । प्रमादाद्विषग्रासादिना मृते तु न पातित्यं 102 वक्ष्यते । तथा च,

103 'ब्राह्मणो न दहेच्छूद्रं मित्रमेवान्यमेव वा ।
मोहाद् दग्ध्वा ततः स्नात्वा स्पृष्ट्वाग्निं प्राशयेद् घृतम् ॥
उपवासस्त्वहः पश्चात् त्रिरात्रेण विशुद्ध्यति ॥'

102-प्रमादादिनाऽज्ञानपूर्वकं विषग्रस्तादीनां मरणे पातित्यं नास्ति, उदकदानादि भवेदिति प्रतिपादयन् मनुराह (5/89)—'वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् । आत्मनस्त्यागिनाञ्चैव निवर्त्ततोदकक्रिया' । इति । गौतमेनापि 'प्रायोऽनाशके'त्यादिना पूर्वत्रेदं समर्थितम् । विज्ञानेश्वरेणापि (याज्ञ० मिता०-3/6) 'अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः । तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया ॥' इत्यङ्गिरोवचनबलात् 'प्रमादकृते दोषो नास्तीत्यवगन्तव्यमि'त्युक्तं सम्यक् ।
103-ब्राह्मणः शूद्रं मित्रमन्यं वा न दहेत् , मोहाद्दग्ध्वा 'अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र शवोक्तमाशौचम् ।' इति गौतम (2/5/27) वचनात् 'विप्रस्य शूद्रनिर्हरणे मासाशौचम् ।' इति विज्ञानेश्वर (याज्ञ०मिता-3/14) वचनाच्च मासेन शुद्ध्यति । त्रिरात्रेण शुद्धिवचनमत्र 'शौचमङ्गलमनायासा अनसूयाऽस्पृहा दमः । लक्षणानि च विप्रस्य तथा दानं दयापि च ॥' 'योगस्तपो दमो दानं सत्यं शौचं श्रुतं घृणा । विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् ॥' इत्यत्रिवसिष्ठ-(श्लो०-33,6/23 क्रमानुसारं) वचनलक्षितब्राह्मणस्य कृते न प्रयुज्यते । तदपि च'असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् । विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥' इति मनु०-(5/101) वचनात् शूद्रसम्पर्कं न निर्दिशति, द्विजाभिप्रायात् । शूद्रोऽत्र वर्णपरको न तु 'दीर्घवैरमसूया चासत्यं ब्राह्मणदूषणम् । पैशुन्यं निर्दयत्वञ्च जानीयाच्छूद्रलक्षणम् ॥' इति वसिष्ठ (6/24) वचनलक्षितः । ब्राह्मणपदेनात्र नामधारकब्राह्मणो गृह्यते । कर्मानुसारं ब्राह्मणस्य दशविधत्वमुक्तमत्रिस्मृतौ (श्लो० श्लो०-371-381), यथा 'देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः । पशुर्म्लेच्छोऽपि चण्डालो विप्राः दशविधाः स्मृताः ॥ सन्ध्यास्नानं जपं होमं देवतानित्यपूजनम् । अतिथिं वैश्वदेवञ्च देवब्राह्मण उच्यते ॥ शाके पत्रे फले मूले वनवासे सदा रतः । निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥ वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत् । साङ्ख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥ अस्त्राहताश्च धन्वानः सङ्ग्रामे सर्वसम्मुखे ।

पराशरः—104

'प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥'

अधुना राजशिष्यस्वसृमातासहश्रोत्रियाद्यशौचं यद् यदुक्तं तत्तत्प्रायशो नानुतिष्ठन्तीति न बहुलिखितम् । एवमात्मपितृबान्धवाद्यशौचमपि युक्तम् ।

आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते ॥ कृषिकर्मरतो यश्च गवाञ्च प्रतिपालकः । वाणिज्यव्यवसायस्थः स विप्रो वैश्य उच्यते । लाक्षालवण-संमिश्रं कुसुम्भं क्षीरसर्पिषः । विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥ चोरश्च तस्करश्चैव सूचको दंशकस्तथा । मत्स्यमांसे सदा लुब्धो विप्रो निषाद उच्यते ॥ ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः । तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥ वापीकूपतडागानामारामस्य सरःसु च । निश्शङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते ॥ क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः । निर्दयः सर्वभूतेषु विप्रश्चण्डाल उच्यते ॥' इति । मोहपूर्वकं तथा दाहे स्नाना-ग्निस्पर्शघृतप्राशानोपवासैः शुद्धिः । शुद्धिसाधनानि मनुना (5/105) कथ्यन्ते, यथा 'ज्ञानं तपोऽग्निराहारो मृण्मनो वार्युपाञ्जनम् । वायुः कर्मार्ककालौ च शुद्धेः कर्त्तृणि देहिनाम् ॥' इति । तत्र 'बुद्धिर्ज्ञानेन शुद्ध्यति' (मनु० 5/109) इत्यनेन ब्रह्मज्ञानं बुद्धिरूपान्तःकरणशुद्धेः साधनम् । तथैव 'तपसा वेदवित्तमाः' मनु० 5/107) इत्यनेन तपसा, 'पुनः पाकेन मृण्मयम्' (मनु०-5/122) इत्यनेन अग्निना, 'हविष्येण यवाग्वा वा' (मनु०-11/106) इत्यनेनाहारेणोपवासेन वा, 'मृद्वार्यादियमर्थवत्' (मनु०-5/134) इत्यनेन मृद्वारिभ्यां प्रक्षालनस्नानाभ्यां, 'मनःपूतं समाचरेत्' (मनु० 6/46) इत्यनेन मनसा, 'मार्जनोपाञ्जनैर्वेश्म' (मनु०-5/122) इत्यनेनानुलेपनेन, 'पन्थानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः'इति (तत्र) कुल्लूकधृतविष्णुवचनात् वायुना, 'यजेत वाऽश्वमेधेन' मनु० 11/74) इत्यनेन कर्मणा, 'गामालभ्यार्कमीक्ष्य वा' (मनु०-5/87) इत्यनेन सूर्यदर्शनद्वारा, 'शुद्ध्येद्विप्रो दशाहेन' (मनु०-5/83) इत्यनेन कालेन शुद्धिर्भवतीति । याज्ञवल्क्येन (3/31) 'पश्चात्तापो निराहार' इति पश्चात्तापोऽपि शुद्धिहेतुः कथितः ।

104-याज्ञ० वीरमि० (3/26) धृतम् । किन्तु तत्र मिताक्षरायां पराशरस्मृतौ (3/47) च चतुर्थचरणे 'स त्रिरात्रेण शुद्ध्यति' इति पाठः । शुद्ध्युपायः पराशरेण (3/48) दर्शितः, यथा –'त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समुद्र-

मनुः – 105 'आदिष्टी नोदकं कुर्यादावृतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुद्ध्यति ।।' (मनु० 5/88) ।

आदिष्टी ब्रह्मचारी । प्रेतोपस्पर्शने दशरात्राशौचमभिसन्धिपूर्वकम् । उप-स्पर्शनं वहनं दहनमभिसन्धिमूलकम् । चातुर्वर्णिकमिदम् । अनभिसन्धौ तु बौधायनोक्तं 106 स्नानमात्रम् । सुमन्तुः—

'अग्निजलसंग्रामदेशान्तरस्थसन्न्यास्यनशनमहाध्वनिकानामुदकदान कार्यं सद्यः शौचं भवति ।' इति । महाध्वनिको महाप्रस्थानमृतः । आतुरानातुर-

---

गाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ।।' इति । त्रिरात्रमत्र कामाच्छूद्रशवानुगमने वेदितव्यम् । अतः 'अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च । स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ।।' इति मनूक्तं (5/103) समानोत्कृष्टजातिविषयम् ।

105 ब्रह्मचर्यव्रतादेशनमादिष्टमस्यास्तीत्ययमादिष्टी । स स्वव्रतसमाप्तिं यावत्प्रेताय पिण्डश्राद्धोदकादि न दद्यात् । ब्रह्मचर्यव्रतसमाप्तौ प्रेतोदकं कृत्वा त्रिरात्राशौचं पालयेत् । एतत् 'आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् । निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ।।' इति मनु (5/91) वचनात् 'ब्रह्मचारिणः शवकर्मणा व्रताग्निवृत्तिरन्यत्र मातापित्रोर्गुरोर्वा ।' इति कुल्लूकधृतवसिष्ठवचनात् मातापित्राचार्यव्यतिरिक्तविषयम् । ब्रह्मचर्याश्रमे व्रतिनः पित्रोरपि गुरुवद्वृत्तिरिति दर्शितं हारीतेन, यथा (3/10 11)— अभिवाद्य गुरोः पादौ सन्ध्याकर्मावसानतः । तथा योगं प्रकुर्वीत मातापित्रोश्च भक्तितः ।। एतेषु त्रिषु नष्टेषु नष्टाः स्युः सर्वदेवताः । एतेषां शासने तिष्ठेद् ब्रह्मचारी विमत्सरः ।' इति ।

106—'परशवोपस्पर्शनेऽनभिसन्धिपूर्वं सचेलोऽपः स्पृष्ट्वा सद्यः शुद्धो भवति । अभिसन्धिपूर्वं त्रिरात्रम् ।'— बौधायनधर्मसूत्रम्(1/5/30-31) प्रसङ्गेऽस्मिन् गौतमः (2/5/21) 'प्रेतोपस्पर्शने दशरात्रमाशौचमभिसन्धाय चेत् ' इत्याह । अत्र वेतनादिप्रयोजनाभिसन्धानेन न तु धर्मार्थम् अन्यप्रेतनिर्हरणे दहने वा क्षत्रियस्य दशरात्राशौचमिति विवक्षितम् । तथैव 'उक्तं वैश्यशूद्रयोः' इति तद्वचनात् (2/5/22) वैश्यस्य द्वादशरात्रं, शूद्रस्यार्धमासाशौच विवक्षितम् । तथैव 'अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र शवोक्तमाशौचमि'ति (2/5/27) इत्यपि निर्णीतम् । किन्तु अस्मदुत्कलदेशे दशरात्राशौच-पक्षस्य समादरात् ग्रन्थकर्त्तुर्मतं सुरुचिरमेव ।

सन्न्यासिनां दशाहमध्ये तदूर्द्ध्वं वा मृतिश्रुतौ पुत्रस्य जलदानपूर्वकं सद्यः शौचम् । नारायणबलिपार्वण मासिक-वार्षिकश्राद्ध महालयादिकं सर्वमनातुरवदातुरसन्न्यासेऽपि तुल्यम् । नारायणबलिश्च विज्ञानेश्वर 107 शुद्धिगुच्छ-

---

107—शास्त्रनिन्दितमार्गेणात्महनने पतितानां मरणे वा श्राद्धाद्यौर्द्ध्वदेहिकेषु निषिद्धेषु 'नारायणबलिः कार्यो लोकगर्हाभयान्नरैः । तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ।।' इति विज्ञानेश्वरधृत (याज्ञ० मिता०-3/6) वृद्धयाज्ञवल्क्यछागलेयवचनात् नारायणबलिना प्रेतस्य श्राद्धाद्यौर्द्ध्वदेहिकं सर्वं कार्यम् । नारायणबलेश्चेतिकर्त्तव्यता प्रदर्शिता तत्र विज्ञानेश्वरेण 'कस्याश्चिच्छुक्लैकादश्यां विष्णुं वैवस्वतं यमञ्च यथावदभ्यर्च्य तत्समीपे मधुघृतप्लुतांस्तिलमिश्रान्दश पिण्डान्विष्णुरूपिणं प्रेतमनुस्मरन् प्रेतनामगोत्रे उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणाभिमुखो दत्त्वा गन्धादिभिरभ्यर्च्य पिण्डप्रवाहणान्तं कृत्वा नद्यां क्षिपेत् , न पत्न्यादिभ्यो दद्यात् । ततस्तस्यामेव रात्र्यामयुग्मान्ब्राह्मणानामन्त्र्योपोषितः श्वोभूते मध्याह्ने विष्णवाराधनं कृत्वा एकोद्दिष्टविधिना ब्राह्मणपादप्रक्षालनादितृप्तिप्रश्नान्तं कृत्वा पिण्डपितृयज्ञावृतोल्लेखनाद्यवनेजनान्तं तूष्णीं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय च परिवारसहिताय चतुरः पिण्डान् दत्त्वा नामगोत्रसहितं तं प्रेतं संस्मृत्य विष्णोर्नाम सङ्कीर्त्य पञ्चमं पिण्डं दद्यात् । ततो विप्रानाचान्तान्दक्षिणाभिस्तोषयित्वा तन्मध्ये चैकं गुणवत्तमं प्रेतबुद्ध्या संस्मरन् गोभूहिरण्यादिभिरतिशयेन सन्तोष्य ततः पवित्रपाणिभिर्विप्रैः प्रेताय तिलादिसहितमुदकं दापयित्वा स्वजनैः सार्धं भुञ्जीत । सर्पहते त्वयं विशेषः-सम्वत्सरं यावत्पुराणोक्तविधिना पञ्चम्यां नागपूजां विधाय पूर्णे सम्वत्सरे नारायणबलिं कृत्वा सौवर्णं नागं दद्यात् , गाञ्च प्रत्यक्षाम् । ततः सर्वमौर्द्ध्वदेहिकं कुर्यात् ।' इति । यतीनां नारायणबलिविधिर्दर्शितो निर्णयसिन्धु (P. 395) कारेण, यथा—बौधायनः-'नारायणबलिश्चास्य कर्त्तव्यो द्वादशेऽहनि ।' अस्य पार्वणेन समुच्चयो ज्ञेयः । तञ्च स एवाह-'कृत्वा विष्णोर्महापूजां पायसं विनिवेदयेत् । अग्नौ हुत्वा तु तच्छेषं व्याहृतिभिः समाहितः ।। यतीन्गृहस्थान्साधून्वा निमन्त्र्य द्वादशावरान् । अभ्यर्च्य गन्धपुष्पाद्यैर्मन्त्रैर्द्वादशनामभिः ।। संभोज्य हव्येनान्नेन दक्षिणाञ्च निवेदयेत् । त्रयोदशं द्विजश्रेष्ठमात्मज्ञं संयतेन्द्रियम् ।। विष्णुं यथा तथाभ्यर्च्य पाद्याद्यैश्च विधानतः । दद्यात्पुरुषसूक्तेन गन्धपुष्पादिकं क्रमात् ।। वस्त्रालङ्करणादीनि यथाशक्ति प्रदापयेत् । उच्छिष्टसन्निधौ तस्य दर्भानास्तीर्य भूतले । भूर्भुवःस्वःस्वधायुक्तैस्तस्मै दद्याद् बलित्रयम् ।।' इति ।

कारादिभिर्लिखितः। यत्तु नरसिंहेनातुरसन्न्यासिमृतौ पुत्रादेर्स्नाहवदशरात्राशौचमुक्तं तद्यत्याचारविरोधादुपेक्ष्यम् 108। सन्न्यासिपदस्य प्रैषोच्चारजशक्तत्वेनातुरेऽपि वृत्तेः। तथा चाङ्गिराः 109—

'आतुराणां तु सन्न्यासे न विधिर्नैव च क्रिया।
प्रैषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत्॥' इति।

विद्याकरपद्धतावपि प्रातर्मध्यन्दिनसायंकालेषु प्रत्येकं त्र्यावृत्त्या नवप्रैषोच्चारकात्तु सन्न्यासे यतिवदौर्द्ध्वदेहिकमित्यभिधानाच्च।

108-'कपालं वृक्षमूलानि कुचेलमसहायता। समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥' इति मनूक्त (6/44) लक्षणलक्षितो यो यतिस्तस्य 'नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्। नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते॥' इति निर्णयसिन्धु (P. 383) धृतवचनात् 'सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा॥' इति याज्ञवल्क्य (3/28) वचनबलाच्च सद्यः शौचाभिधानात् दशदिनाशौचमनुचितम्। यत्याचारश्च मनुना (6/43, 49) दर्शितः-'अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत्। उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः॥ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः। आत्मनैव सहायेन सुखार्थी विचरेदिह॥' इत्यादि। याज्ञवल्क्येनापि (3/58) 'सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः। एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्॥' इत्याद्युक्तम्। सन्न्यासग्रहणात्परं स्वपरिवारसम्पर्कत्यागाथमाह हारीतः (6/5) 'ततः प्रभृति पुत्रादौ स्नेहालापादि वर्जयेत्। बन्धूनामभयं दद्यात्सर्वभूताभयं तथा॥' इति।

109-निर्णयसिन्धौ (P. 441) अङ्गिरोवचनम् यथा—'प्रव्रजेद् ब्रह्मचर्याद्वा प्रव्रजेद्वा गृहादपि। वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः॥' इति। 'आतुराणां तु सन्न्यासे' इति तत्र भारतवचनम्। आतुरसन्न्यासविधिर्यथा—'अपां समीपे गत्वा तिथ्याः स्मरणपूर्वकं स्नानसन्ध्यावन्दनादि कृत्वा देशकालौ सङ्कीर्त्य 'ममाशेषदुःखनिवृत्तिनिरतिशयानन्दप्राप्तिपरमपुरुषार्थप्राप्तये च परमहंससन्न्यासं करोमि' इति सङ्कल्पयेत्। तत्र प्रधानानि प्रैषोच्चारप्रणवोपदेशमहावाक्यानि। ततः सन्न्यासोचितं क्षौरं कृत्वा पूर्ववत्सप्तपञ्चकेशान् विसृज्य स्नात्वाचम्य पात्रेण तोयमादायोपस्पृश्य दक्षिणेन पाणिनाऽप्सु जुहोति। 'एष वोऽग्नेर्योनिर्यः प्राणं गच्छ स्वाहा' इति प्रथमाहुतिः। 'आपो वै सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोमि स्वाहा' इति द्वितीया। ततो हुतशेषम् 'आशुःशिशान' इत्यनुवाकेनाभिमन्त्र्य 'पुत्रैषणा वित्तैषणा लोकैषणा

पराशरः— 'अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे फलन्तेषां यज्ञतुल्यं न संशयः ॥
न तेषामशुभं किञ्चित्पापं वा शुभकर्मणाम् ।
जलावगाहनात्तेषां सद्यः शौच विधीयते ॥' 110

वहन्तीति त-वर्गतृतीयादि, दन्त्यौष्ठादिपाठेऽपि 111 स दाहार्थक एव । कौर्मे—

'अनस्थिसञ्चिते शूद्रे रौति चेद्ब्राह्मणः स्वकैः ।
त्रिरात्रं स्यात्तथाशौचमेकाहं त्वन्यथा स्मृतम् ॥' (कू०उत्त०23/46) ।

स्वकैः आत्मीयैः । अन्यथाऽस्थिसञ्चयनानन्तरम् । गौतमः 112—
'अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र शवजात्युक्ताशौचम् ।'

मया त्यक्ताः स्वाहा' इति प्रथमां पिबेत् । 'ॐ भूर्भुवःस्वरोम् मया सन्न्यस्तं स्वाहा' इति द्वितीयां पिबेत् । 'अभयं सर्वभूतेभ्यो मत्तः स्वाहा' इति तृतीयां पिबेत् । ततोऽन्यत्तोयमञ्जलिपूर्णमादाय प्रागादिदिक्षु प्रत्येकं निनयेत् । 'ॐ भूः सावित्रीं प्रवेशयामि, ॐभुवः सावित्रीं प्रवेशयामि, ॐ स्वः सावित्रीं प्रवेशयामि, ॐभूर्भुवःस्वः सावित्रीं प्रवेशयामि' इति सावित्रीप्रवेश कृत्वाऽथोर्द्ध्वबाहुः सूर्याभिमुखो भूत्वा 'ॐभूः सन्न्यस्तं मया, ॐभुवः सन्न्यस्तं मया,ॐस्वः सन्न्यस्तं मया, ॐभूर्भुवःस्वः सन्न्यस्तं मया' इति प्रैषोच्चारं ब्रूयात् । एवं मन्द्रमध्योच्चैस्त्रिरुक्त्वा तूर्ष्णीं शिखां निकृत्य स्नात्वाचम्य यज्ञोपवीतमुद्धृत्याञ्जलिना गृहीत्वा 'ॐभूः स्वाहा' इति अप्सु हुत्वा दिगम्बरो भूत्वा 'पुत्रैषणावित्तैषणालोकैषणातो मुक्तोऽहम्' इति ब्रूयात् । अत ऊर्द्ध्वं न पुत्रगृहं गच्छेत् ।'—निर्णयसिन्धुः (P. 447) ।

110 'पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते ।' मुद्रित (परा०3/41-42,पाठः ।

111-'तुल्यास्य प्रयत्नं सवर्णम् ।' इति पाणिनिसूत्र (1/1/9) व्याख्यानावसरे भट्टोजिदीक्षितः 'ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यादि'ति मत्वा 'लृतुलसानां दन्ताः ।···वकारस्य दन्तौष्ठम् ।' इति प्रतिपादयति । अत्र द व-वर्णयोः सवर्णसंज्ञा । तेन वहन्तीत्यनेन दाहार्थकत्वं सिद्धम् ।

112-'शवोक्तमाशौचमि'ति मुद्रित (गौतमधर्म० 2/5/27) पाठः । अवरो जघन्यो यथा ब्राह्मणापेक्षया क्षत्रियः, पूर्वः श्रेष्ठो यथा क्षत्रियापेक्षया ब्राह्मणः । तयोरन्योन्यप्रेतनिर्हारे दहने वा शवजात्युक्तमशौचं भवति, यथा—क्षत्रियशवनिर्हरणे ब्राह्मणस्य द्वादशरात्राशौचमित्यादि ।

उपस्पर्शो वहनम् । पुष्पवतीस्पर्शे त्रिरात्रम् । स्पर्शोऽत्र दाहान्तः । मनुः113—

'न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ।।' (मनु० 5/104)

अस्वर्ग्यत्वादिदोषेण 'स्वेषु तिष्ठत्सु इत्यविवक्षितमि'ति विज्ञानेश्वरः 114 । केचित्तु सवर्णाभावे शूद्रेण विप्रो दग्धव्य एव यतः शूद्रः शवं स्पृष्ट्वा न दहति चेत् साहुतिरस्वर्ग्या स्यात् । तस्मात्केवलस्पर्शस्य दुष्टत्वेऽपि दाहान्तस्पर्शो न दुष्टः, प्रधानदाहस्य गुणीभूतसवर्णानुरोधेन त्यागायोगादित्याशय इत्याहुः115 ।

मनुः 116 –

'नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेत् ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ।।'

वसिष्ठः – 'मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्राशौचम्, अस्निग्धे त्वहोरात्रम् ।' इति । इदं न्यूनविजातीयपरमिति केचित् । पूर्वं मनुना विकल्पितमित्यन्ये ।

मनुः—

'शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुद्ध्यति ।' (मनु०-5/85)

---

113 – सजातीयब्राह्मणेषु स्थितेषु मृतं ब्राह्मणं पुत्रः शूद्रादिना 'दक्षिणेन मृतं शूद्रमि'तिमनु (5/92) वचनानुरोधेन पूर्वद्वारेण न बहिरानयेत् न वा दाहयेत् । शूद्रसम्पर्कदूषिततद् बहिरानयनदाहादि प्रेतस्य स्वर्गकारकं कदाचिन्न भवतीति ।

114 – 'अत्र च स्वेषु तिष्ठत्सु इत्यविवक्षितम्, अस्वर्ग्यत्वादिदोषश्रवणात् ।' इति (याज्ञ० मिता० 3/2) ।

115—मन्वर्थमुक्तावलीकारः कुल्लूकभट्टोऽत्र 'स्वेषु तिष्ठत्स्वित्यभिधानाद्-ब्राह्मणाभावे क्षत्रियेण तदभावे वैश्येन तदभावे शूद्रेणापि निर्हारयेदित्युक्तं, यथापूर्वं श्रेष्ठत्वात् । अस्वर्ग्यदोषश्च ब्राह्मणादिसद्भावे शूद्रेण निर्हरणे सति बोद्धव्यः ।......सम्भवदर्थपदद्वयोच्चारणवैयर्थ्यप्रसङ्गादुपक्रमावगतेश्च वेदो-दितन्यायेनानुबोध्यत्वाद् गुणभूतशुद्ध्यनुरोधेन प्रधानभूतायाः जातेरुपेक्षायां गुणलोपेनामुख्यस्येत्यपि न्यायेन बाध्येत ।' इत्याह ।

116—'स्नात्वा विप्रो विशुद्ध्यति' इति मुद्रितमनौ (5/87) द्वितीयचरण-पाठः । रक्तमांससंयुक्तं मानुषास्थि स्पृष्ट्वा ब्राह्मणादिः सवासा स्नात्वा विशुद्ध्यति । रक्तमांसशून्य मानुषास्थि पुनः स्पृष्ट्वा आचम्य गोस्पर्शसूर्यदर्श-नादिद्वारा शुद्धो भवति । इदं द्विजात्यस्थिस्पर्शे वेदितव्यम् ।

शवस्पृष्टिनं द्वितीयं स्पृष्ट्वा तृतीयस्याचमनमात्रं न तु स्नानमिति भावः। इद-च्चाकामतः 'पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलोदकोपस्पर्शनात्पूतो भवती'ति गौतमस्मृतौ 117 सचैललिङ्गेनोपस्पर्शस्य स्नानार्थत्वात्कामतः चतुर्थपञ्चमादेः स्नानाभावो न तृतीयस्यापीति प्राञ्चः 118। वस्तुतस्तु,

"उपस्पृश्याशुचिस्पृष्टं तृतीयं वाऽपि मानवः।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति॥' इति देवलात्
'तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते।
ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा॥' इति 119

सम्वर्त्ताच्च (श्लोकः-184) कामादकामाद्वा द्वितीयादिस्पर्शे तृतीयचतुर्थानां स्नानाभावः 120। 'पतितचण्डालावि'त्युक्तं गौतमीयं तू'र्ध्वमाचमनं प्रोक्तमि'त्यादिना विकल्पितम्। अन्यस्यैकपदोपात्तत्वात्तत्पदेन मतान्तरे पतितचण्डालादेरपि परामर्शे पतितोदक्यादिस्पशने द्वितीयस्पृष्ट्या तृतीयस्यापि स्नानापत्तौ व्यवहारविरोधः स्यात्। अत एव,

---

117—'उदकोपस्पर्शनाच्छुध्येत्' इति मुद्रित (गौतमधर्म०-2/5/28) पाठः। बृहस्पतिनाप्युक्तं यथा—'शवस्पृष्टं दिवाकीर्तिं चितिं यूपं रजस्वलाम्। स्पृष्ट्वा त्वकामतो विप्रः स्नानं कृत्वा विशुद्ध्यति॥' इति। कामतः स्पर्शे याज्ञवल्क्यमिताक्षरा (3/30) धृतच्यवनवचनं यथा—'श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजिनं सोमविक्रयिणं यूपं चितिं चितिकाष्ठं च मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचैलमम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत्। घृतं प्राश्य पुनः स्नात्वा त्रिराचामेदि'ति। पतितपदेनात्र महापातकिनां ग्रहणम्।

118—विज्ञानेश्वरः (याज्ञ० मिता०-3/30) तथा प्रकाशयति, यथा 'तृतीयस्य त्वाचमनमेव। 'तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा॥' इति सम्वर्तस्मरणात्। एतच्चाबुद्धिपूर्वकविषयम्, मतिपूर्वे तु तृतीयस्यापि स्नानमेव।' इति।

119—'चण्डालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च। उदक्यां सूतिकां नारीं सवासा स्नानमाचरेत्॥' इति तत्र (सम्वर्त्त-183) पूर्ववर्त्तिवचनम्।

120—गोविन्दानदः (शुद्धिकौ०P. 327) मनुते यत् 'उपस्पृश्याशुचिस्पृष्टं··· प्रक्षाल्याचम्य शुद्ध्यति॥' इति देवलवचनं शवोपस्पर्शेतरोपस्पर्शविषयम्।'इति।

'दिवाकीर्तिमुदक्याञ्च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुद्ध्यती'ति (मनु० 5/85)

मानवीये 121 प्रथमद्वितीययोः स्नानमुक्त्वा तृतीयादेस्त्यागात् । तत्पदेन दिवाकीर्त्यादीनां बुद्धिस्थत्वेन परामर्शात् । शवमात्रपरामर्शमते तु शवस्पृक्स्पर्शिनं विनाऽन्यपतितादिस्पर्शिस्पर्शिनो द्वितीयस्यापि स्नानाभावः ।

'अशुचिं स्पृशते यस्तु एक एव स दुष्यति
तत्स्पृष्ट्वान्यो न दुष्येत सर्वद्रव्येष्वयं विधिः ॥'
'बहूनामेकलग्नानां यद्येकोऽप्यशुचिर्भवेत् ।
अशौचं तस्य पात्रस्य नेतरेषां कथञ्चन ॥' 122

इदमल्पाशुचिपरम् । अत्यन्ताशौचे तु इतरेषामप्यशुद्धिः स्यात् । अत्यन्ताशुचिलग्ने द्वितीयपात्रस्याशुचित्वेऽपि तल्लक्षणलग्नतृतीयचतुर्थादिपात्राणां नाशुचिरिति भावः ।

'बहूनामेकलग्नानां यद्येकमुपहन्यते ।
न तद् द्रव्यस्य तच्छौचं नेतरेषां कथञ्चन ॥'

उपहन्यत इत्यशौचगुरुत्वलिङ्गादिदं मलोच्छिष्टाद्यशुचिपरम् । द्रव्यमिह भैक्ष्यम् ।

'अमेध्यं मेध्यतां याति विष्णोर्निर्माल्यसङ्गमात् ।' 123

इत्यादिप्रामाण्ये साक्षादशुचिलग्नानां विष्णुप्रसादभैक्ष्याणां त्यागेऽपि न परम्परया अशुचिलग्नानां तेषां शुद्धिरित्यादिपरम्पराक्रमोच्छिष्टमलाद्यशुद्धे फल-

---

121—चण्डालं रजस्वलां ब्रह्महत्यादिकारिपापिनं मृतमनुष्यशरीरं तत्स्पर्शकारिणञ्च स्पृष्ट्वा स्नानानन्तरं शुद्धिः । तत्स्पृष्टीत्यनेन शवस्पृष्टी न तु रजस्वलादिस्पृष्टी ज्ञायते 'उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् ।' इति याज्ञवल्क्य (3/30) वचनात् ।

122—तथैवात्रिः (श्लोकः—241)- 'बहूनामेकलग्नानामेकश्चेदशुचिर्भवेत् । अशौचमेकमात्रस्य नेतरेषां कथञ्चन ॥' उत्सवादिषु दोषोऽयं नास्तीति तेनोक्तम्, यथा—'देवयात्राविवाहेषु यज्ञप्रकरणेषु च । उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यते ॥' इति ।

123—आचारसारे (P. 359) ब्रह्मवैवर्त्तपुराणवचनमपि एतदनुरूपम्, यथा—'जगन्नाथस्य नैवेद्यं महापातकनाशनम् । भक्षणात्फलमाप्नोति कपिलाकोटिदानजम् ॥' इति ।

मूलादौ तु 'फलं धौतेन शुद्ध्यती'तिवचनात् क्षालने शुद्धिः । एवमन्यदिति सङ्क्षेपः । प्रकृतमनुसरामः ।

'स्वं वर्णं च वहेद्दहेदनुगतः स्पृष्टः शवास्योरुदन्
स्नात्वान्यं यदि तत्समह्निदिवसैर्दग्ध्वेऽस्थिपर्णे नरे ।'

इति कालिदासेन 124 शवानुगमरोदनादिना स्नानमुक्तम् । यत्तु, सर्वे वर्णाः सजातीयं दग्ध्वा त्र्यहमशौचं पालयेयुरिति तदत्यन्तनिर्गुणपरम्, धनग्रहादिपूर्वकदाहपरं वा, 125

'असगोत्रमसम्बन्धं प्रेतीभूतं तु ब्राह्मणम् ।
वहित्वा च दहित्वा च सद्यः शौचं विधीयते ॥'

इति पैठीनसिवचनात् । पराशरः 126—

'शिल्पिनः कारुका वैद्या दासगोपालनापिताः ।
राजानः श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः ॥'

स्पर्शादिविषय इति भावः । पराशरः—

'दुर्भिक्षे राष्ट्रसङ्घात आपदाञ्च समुद्भवे ।
उपसर्गमृतानाञ्च सद्यः शौचं विधीयते ॥

दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च ।
तपोदानप्रसक्तेषु नाशौचं मृतसूतके ॥
आचार्यपत्नीपुत्रेषु प्रेतेषु दिवसेन च ।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥'

राष्ट्रिय संस्कृत संस्थान जयपुर 13262

यत्तु, कृष्णतोषिण्यां 'सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथे'त्यत्र 127

124—'बन्धोर्निर्हरणे त्र्यहात्सह वसन्नह्नान्यवासेऽन्नभुक् तुल्यस्तैः शवसंस्कृतिञ्च विधिना कृत्वा क्रियां स्याच्छुचिः ॥' इति शुद्धिचन्द्रिकायां (श्लो०-26) उत्तरार्धपाठः ।

125—त्रिदिनाशौचपालनस्य याथार्थ्यं नास्त्यत्र, सर्वथा समानोदकसम्पर्ककल्पनाऽभावात् । बन्धुसम्बन्धेन त्रिदिनाशौचस्य योग्यत्वमेव ।

126—दासी दासाश्च नापिताः' इति मुद्रितस्मृतौ (3/20-21) द्वितीयचरणे पाठः ।

127—याज्ञवल्क्योक्तं सम्पूर्णवचनं (3/28-29) यथा—'ऋत्विजां दीक्षितानाञ्च यज्ञियं कर्म कुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ दाने

ब्रह्मविदां वैष्णवानामित्यर्थापरत्वं, तद्युक्तम्, गृहस्थवैष्णवानां च सद्यः शौचं समाचारात्। गृहत्यागिशुद्धवैष्णवानाञ्च विधिनिषेधाभावस्य कालसर्वस्वे 128 निश्चितत्वेन वैयाथ्र्यात्। तस्मात् ब्रह्मशब्दः शब्दब्रह्मणि

विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधीयते॥' इति। तथा च शङ्खस्मृतौ (15/22)—'यतिवृतिब्रह्मचारिनृपकारुकदीक्षिणः। नाशौचभाजः कथिता राजाज्ञाकारिणश्च ये॥' इति।

128—ग्रन्थकर्त्तुरस्य पूर्वकृतिः 'कालसर्वस्वम्'। मत्सम्पादितस्य ग्रन्थरत्नस्य तस्य अन्तिमभागो वैष्णवप्रकरणम्। तन्मध्ये ग्रन्थकर्त्रा 'स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः॥' इत्युक्तिसहकारेण 'यथा विधिनिषेधौ तु मुक्तं नैवोपसर्पतः। तथा न स्पृशतो रामोपासकं विधिपूर्वकम्॥' इत्यगस्त्यसंहितावचनमुपन्यस्तम्। ते च वैष्णवाश्चतुर्विधाः, यथोक्तं विष्णुस्मृतौ (3/11-12)—'चतुर्विधा भिक्षुकाः स्युः कुटीचकबहूदकौ॥ हंसः परमहंसश्च पश्चाद्यो यः स उत्तमः। एकदण्डी भवेद्वापि त्रिदण्डी चापि वा भवेत्॥' इति। कुटीचकादीनां लक्षणमुक्तं तत्र, यथा (4/13-15)-'त्यक्त्वा सर्वसुखास्वादं पुत्रैश्वर्यसुखं त्यजेत्। अपत्येषु वसेन्नित्यं ममत्वं यत्नतस्त्यजेत्॥ नान्यस्य गेहे भुञ्जीत भुञ्जानो दोषभाग्भवेत्। कामं क्रोधञ्च लोभञ्च तथेर्ष्यासत्यमेव च॥ कुटीचकस्त्यजेत्सर्वं पुत्रार्थञ्चैव सर्वतः। भिक्षाटनादिकेऽशक्तो यतिः पुत्रेषु संन्यसेत्॥' इति। निर्णयसिन्धुकारः (P. 441) 'आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासा शिखोपवीतत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जान आत्मज्ञो भवेत्। एतदत्यन्ताशक्तपरम्।' इति तथैवाह।'त्रिदण्डं कुण्डिकाञ्चैव भिक्षाधारं तथैव च॥ सूत्रं तथैव गृह्णीयान्नित्यमेव बहूदकः। प्राणायामेऽप्यभिरतो गायत्रीं सततं जपेत्॥ विश्वरूपं हृदि ध्यायन्नयेत्कालं जितेन्द्रियः। ईषत्कृतकषायस्य लिङ्गमाश्रित्य तिष्ठति॥' इति तत्र (4/16-18) बहूदकलक्षणम्। सः सप्तागाराणि भैक्षमाचरेत्।'इन्द्रियाणि मनश्चैव कर्षन्हंसोऽभिधीयते। कृच्छ्रैश्चान्द्रायणैश्चैव तुलापुरुषसंज्ञकैः॥ अन्यैश्च शोषयेद्देहमाकाङ्क्षन्ब्रह्मणः पदम्। यज्ञोपवीतं दण्डञ्च वस्त्रं जन्तुनिवारणम्॥ अयं परिग्रहो नान्यो हंसस्य श्रुतिवेदिनः।' इति तत्र (4/20-22) हंसलक्षणम्। 'आत्मनिष्ठः स्वयं युक्तस्त्यक्तसर्वपरिग्रहः॥ चतुर्थोऽयं महानेषां ध्यानभिक्षुरुदाहृतः। त्रिदण्डं कुण्डिकाञ्चैव सूत्रं चाथ कपालिकाम्॥ जन्तूनां वारण वस्त्रं सर्वं भिक्षुरिदं त्यजेत्। कौपीनाच्छादनार्थं च वासोऽधश्च परिग्रहेत्॥

निष्णात इत्यादिवत्। सद्धिदां शाब्दिकवैदिकानामित्यर्थः। अध्यात्मविदामिति वा। दक्षः (6/18)—

'स्वस्थकाले त्विदं सर्वमाशौचं परिकीर्तितम्।
आपद्गतस्य सर्वस्य सूतके पि न सूतकम्॥'
'यज्ञार्थं बहुसम्भारकृतस्यापि न कुत्रचित्।
अथ देवप्रतिष्ठायां ग्रहयागादिकर्मणि।
श्राद्धे च पितृयज्ञे च अशौचं तस्य नो भवेत्॥'

कुत्रचिदितिस्वरसात् सति सम्भारे दिनान्तराभावे प्रतिष्ठाविवाहादीनामशौचेऽपि कर्त्तव्यतैव। सन्निहितदिनान्तरसत्त्वे तु नेति सूचितम्। ब्राह्मे—

प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः।
शृङ्गिदंष्ट्रिनखिव्यालविषविद्युज्जलाग्निभिः॥
चण्डालैरथवा चौरैर्निहतो यत्र कुत्रचित्।
तस्य दाहादिक कार्यं तस्मान्न पतितस्तु सः॥

'शृङ्गिदंष्ट्रिनखिव्यालविषवह्निमहाजलैः।
सुदूरात् परिहर्त्तव्यः कुर्वन् क्रीडां मृतस्तु यः॥'

क्रीडां तद्वधाद्यतनम्। परिहर्त्तव्यः पातित्यान्न दग्धव्य इति भावः। ब्राह्मे

'परदारान् हरन्तश्च क्रोधात्तत्पतिभिर्हताः।
गराग्निविषदाश्चैव पापण्डाः क्रूरबुद्धयः॥' 129
'सुखे भगाश्च ये केचित् क्लीबप्राया नपुंसकाः।
ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः॥
महापातकिनो ये च पतितास्ते प्रकीर्तिताः। 130

कुर्यात्परमहंसस्तु दण्डमेकञ्च धारयेत्। आत्मन्येवात्मना बुद्ध्या परित्यक्तशुभाशुभः॥' इति तत्र (4/23-26) परमहंसलक्षणम्। तेषां संस्कारविशेषश्चोक्तो निर्णयसिन्धौ (P. 447) यथा-'कुटीचकं तु प्रदहेत्पूरयेत्तु वहूदकम्। हंसो जले तु निक्षेप्यः परहंसं प्रपूरयेत्॥' स च पलाशमूले नदीतीरेऽन्यत्र वा कर्त्तव्य इति।

129—आततायिरूपेणैतेषां ग्रहणं वसिष्ठधर्मशास्त्रे (3/16), यथा—'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते आततायिनः॥' इति। 'गरस्तूपविषे विषे।' इति हेमचन्द्रवचनात् (2/411) गरोऽत्रोपविषम्।

130—महापातकानि पञ्च। तदुक्तं मनुस्मृतौ (11/54)—'ब्रह्महत्या

पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।।'

ब्रह्मदण्डोऽभिचारः । दाहाभावे जले खाते वा क्षेपः । षट्त्रिंशन्मते

'गोब्राह्मणहतानां च पतितानां तथैव च ।
ऊर्ध्वं सम्वत्सरात्कुर्यात् सर्वमेवौर्ध्वदेहिकम् ।।' इति ।

तच्च नारायणबलिपूर्वकम् ।

'सर्वेषामेव लोकानां गुरुर्नारायणो हरिः ।
तमुद्दिश्य बलिः कार्यो दत्तो हि दुरितापहः ।।' इति वचनात् ।

अथास्थिपर्णदाहाशौचम् ।

शरीराभावेऽस्थिप्राप्तौ,

'प्रक्षाल्य पञ्चगव्येन 131 दहेयुस्तु यथाविधि ।'

दहेयुरिति बहुत्वाच्चातुर्वर्णिकमिदम् । कात्यायनः 132—

'विदेशमरणे स्थीनि ह्याहृत्याभ्यज्य सर्पिषा ।
दाहयेदूर्णयाच्छाद्य पात्रन्यासादिपूर्वकम् ।।
अस्थ्नामलाभे पर्णानि सकलान्युक्तयावृता ।
दाहयेदस्थिसङ्ख्यानि ततः प्रभृति सूतकम् ।।'

इदं साग्नेर्दाहादूर्ध्वमिस्थ्यानुवादः । तेन,

सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ।।' इति । एतत्संपृक्ता महापातकिनः कथ्यन्ते ।

131—पञ्चगव्याद्याहरणं यथा चोक्तं पराशरेण (11/29-34)—'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यञ्च पवित्रं पापशोधनम् ।। गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् । पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ।। कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वा । मूत्रमेकपलं दद्यादङ्गुष्ठार्धं तु गोमयम् ।। क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते । घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ।। गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णस्तथा दधि ।। तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।' इति । कुशोदकं पञ्चगव्यातिरिक्तम् ।

132—कात्यायनस्मृतौ (13/2-3) 'दाहयेत्' स्थाने 'भजयेत्' इति पाठः । निर्णयसिन्धौ (P. 396) 'ऊर्णया' स्थाने 'बर्हिषा' इति धृतपाठः । अस्थिखण्डं पञ्चगव्येन प्रक्षाल्य घृतेन वाऽभ्यज्य ऊर्णयाऽऽच्छाद्य दाहयेत् । ऊर्णाभावे बर्हिषा दहनं ग्राह्यमेव ।

'एवं पर्णशरं 133 दग्ध्वा त्रिरात्रमशुचिर्भवेत् ।'

इति त्राह्मे पर्णदाहकृतत्रिदिनाशौचं साग्नेर्दशाहोत्तरवत् तन्मध्येऽपि त्र्यहरूपं समम् , न तु दशाहशेषेण त्वहबाधः; तस्य मरणावध्यशौचाभावात् । निरग्नेस्तु दशाहमध्ये पर्णदाहे दशाहशेषदिनैः शुद्धिः, गुरुणा दशाहेन लघोस्त्रिदिनाशौचस्य बाधात् । तद्दशाहानन्तर तु त्रिदिनवाक्यं सावकाशमिति नोत्सर्गप्राप्तमृतिदशाहनिराशङ्केति सिंहवाजपेयिनः । पुत्रस्य तु श्रुत्वा तद्दिनमारभ्येति विशेषाद्दशाहाशौचम् , विशेषेण सामान्यपर्णदाहत्रिदिनबाधात् ; तस्य पुत्रस्य भिन्नेऽवकाशाच्च । एवं दशाहमध्ये पुत्रस्य मृतिश्रुतौ दशाहशेषेण शुद्धिः । 'शृणोत्यनिर्दशं पित्रोरि'त्यादि प्राक्प्रपञ्चितम् । 'अस्थ्नामलाभे' इति प्रतिनिधिप्रत्ययेन पर्णदाहे पुत्रादिनातिदेशः । यद्वा एवमिति स्वरसेनास्थिदाहेऽपि त्रिदिनकल्पना ।

'दत्त्वोदकधारां पूर्वं वेदाग्निगुणगान् सुतः ।
त्रिभिर्दिनैः........ ॥

इत्यस्य प्रामाण्ये तु बहुवेदाग्नेरशक्तपुत्रस्य त्रिदिनाशौचम् । गुणोऽप्रधानं शरीराद्यसामर्थ्यम् , बहुवेदाग्निसामर्थ्यं वेत्यर्थात् इति न साग्नेः पितुर्मरणावध्यशौचाभाव दशाहमध्ये तदूर्ध्वञ्च पुत्रस्य दशाहाशौचमन्यूनाधिकम् । गुरुत्वादस्थिपर्णदाहत्रिदिनबाधत्वादित्युक्तप्रायम् । अस्थिसङ्ख्या च षष्ट्यधिकं शतत्रयम् ।

'अस्थि त्रिभिःशतैः षष्ट्यधिकैः प्रमाणमि'ति विष्णूक्तेः । 134

पलाशपत्रन्यासमाहाश्वलायनः—

133—पालाशस्य त्रयवृन्तनिमित्तं प्रतिरूपकं पर्णशरमिति आचार्या आमनन्ति । साग्नेः यदा कदाचित् पर्णशरदाहे त्रिदिनाशौचम् । निरग्नेस्तु दशाहोत्तरं पर्णशरदाहे त्रिदिनाशौचम् अन्यथा दशाहमध्ये त्रिदिनाशौचपालनेन 'प्रोषिते कालशेषः स्यात्' इति याज्ञवल्क्यवचनं (3/21) निरर्थकं स्यात् ।

134 -अस्थिसङ्ख्यानिरूपणे सुश्रुताचार्याः (5/18) कथयन्ति यत् 'त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते । शल्यतन्त्रे तु त्रीण्येव शतानि । तेषां सविंशमस्थिशतं शाखासु, सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोरःसु, ग्रीवां प्रत्यूर्ध्वं त्रिषष्टिः । एवमस्थ्नां त्रीणि शतानि पूर्यन्ते ।' इति । एतदनुरोधेन निर्णयसिन्धौ (P. 396) षट्त्रिंशन्मतम् -'कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिशतषष्टिभिः । पालाशीभिः समिद्भिर्वा सङ्ख्या चैव प्रकीर्तिता ॥' इति ।

अशीत्यर्धं तु शिरसि ग्रीवायां दश योजयेत् ।
उरसि त्रिंशतं दद्याज्जठरे विंशतिं तथा ॥
बाहुभ्याञ्च शतं दद्याद्द्यादङ्गुलिभिर्दश ।
द्वादशार्धं वृषणयोरष्टार्धं शिश्न एव च ॥
ऊरुभ्याञ्च शतं दद्यात् त्रिंशतं जानुजङ्घयोः ।
पादाङ्गुलिषु च दश एतत्प्रेतस्य लक्षणम् ॥
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ।
संस्कृत्य विधिनाग्निभिर्जलधारां ततो हरेत् ॥' 135

त्रिंशतं जानुजङ्घयोर्मध्य इत्यर्थः । यवपिष्टेन सक्तुनेति शेषः । रामवाजपेयिनस्तु 'विदेशस्थे साग्निशवे तदाधायनावधि पुत्रः कल्पसूत्रोक्त्या जुहुयात् । शवालाभेऽस्थिदाहः । अस्थ्नामलाभे पर्णदाहः । पर्णदाहानन्तरमस्थ्नां शवस्य वा लाभे तु दग्धशेषारणिना पुनरस्थिदाहः, शवास्थिपर्णानां क्रमप्राबल्यात् । अर्धदग्धारण्यलाभेऽस्थिशवयोः पुण्यमहाजले प्रक्षेपः । वृष्ट्यादिनाशान्तस्यार्धदग्धस्य शवस्याप्येवं क्षेपः । तदुक्तम्—

'विदेशस्थे साग्निशवे दह्यमाने वृष्ट्यादिभिः ।
विनष्टेऽग्नौ पूर्णदेहमस्थि वा लभ्यते यदि ॥
तदार्धदग्धारणिजवह्निनास्थि शवं दहेत् ।
यदास्थि नारणिदग्धस्तदास्थ्याद्यप्सु निक्षिपेत् ॥' इति वदन्ति ।

यद्यपि विज्ञानगिरिणा 136 'आहिताग्निश्चेत् प्रवसन् म्रियेत पुनः संस्कारं कृत्वा शववच्छौचमिति गौतम' इति वसिष्ठस्मृत्या (4/37) साग्नेः पर्णास्थिदाहे दशाहमशौचमुक्तम्, शुद्धिगुच्छेऽपि—

135—आश्वलायनोक्तवचनेनानेन सह निर्णयसिन्धु (P. 396) धृतभविष्यपुराणवचनस्यासामञ्जस्यं भवति । भविष्यपुराणवचने उरसि विंशतिं कट्यां त्रिंशतं दद्यात् । अङ्गुलि वृषण-शिश्नेषु पर्णन्यासं न कुर्यात् । उभयवचने पत्रसंख्या षष्ट्यधिकं शतत्रयम् । किन्तु, निर्णयसिन्धु P. 396) तत्रैव यज्ञपार्श्ववचने पादाङ्गुलिषु पत्रद्वयस्य न्यासः सूचितो यस्मात् यज्ञपार्श्ववचनानुसारमस्थिसङ्ख्या द्विपञ्चाशदधिकं शतत्रयम् । व्यवस्थाभिन्नेषु स्वगृह्योक्तविधिः स्वीकर्त्तव्यः ।

136—'यदा तु प्रोषितमरणे शरीरं न लभ्यते तदाऽस्थिभिः प्रतिकृतिं कृत्वा तेषामप्यलाभे पर्णशरैः शौनकादिगृह्योक्तमार्गेण प्रतिकृतिं कृत्वा संस्कारः

'घृताक्तोर्णोत्तराच्छाद्य दग्ध्वा दद्युर्जलाञ्जलिम् ।
दशाहाशौचिनः सर्वे भवेयुस्ते ततः परम् ॥'

इति साग्निनिरग्निसाम्येन दशाहाशौचमभिहितम्, तत्सर्वं राम-सिंहवाजपेयि-कालिदासादिभिस्त्रिदिनाशौचाभिधानान्नादेयम् । वसिष्ठोक्तिः पुत्रविषयिका । अतएव नारायणभाष्ये पर्णदाहानन्तरं पुनरस्थिलाभे तदाह्यमिदं वसिष्ठवाक्यं च लिखित्वा दशाहाशौचं नोक्तम् । तद्वाक्यान्ते गौतम-पदं पूर्वार्थमेव न तु विकल्पार्थमित्यप्युक्तम् । पर्णदाहकालस्तु—

'गतस्य न भवेद्वार्त्ता यस्य द्वादशवार्षिकी ।
प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः ॥
यन्मासि यदहर्यातस्तन्मासि तदहः क्रिया ।
दिनाज्ञाने कुहू 137स्तस्य आषाढस्याथवा कुहूः ॥' (यमः) इति ।

आषाढस्येति दिनमासोभयाज्ञाने तदन्यतराज्ञाने च । सुतैर्बान्धवैः सगोत्रैश्चेत्यर्थः । तेन सपुत्रापुत्रतुल्यमिदमिति कालसर्वस्वे 138 बहुलीकृतम् । मरणश्रुतौ च,

'श्रुताहात् प्रेतकृत्यं तु आत्रिपक्षं समाचरेत् ।'

इत्यवोचामः । अश्रुत्वा पितुर्द्वादशवार्षिकपर्णदाहे तु पुत्रस्य त्र्यहाशौचम् ।

कार्यः । अशौचघात् दशाहादिकमेव । 'आहिताग्निश्चेत् शवत्रदाशौचम् ।' इति वसिष्ठस्मरणात् ।' इति (याज्ञ० मिता० 3/1-2) । विज्ञानगिरिरः विज्ञानेश्वरः ।

137—कुहूः नष्टचन्द्रा, उक्तं यथा निर्णयसिन्धौ (P. 43) व्यासेन—'दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः स्मृता ।' इति । व्याप्तिप्रसङ्गे 'तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता । साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥' इति प्रचेतोवचनात् निर्णेतव्यम् । कुहूप्रतिपादने इदं निरग्निकविषयमिति ज्ञातव्यम्, 'सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि । स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥' इति तत्रत्यलौगाक्षिवचनात् ।

138—'कालनिर्णयदीपिकायां सपुत्रापुत्रसाधारण्येन पञ्चदशवर्षोत्तरम् एव कालो निरूपितस्तत्सर्वं शम्भुकर-विप्रमिश्र रघुनन्दनादिभिरलिखिताच्छिष्टैर्नाद्रियते ।' इति ।—मत्सम्पादित'कालसर्वस्व'स्य पार्वणकालनिरूपणप्रकरणं द्रष्टव्यम् ।

दशाहवाक्ये श्रुत्वेतिलिङ्गात्, पितुः द्वादशाब्दिकपर्णदाहारम्भकाले मातृमृति-श्रुतौ मातुः क्रियापूर्वकं दशाहाशौचम् , पितृपर्णदाहस्य कुह वन्तरेऽवकाशात् । अस्याप्रधानकालबाधायोगाच्च । पितुः पर्णदाहाशौचमध्ये मातृमृतौ क्रियैक्येऽपि पुत्रादीनां मातृकृतं दशरात्राशौचमेव । 'मातुः पिता शोधक' इति ज्ञायमानमरणविषयकम् । काल्पनिकात् प्रत्यक्षं बलवदिति ध्येयम् । न च द्वादशाब्दिककाल्पनिकपर्णदाहोत्तरं कदाचिज्जीवत्पितुः सत्यमरणश्रुतौ प्रत्यक्ष-श्रवणेन पुनः दशाहाशौचापत्तिरिति वाच्यम् । श्रुत्वेत्यस्य जीवन्न्यासाद्युत्त-रक्रियाशौचाभावपूर्वकत्वेन विशेषात् । अन्यथा क्रियापूर्वं द्वितीयतृतीया-दिवारश्रवणेऽपि पुनः शौचाद्यापत्तिः । जीवन्न्यासेतिविशेषात पर्णदाहोत्तरं जीवत्पितुर्दर्शने जीवन्न्यासवतः पुनर्मृतिश्रुतौ पुत्रस्य न दशाहाशौचाभावः । जीवन्न्यासविधिश्च कालादर्शकालतत्त्वादौ दर्शितः । यत्तु शुद्धिगुच्छे,

'मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ।' 139

इत्यनुगमनाभावेऽपि

'भर्त्तुः पुनाति वै नारी तमात्मानं मृतानुगा ।'

इति वचनाच्छूद्रादिस्त्रीणां भर्त्रनुगमने

'त्र्यहाशौचे व्यतीते तु श्राद्धमाप्नोति शास्त्रवत् ।'

इति वचनात् त्र्यहाशौचमुक्तम् , तन्न सामाचारिकम् ।

अथ प्रेतनिर्हरणविधिनिषेधाः ।

'विशेयुरुदिते सूर्ये निशादाहसमापने ।
दिवा दाहसमाप्तिश्चेद् ग्रामं नक्षत्रदर्शने ॥' 140

सूर्यनक्षत्रेतिदिवारात्रकालोपलक्षणम् । तेन मेघादिना सूर्यर्क्षयोरदर्शनेऽपि न क्षतिः । ग्रामशब्दस्य नगरक्षेत्रस्य भिन्नवाचकत्वात् काशीपुरीपुरुषोत्तमादि-व्युदासः । अत एव

---

139 'इतरेषां तु वर्णानां स्त्रीधर्मोऽयं व्यवस्थितः ।' इति(शुद्धिकौ०-P.84) । व्यासवचनस्यापरार्धम् ।

140—'दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् । पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ॥' इति मनूक्तवचनेन (5/92 यथा प्रेतनिर्हरणनियमो दर्शित-स्तथा प्रेतस्याग्निसंस्कारात्परं दाहकारिणो निशादाहसमाप्तिश्चेत् सूर्योदया-त्परं, दिवा दाहसमाप्तिश्चेत् तारकाचन्द्रोदयात्परं गृहमागच्छेयुरिति विधिः ।

'ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित् ।
ग्रामस्य तावदाशौचमि'ति । (वृद्धमनुः)

अत्र पूर्वोक्ते क्षेत्रे दोषानाचारः । कार्यवशादकाले ब्राह्मणानुमत्या वा दाहं कृत्वा गृहे प्रवेशः ।

'प्रेतोपस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनाद् ब्राह्मणानुमत्या त्वि'ति हारीतात् । यमः—

'यस्यानयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च ।
प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यते ॥' इति ।

देवलः— 'चण्डालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित् ।
पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचिताः ॥' इति ।

कर्हिचित् शिष्टेतिसामान्याच्च शवदाहवह्नोमश्राद्धादिकर्ममात्रे अशुद्धिः सूचिता । अग्न्यन्तरालामे तु ईदृशदुष्टाग्निभिः कार्यनिर्वाहः सम्भवः 141 ।

ब्राह्मे— 'अशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान् ।
तेषां मध्ये सनाथस्तु दग्धव्यश्च न चान्यथा ॥'

मध्ये सगोत्रदृष्टिसन्निधौ ।

अपत्ये भ्रातरि गुरौ कलत्रे च मृते सति ।
स्नात्वोपवासं कुर्वीत श्रुत्वा कालान्तरेष्वपि ॥'

गुरुः पितृमातृवद्दीक्षाविद्यादात्रादिः । अशक्तौ पित्रोर्मृतिं विनाऽन्यत्र सक्तु-फलादिभक्षणम् 142 ।

'प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत् ॥'
'प्रथमेऽहनि यद् द्रव्यं तदेव स्याद्दशाहिकम् ॥' 143

द्रव्यं तण्डुलादिकम् ।

141—अत्र लौकिकस्यासंस्कृतस्याग्नेर्ग्रहणं सूचितं न तु चण्डालादिदुष्टाग्ने-रिति । विज्ञानेश्वरः (याज्ञवल्क्यमिताक्षरा 3/1-2) अत्र 'यमसूक्तं जपद्भि-र्लौकिकेनासंस्कृतेनाग्निना दग्धव्यो यदि जातारणिर्नास्ति' इति आह ।

142 फलमूलादिभक्षणेनात्रोपवासस्य हानिर्न भवति, यथा चोक्तं अष्टैतान्य-व्रतघ्नानि आपो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥' इति । पितृमृतौ एतेषामभावः पितृपिण्डदानाभिप्रायेण ।

143—याज्ञवल्क्यमिताक्षरा (/16) धृतसम्पूर्णवचनं यथा—'असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् । प्रथमेऽहनि यो दद्यात्स दशाहं

'वहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः ।
सर्वेषामनुमन्तव्यं ज्येष्ठेनैव तु यत्कृतम् ।।' (मरीचिः)

अनुमन्तव्यमित्यनेन ज्येष्ठाभावे कनिष्ठस्य क्रिया सूचिता ।

विष्णुपुराणे (3/13/30-32)—

'पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः ।
सपिण्डसन्ततिर्वाऽपि क्रियार्हो नृप जायते ॥
तेषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षसपिण्डेन सम्बद्धा ये जलेन वा ।
कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्याः क्रिया नृप ! ॥'

'प्रथमेऽहनि यो दद्यात्प्रेतायान्नं समाहितः ।
यत्नान्नवसु चान्येषु एक एव ददात्यपि ॥' इति

ब्राह्मे यत्नादितिपदं प्रथमादिपिण्डदातुः रोगबन्धमृत्यादिना कदाचिद्-सत्त्वेऽपि तदन्येन तृतीयचतुर्थादिकर्म समापनीयमिति प्राञ्चः । उत्तरषोडशेऽप्येवम् । क्रियाकर्त्तृरङ्गत्वेन तदर्थं प्रधानकर्मावृत्त्ययोगात् इत्याशयः ।

लघुहारीतः—'सपिण्डीकरणं यावत्प्रेतश्राद्धानि षोडश 144 ।
पृथगेव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् ॥'

पृथग्द्रव्या विभक्ताः । षोडशेत्यनेन वार्षिकमहालयादीनां पृथक्क्रिया सूचिता ।

ब्राह्मे— म्रियमाणो बहिर्नेयः स्थाप्यः शूद्रगृहेऽथवा ।
मृण्मयानि तु भाण्डानि सर्वाणि तु समुत्सृजेत ॥
सगोत्रैर्गृहीत्वा तु चितामारोप्यते शवः ।
अधोमुखो दक्षिणादिक्चरणस्तु पुमानिति ॥
उत्तानदेहा नारी तु सगोत्रैरपि बन्धुभिः ॥ 145

समापयेत् ॥ शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् । प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् ॥' इति ।

144—'द्वादश प्रतिमास्यानि आद्यं षाण्मासिकं तथा । सपिण्डीकरणञ्चैव एतद्वै श्राद्धषोडशम् ॥' – कात्यायनस्मृतिः (24/8) ।

145 - प्रेतनिर्हरणदाहादिव्यवस्था यथा कात्यायनस्मृतौ (21/3-14)— 'दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतम् । दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् ॥ घृतेनाभ्यक्तमाप्लाव्य सवस्त्रमुपवीतिनम् । चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषितम् ॥ हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु ।

सगोत्रजैरिति सम्भवपरम् , 'न विप्रं स्वेषु तिष्ठत्स्वि'तिप्रागुक्तेः, श्रौतस्मार्ताग्नेस्तु प्राक्शिरस्त्वं कात्यायनात् । यत्तु,

'तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे ।
आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम् ॥'

इतिस्मृतिस्तत् प्रत्यक्षश्रुतिमूलेन 146 कात्यायनकल्पसूत्रेण बाध्यते , न तु

मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः ॥ आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम् । एकोऽनुगच्छेत्तस्यार्धमर्धं पर्युत्सृजेद्भुवि ॥ अर्धमादहनं प्राप्त आसीनो दक्षिणामुखः । सव्यजान्वाच्य शनकैः सतिलं पिण्डदानवत् ॥ अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत् । भूप्रदेशे शुचौ देशे पश्चाच्चित्यादिलक्षणे ॥ तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे । आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम् ॥ पादयोरधरां प्राचीमरणीमुरसीतराम् । पार्श्वयोः शूर्पचमसे सव्यदक्षिणयोः क्रमात् ॥ मुसलेन सह न्युब्जमन्तरूर्वोरुलूखलम् । चात्रौविलीकमत्रैवमनश्रुनयनो विभीः ॥ अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः । अथाग्निं सव्यजान्वक्तो दद्याद्दक्षिणतः शनैः ॥ अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहेति यजुरीरयन् । एवं गृहपतिर्दग्धः सर्वं तरति दुष्कृतम् । यश्चैनं दाहयेत्सोऽपि प्रजां प्राप्नोत्यनिन्दिताम् ॥' इति । छिन्द्राणि शरीरे नव भवन्ति । नाभेरूर्ध्वं नयनद्वय कर्णद्वयं नासारन्ध्रद्वयं मुखगह्वरं चेति सप्त मेध्यानि नाभेरधो मलमूत्रोत्सर्गस्थानद्वयममेध्यमिति नव । स्त्रीणामधिकानि त्रीणि, स्तनरन्ध्रद्वयं रक्तवहस्थानं च । तदुक्तं सुश्रुतशारीरकसूत्रे 5/10) -'श्रवण नयन वदन-घ्राण-गुद मेढ्राणि नव स्रोतांसि नराणां बहिर्मुखानि. एतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवह च ।' इति । 'चात्रमोविली च सारयुक्तखदिरादिकाष्ठनिर्मितं मुनिभिः प्रशस्यते । चात्र नाम मन्थनदण्डम्, चात्रोर्ध्वभागनियन्त्रणार्थः काष्ठविशेष ओविली ।' इति कर्मप्रदीप प्रभा-टीकाकारः । निर्हरणे पि वर्णानुसारं व्यवस्था कृता मनुना (5/92) -'दक्षिणेन मृतं शूद्रमि'त्यादि ।

1.6—कल्पसूत्राणां प्रत्यक्षवेदमूलत्वेन प्रामाण्यं विचारितं जैमिनीयन्याय-(मालायां-1/3/7) यथा-'अपौरुषेयाः कल्पाद्याः कृत्रिमा वा न कृत्रिमाः । श्रुतिस्मृत्योर्धर्मबुद्धेः स्वतो मात्वं यतः समम् ॥ पुंनामोक्तेः पौरुषेयाः काठकाद्यसमत्वतः । तत्रोपलेभिरे केचिदापस्तम्बादिकर्तृताम् ॥' इत्यादि ।

विकल्पः, अतुल्यबलवत्त्वात् । नारायणभाष्ये तु प्राक्शिरस्त्वं यजुर्वेदिनामन्येषां दक्षिणाशिरस्त्वमिति व्यवस्था दर्शिता । वस्तुतः तुल्यबलानां व्यवस्थाविरहात् बाधपक्षो ज्यायान् । अथौदुम्बरिस्पर्शसर्ववेष्टनयोः स्थानद्वयेऽवकाशस्य सुवचत्वाद् बाधमात्रं तु 147 लुप्येत । एवमाचारोऽस्तीति चेत्यादियुक्तिकृताः स्मः । आदिपुराणे –

मृतः स्नातो वस्त्रमाल्यैः पुष्पगन्धैरलङ्कृतः ।
श्मशानभूमिर्नेतव्यो बान्धवैरनहङ्कृतैः ।'

गन्धपदं घृततैलादिना गन्धोपलक्षणमिति नारायणभाष्यम् । कौर्मे च –

'स्वदेहं पुण्यतीर्थेषु त्यक्त्वा मुच्येत किल्बिषात् ।'

आग्नेये 148—

सस्कृतस्यासंस्कृतस्य स्वर्गो मोक्षो हरिस्मृतेः ।

स्मृतिर्ज्ञानसामान्यम् । तेनेष्टविष्णुनामश्रवणमुच्चारणं मनसा तद्रूपध्यानं च त्रय विवक्षितम् । अत्रापि नारायणस्मृतिः प्रधानम् 'अन्ते नारायणस्मृतिरि'ति वचनात् । सम्वर्त्तः—

'वर्जयेयुः स्त्रिय मांसं शरीरंश्च पृथक्क्षितौ ।'

147—'श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी । अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा ॥' इति जाबालवचनात् श्रुतेः प्राबल्यमुक्तम् । तत्र ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये स्थापिताया औदुम्बरीशाखायाः सर्ववेष्टनस्पर्शयोर्विरोधसमाधाने माधवाचार्य (जैमिनीयन्यायमाला 1/3/2) आह –'औदुम्बरी वेष्टनीया सर्वेत्येषा स्मृतिर्मितिः । अमितिर्वेति सन्देहे मितिः स्यादष्टकादिवत् ॥ औदुम्बरीं स्पृशन्गायेदितिप्रत्यक्षवेदतः । विरोधान्मूलवेदस्यानुमानान्न मानता ॥' इति ।

148 - 'अस्थ्नां गङ्गाम्भसि क्षेपात्प्रेतस्याभ्युदयो भवेत् ।' इति (अग्निपु० 159/1) उत्तरार्धम् । अत्र स्मृत्या जपस्य प्राधान्यं ज्ञातव्यम् । मनुरपि 'ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥' (2/86-87) इत्युक्तवान् । विष्णुनामस्मरणे फलमुक्तं शाण्डिल्यभक्तिसूत्रस्य (1/1/6) स्वप्नेश्वरभाष्ये यथा-'विद्वेषादपि गोविन्दं दमघोषात्मजं स्मरन् । शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः ॥' इति । ध्यानफलं तत्रैव (2/2/76) यथा –'महापातकयुक्तोऽपि

क्षिताविति खट्वादिनिषेधो नास्तरणादेः 149 । इदं च सञ्चयनादूर्ध्वम् ।

'शय्यासनोपभोगश्च सपिण्डानामपीष्यते ।
भस्मास्थिचयनादूर्ध्वं संयोगो न तु योषिताम् ॥'

इति विष्णुपुराणात् (3/13/16) । विष्णुः (19/13) –'यावदाशौचं तावत्प्रेतस्योदकं पिण्डमेकं च दद्युः ।' 150 इति । यद्यप्यैतद्वचनाद्दशदिनेषु दशपिण्डनियामकत्वात् त्रिंशद्दिनाशौचस्थलेऽपि त्रिंशत्पिण्डा देया इति लभ्यते तथापि पक्षिण्यां प्रथमे त्रयः ।

'प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥' (पारस्करः)
'शूद्राणां दशसः पिण्डो मासे पूर्णे विधीयते ॥'

इत्यादिवक्ष्यमाणवाक्यालोचने पिण्डवत् तद्गतदशत्वसङ्ख्यापि सर्वत्र प्रधानम्, प्रतिप्रधानवृत्तिर्गुणाः निर्विरुद्धा इति न्यायात् । तेन पक्षिणी त्रि दशद्वादशदिनमासाशौचेषु सर्वपक्षेषु दशपिण्डा एव न न्यूनाधिका इति सिद्धम् । अत एव 'प्रथमे दिवसे देया' इत्यादिपराशरोक्तदशव्यवस्थानुसारं द्वितीयेऽह्नि

ध्यायन्निमिषसच्युतम् । पुनस्तपस्वी भवति पङ्क्तिपावनपावनः ॥' इति । विष्णुनामश्रवणफलमपि 'य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् । नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥' चेत्यादि ।

149 — 'शावाशौचेऽशौचिनः मांसस्त्रीवर्जनपूर्वकं भूमौ पृथक्शयनं कुर्युः । गौतमेनात्र (2/5/35-37) 'अधःशय्यासनिनो ब्रह्मचारिणः सर्वे । न मार्जयीरन् । न मांसं भक्षयेयुराप्रदानात् ।' इत्युपन्यस्तम् । वसिष्ठेनापि (4/14-15) 'गृहान्व्रजित्वा प्रस्तरे त्र्यहमनश्नन्त आसीरन् । अशक्तौ क्रीतोत्पन्नेन वर्त्तेरन् ।' इत्युक्तम् । याज्ञवल्क्येन (3/16) च 'क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितौ ।' इति दर्शितम् । मनुना (5/73) चात्र विशेष उक्तः—'अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् । मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ॥' इति । प्रस्तरपदव्यवहारात् अशौचिनां शयनासनार्थं तृणमयप्रस्तरमास्तरणं स्वीकर्त्तव्यम् । प्रसङ्गेऽस्मिन् स्मृतिकारैरशौचिनां खट्वादौ शयनं सर्वथा निषिद्धं प्रेतकृत्यसमापनाभावात् ।

150—शावाशौचे यावन्त्यशौचदिनानि सिद्धान्तितानि तत्समाप्तिं यावत् प्रतिदिनं प्रेताय तद्बान्धवा अधिकैकोत्तरं पिण्डोदकं दद्युः ।

सप्त मासाशौचपक्षे विंशतिदिनान्यशुचिर्भूत्वाऽनन्तरदशदिनेषु दश पिण्डाः देयाः । दशपिण्डानामेव दानमिति गोपीनाथः । मासमध्ये शूद्रापुत्रस्य पितृमृतिश्रुतौ मासाशौचम् । श्रवणदशाहाशौचस्य मासानन्तरं सावकाशत्वेनोत्सर्गमरणाशौचत्यागायोगात् । 'गुरुणा लघु शुद्ध्येते'तिवचनाच्च । मासानन्तरं शूद्रापुत्रस्य पितृमृतिश्रुतौ तु मासाशौचम्, श्रवणदशाहवचने दशाहपदस्य चातुर्वर्णिकपूर्णाशौचार्थकत्वात् । वस्तुतस्तु, मासानन्तरमपि शूद्रापुत्रस्य दशाहाशौचमेव पालनम् । पूर्णाशौचार्थकत्वे वीजाभावात् । शूद्राणामपि पाक्षिकदशाहाशौचसत्त्वाच्चेति समासः । प्रचेताः -

'असंस्कृतानां भूमौ पिण्डं दद्यात् संस्कृतानां कुशेषु ।'

संस्कृता उपनीताः । याज्ञवल्क्यः (3/3)—

सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ॥ 151

---

151 – सप्तमदिवसाद्दशमदिवसादर्वाग्वा सपिण्डाः समानोदकाः सगोत्राश्च ज्ञातयः 'शरीरमग्निना संयोज्यानवेक्षमाणा अपोऽभ्यवयन्ति ।' इति वसिष्ठ-(4/11) वचनात् शवसंस्कारानन्तरं निर्दिष्टासु तिथिषु स्नानपूर्वकं प्रेताय नामगोत्रोच्चारणेन सह तिलोदकं दद्युः । मित्रमिश्रस्तु 'सप्तमादिति ल्यब्लोपे पञ्चमी, तेन सप्तमं व्याप्य ज्ञातयः सपिण्डाः, सप्तमादूर्ध्वं दशमं पुरुषं व्याप्य ज्ञातयः सकुल्याश्च, अपिकारेण समानग्रामवासिनां व्यवहितसम्बन्धानां ग्रहणम् ' इति 'संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामः प्रसिञ्चत्यञ्जलिनाऽसावेतत्त उदकमि'ति पारस्करवचनात् (3/10/13-2) यत् प्रतिपादयति तदसाधारणसम्पन्नानामेव । तिलोदकदानं 'प्रथमतृतीयसप्तमनवमेषूदकक्रिया ।' इति गौतम (2/5/38) वचनात् अयुग्मासु तिथिषु कार्यम् । 'प्रेतस्य वान्धवा यथावृद्धमुदकमवतीर्य नोद्धर्षयेयुरुदकान्ते प्रसिञ्चेयुरपसव्ययज्ञोपवीतवाससो दक्षिणाभिमुखा ब्राह्मणस्योदङ्मुखाः प्रत्यङ्मुखाश्च राजन्यवैश्ययोः ।' इति विज्ञानेश्वरधृतप्रचेतोवचनात् 'सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्नयुग्मासु दक्षिणामुखाः । पितॄणां वा एषा दिग् या दक्षिणा ।' इति वसिष्ठ (4/12-13) वचनाच्च निर्दिष्टदिगभिमुखा जलाञ्जलीन् दद्युः । 'दक्षिणेन मृतं शूद्रम्' इत्यादिमनु (5/92) वचनात् प्रेतनिर्हरणे वर्णानुसार यथा दिङ्नियमस्तथाऽत्र ब्राह्मणादद्विजातिप्रेतोदकदाने दक्षिणोदक्प्रत्यग्दिङ्नियमः पालनीयः । जलाञ्जलिसङ्ख्या च न्यूनाधिका, यथा

आपस्तम्बः (1/10/6) – 'अनुभाविनां च परिवापनम् ।' इति । 152
अनु भावयन्तो दुःखमित्यनुभाविनः सपिण्डाः । क्षौरं च दशमेऽह्न्येव ।

'दशमेऽहनि सम्प्राप्ते स्नानं ग्रामाद् बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥' इति देवलात् ।

गौतममिताक्षराकारः हरदत्त आह—'प्रथमे त्रीन्, तृतीये नव, सप्तमे त्रिंशत्, नवमे त्रयस्त्रिंशत् इति पञ्चसप्ततिर्जलाञ्जलयो देयाः ।' इति । विज्ञानेश्वरमित्रमिश्रौ तु 'दिने दिने ञ्जलीन्पूर्णान्प्रदद्यात्प्रेतकारणात् । तावद् वृद्धिश्च कर्तव्या यावत्पिण्डः समाप्यते ॥' इति प्रचेतोवचनमुपन्यस्य दशमपिण्डसमाप्ति यावत्प्रतिदिनमञ्जलीनामेकाधिकवृद्धिनिमित्त व्यवस्थां प्रदर्शयतः । तिलोदकाञ्जलिदानार्थं ऋग्वेदीयमन्त्रो (1/7/5) यथा – 'अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम् । अप नः शोशुचदघम् ॥ सुक्षेत्रिया सुगातुया वसुया च यजामहे । अप नः शोशुचदघम् ॥ प्रयद्भान्दष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघम् ॥ प्रयत्ते अग्ने सुरयो जायेमहि प्र ते वयम् । अप नः शोशुचदघम् ॥ प्रयदग्नेः सहस्वतो विश्वतो यन्ति भानवः । अप नः शोशुचदघम् ॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि । अप नः शोशुचदघम् ॥ द्विषो नो विश्वतोमुखातिनावेव पारय । अप नः शोशुचदघम् ॥ स नः सिन्धुमिव नावयातिपर्षाः स्वस्तये । अप नः शोशुचदघम् ॥' इति । अत्र सुस्पष्टं भाष्यं सायणाचार्यैर्कृतं तद्यथा—'हे अग्ने नोऽस्माकमघ पापमपशोशुचत् अस्मत्तो निर्गत्य अस्मदीयशत्रुं शोचयतु यद्वा अस्मदीयं पापं शोशुचत् शोकग्रस्तं सत् विनश्यतु अपि चास्माकं रयिं धनमासमन्तात् शुशुग्धि प्रकाशय । उक्तार्थमपि वाक्यम् आदरातिशयद्योतनाय पुनः पठ्यते अवश्यमस्माकमघं विनश्यत्विति । शोशुचत् शुच शोके अस्माद्यङ्लुगन्तात् लेड्यागमः अदादिवच्चेतिवचनाच्छपो लुक् अभ्यस्तानामादिरित्याद्युदात्तत्वम् । अघं शोशुचच्च रयिं शुशुग्धि चेति चार्थप्रतीतेश्चादिलोपे विभाषेति निघातप्रतिषेधः । शुशुग्धि शुच दीप्तौ लोटि बहुलं छन्दसीति शपः श्लुः हुझल्भ्यो हेर्धिः चोः कुरिति कुत्वम् ।' इत्यादि ।

152 – शावं दुःखमनुभवन्तीति अनुभाविनोऽथवा अनु पश्चाद् भूता जाता ये तेऽनुभाविनः । तेषामवरवयसां पुत्रादीनां केशपरिवापनं कर्तव्यम् । सपिण्डेषु अग्रजानां श्मश्रुनखादिच्छेदनं कर्तव्यम् । 'गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ । आधानकाले सोमे च वपनं सप्तसु स्मृतम् ॥' इति विज्ञानेश्वरधृत (याज्ञ० मिता०-3/.7) वचनात् अनुभाविनः पुत्रा इति भवेत् ।

केशसामान्यात्कक्षोपस्थशिखादेरपीति प्राञ्चः । तच्च शूद्रपरम् । उत्कलब्राह्मणे कक्षोपस्थशिखां विनेति निषेधादनाचारः । श्मश्रुसाहचर्यात् स्त्रीणां वपनाभावश्च । न च

'वपनं नैव नारीणां नानुव्रज्याजपादिकम् ।'

इति पराशरात् सिद्धे निषेधे किमीदृशयुक्त्येति वाच्यम् ।

'सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलद्वयम् ।
सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम् ॥' 153

इति द्व्यङ्गुलकेशच्छेदप्राप्तौ सर्वत्रैवं हीति गङ्गादितीर्थेषु अपि स्त्रीणां द्व्यङ्गुलकेशच्छेदबोधकम् । वृहन्मनुः—

'प्रायश्चित्ते समुत्पन्ने प्रेतकृत्येषु योषिताम् ।
निषिद्धं वपनं केचित्तीर्थेष्वपि यथेच्छया ॥'

इच्छयेति देशविकल्पः । दाक्षिणात्ययोषितां गङ्गादौ सर्वशिरःक्षौरम् । उत्कलस्त्रीणां तदभावः । रघुनन्दनस्तु प्रयागे सर्वस्त्रीणां सर्वमुण्डनमित्युक्तवान् । दशमेऽहनि वासांसीति मासाद्युपलक्षणम् ।

'आज्ञया नरपतेर्द्विजन्मनां दारकर्ममृतसूतके तथा ।
बन्धमोक्षणमखागमेष्वपि क्षौरमिष्टमखिलेषु षोड्षु ॥' 154

153—आपस्तम्बस्मृतौ (1/33) 'एवमेव तु नारीणाम्' इति तृतीयचरणपाठः । यमस्मृतौ (श्लो० 54, 55) तु प्रथमश्लोकार्धेन सह 'एवमेव तु नारीणां मुण्डमुण्डापनं स्मृतम् ॥ न स्त्रिया वपनं कार्यं न च वीरासनं स्मृतम् । न च गोष्ठे निवासोऽस्ति न गच्छन्तीमनुव्रजेत् ॥' इति पाठः । न केवलं नारीणामपि च बहुश्रुतब्राह्मणादीनां वपनाभावः, यथा (यमः 56)—'राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः । अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ॥' इति । प्रायश्चित्तकरणेऽपि 'केशानां रक्षणार्थं च द्विगुणं व्रतमादिशेत् । द्विगुणे तु व्रते चीर्णे द्विगुणैव तु दक्षिणा ॥' इति (यम०-57) तेषां वपन सर्वथा निषिद्धम् ।

154—निर्णयसिन्धौ (P. 416) 'मृतसूतकेषु च', 'मोक्षमखदीक्षणेष्वपि' इति पाठेन रत्नमालावचनम् । अत्र कमलाकरः 'आशौचमनुभवतां पुंसां सर्वाशौचे तु मुण्डनं संसूच्य 'अत्र देशाचारतो व्यवस्थे'त्युक्तवान् । राजाज्ञया सर्वं कार्यम् , यथा मनुः (7/13)—'तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नरा-

इति सुप्रकाशोक्तम् । मरीचिः—

'लवणे मधुमांसे च पुष्पमूलफलेषु च ।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च ॥
तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः ।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥'

पक्वं स्विन्नतण्डुलमरीचादि । अपक्वं गोधूमादि । स्वयंग्रह इत्यनेन स्वाम्यनुमत्यभावेन सर्वमिदं शुद्धं नान्यथेति सूचितम् । जलादिकमशुच्यस्पृष्टमेव स्वयंग्राह्यम् । हारीतः—

'मातापित्रोस्तु यत्प्रोक्तं ब्रह्मचारी तु पुत्रकः ।
व्रतस्थोऽपि हि कुर्वीत पिण्डदानोदकक्रियाम् ॥
भवत्यशौचं नैवास्य नैवाग्निस्तस्य लुप्यते ।
स्वाध्यायं च प्रकुर्वीत पूर्ववद्विधिदर्शितम् ॥'

'आदिष्टी नोदकं कुर्यादि'ति प्रागुक्तमनुवाक्यं पित्रोरितरपितृव्यभ्रात्रादिपरमिति भेदः । भवत्यशौचं नैवेति ब्रह्मचारिधर्महोमादावेव 155 । जाबालः—

धिपः । अनिष्टं चाप्यनिष्टेषु त धर्मं न विचालयेत् ॥' इति । द्वितीये आधानकाले वपनं पूर्वत्र प्रतिपादितम् । तच्च 'आवसथ्याधानं दारकाले । दायाद्यकाल एकेषाम् ।' इति पारस्करगृह्य (1/2/1-2) वचनात् विवाहकाले दायविभाजनकाले वा भवेत् । विवाहकालस्तु दर्शितो मनुना (4/1), यथा—'चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥' इति । बन्धमोक्षणयोः काले राजाज्ञया वपनं सुस्थितम् । मखसम्पादनकाले सोमे च वपनमिति पूर्वोपलक्षणाद्वपनमुचितम् । आगमकाले उपनयनकाले यज्ञदीक्षायां वा । उपनयनकाले 'तं च. पर्युप्तशिरसमलङ्कृतमानयन्ति ।' इति पारस्करगृह्य (2/2/5) वचनान्निर्दिष्टम् । तेन सह चूडाकरणकेशान्तसंस्कारकालद्वये च 'शीतास्वप्सूष्णा आसिञ्चति उष्णेन वा या उदकेनेह्यदिते केशान्वपेति । केशश्मश्रुवि‍ति च केशान्ते ।' इति पारस्करगृह्य-(2/1/6-7) वचनात् वपनं कर्तव्यमिति । 'संस्क्रियां यजमानगा' इति जैमिनीयन्यायमाला (3/8/3) वचनात् सर्वत्र वपनं यजमानस्यैव ।

155—कृतोपनयनो ब्रह्मचारी 'नित्यं स्नात्वा शुचिः कुर्याद् देवर्षिपितृतर्पणम् । देवताऽभ्यर्चनं चैव समिदाधानमेव च ॥' इति मनु (2/176) वचनात् स्वाध्यायेन सह गुर्वर्चनादिकं कुर्यात् । होमनियमश्च तत्र (2/186) 'दूरादाहृत्य समिधः सन्निदध्याद्विहायसि । सायम्प्रातश्च जुहुयात्ताभिरग्निमत-

'सन्ध्यां पञ्च महायज्ञान्नैत्यकं स्मृतिकर्म च ।
तन्मध्ये हापयेत्तेषामशौचान्ते पुनः क्रिया ॥'

नैत्यकं समन्त्रनित्यस्नानादिकम् 156 ।

'तूष्णीमेवावगाहेत यदि स्यादशुचिः पुमान् ।'

न्द्रितः ॥' इति । शयनादुत्थाय ब्रह्मचारी 'स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः । सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥' इति याज्ञवल्क्य-(1/22) वचनानुसारं नित्यकर्मरूपेण गायत्रीजपं कुर्यात् । गुरोर्हिते सदा रतश्चायम् 'उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् । आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ॥' इति मनु (2/182) वचनादपि नित्यं भिक्षाचरणं कुर्यात् । एतैः कर्तव्यैः सह 'वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्ज-ने'त्यादिगौतम (1/2/19) वचनाद् ब्रह्मचारिणः कृते मधुमांसाशनादि निषिद्धमित्यादिब्रह्मचारिधर्मः ।

156– 'अहोरात्रयोः सन्धौ या क्रिया विधीयते सा सन्ध्या ।' इति विज्ञाने-श्वरवचनात् (याज्ञ० मिता०-1/24-25) सन्ध्या कर्मविशिष्टैव । 'सन्ध्या-हीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्वि'ति प्रागुक्तवचनात् सन्ध्यायाः कर्तव्यता सूचिता । प्रातर्मध्याह्नसायंकालेषु सन्ध्याया अनुष्ठानत्वेऽपि प्रातः सायं च तस्याः साधारणो व्यवहारः । अतः 'प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु । जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ॥ सन्ध्यां प्राक्प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ।' इति सावित्रीजपप्रकारविधाने याज्ञवल्क्येन(1/24-25) उक्तम् । प्रातःसन्ध्यायाम् 'ॐसूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुद-रेण शिश्ना अहस्तदवलुम्पतु यत्किञ्चिद् रितं मयि इदमहमापोऽमृतयोनौ सूर्ये ज्योतिषि परमात्मनि जुहोमि स्वाहा ॥' इति मन्त्रमुच्चारयेत् । सायंस-न्ध्यायाम् 'ओमग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद् रितं मयि इदमहमापोऽमृतयोनावग्नौ ज्योतिषि परमात्मनि जुहोमि स्वाहा ।' इति मन्त्रमुच्चारयेत् । मध्याह्नसन्ध्यायाम् 'ओमापः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम् , पुनन्तु ब्रह्मणस्पतिम् ब्रह्म पूता पुनातु माम् । यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापो असतां च प्रतिग्रहम् स्वाहा ब्रह्मयोने नमोऽस्तु ते ॥' इति

मन्त्रं चोच्चारयेत् । एते मन्त्राः सन्ध्याकालेष्वाचमनावसरे उच्चारणीयाः । पञ्च महायज्ञा उक्ताः । नैत्यकमुच्यते । 'सर्वः कल्ये समुत्थाय कृतशौचः समाहितः । स्नात्वा सन्ध्यामुपासीत सर्वकालमतन्द्रितः ।। अज्ञानाद्यदि वा मोहाद्रात्रौ यद्दुरितं कृतम् । प्रातःस्नानेन तत्सर्वं शोधयन्ति द्विजोत्तमाः ।।' इति विष्णु (2/2-3)—वचनात् तथा च 'गुणा दश स्नानपरस्य साधो रूपं च पुष्टिश्च बलं च तेजः । आरोग्यमायुश्च मनो निरुद्ध दुःस्वप्नघातश्च तपश्च मेधा ।।' इति दक्ष (2/14) वचनात्स्नानं कर्तव्यम् । समन्त्रस्नानार्थं द्विजानामधिकार एव, तदुक्तं याज्ञवल्क्यवीरमित्रोदये (1/22) ब्रह्मक्षत्रविशांचैव मन्त्रवत्स्नानमिष्यते । तूष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतम् ।।' इति । तत्र नाभिमात्रं जलं प्रविश्य ॐनमो नारायणायेत्यनेन चतुर्हस्तं चतुरस्रं जलं हस्तेनावच्छिद्य 'ओमापो हि ष्ठा मयो भुवस्तान ऊर्जे दधातन । महे रणाय चक्षसे ।। ॐयो वै शिवतमो रसः तस्य भाजयते ह नः । उशतीरिव मातरः ।। ॐतस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।।' इति (शुक्लयजुर्वेदः-पू० आ० 11/50,51,52) मन्त्रत्रयेण नद्यां वारत्रयं निमज्जेदिति । नद्याद्यभावे उद्धृतैर्जलैरपि नाभिमात्रजलप्रवेशं विना मन्त्रत्रयेण स्नानं समाचरेत् । अशौचेऽमन्त्रकं स्नानमुक्तं हारीतेन, यथा—'तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः । आचम्य च ततः पश्चात्स्नानं विधिवदाचरेत् ।।' इति । नित्यस्नानविधिर्यथा हारीतस्मृतौ (4/24-35)—स्नानार्थं मृदमानीय शुद्धाक्षततिलैः सह । सुमनाश्च ततो गच्छेन्नदीं शुद्धजलाधिकाम् ।। नद्यां तु विद्यमानायां न स्नायादन्यवारिणि । न स्नायादल्पतोयेषु विद्यमाने बहूदके ।। सरिद्वरं नदीस्नानं प्रतिस्रोतः स्थितश्चरेत् । तडागादिषु तोयेषु स्नायाच्च तदभावतः ।। शुचिदेशे समभ्युक्ष्य स्थापयेत्सकलाम्बरम् । मृत्तोयेन स्वकं देहं लिपेत्प्रक्षाल्य यत्नतः ।। स्नानादिकं समाप्यैव कुर्यादाचमनं बुधः । सोऽन्तर्जलं प्रविश्याथ वाग्यतो नियमेन हि । हरिं संस्मृत्य मनसा मज्जयेच्चोरुमज्जले । ततस्तीरं समासाद्य आचम्यापः समन्त्रतः ।। प्रोक्षयेद्वारुणैर्मन्त्रैः पावमानीभिरेव च । कुशाग्रकृततोयेन प्रोक्ष्यात्मानं प्रयत्नतः ।। स्योना पृथ्वीति मृद्गात्रे इदं विष्णुरिति द्विजाः । ततो नारायणं देवं संस्मरेत्प्रतिमज्जनम् ।। निमज्ज्यान्तर्जले सम्यक्क्रियते चाघमर्षणम् । स्नात्वाक्षततिलैस्तद्वद्देवर्षिपितृभिः सह ।। तर्पयित्वा जलं तस्मिन्निष्पीड्य च समाहितः । जलतीरं समासाद्य तत्र शुक्ले च वाससी ।। परिधायोत्तरीयं च कुर्यात्केशान्न धूनयेत् । न रक्तमुल्वणं वासो न नीलं च प्रशस्यते ।

इति योगीश्वरात् । पुनः क्रियेत्येतदशौचान्यकाले सन्ध्यादिव्यवस्थापकम् । अत एव नित्यप्रातर्सन्ध्यादेरनेन निषेधे षोडशिग्रहाग्रहवन्न 157 विकल्पशङ्का-गन्धोऽस्ति । तस्य व्यवस्यातो दौर्बल्यात् । सन्ध्या पञ्च महायज्ञा इत्यनेन नित्यसिद्धौ पृथङ्नित्यग्रहणे नैमित्तिककाम्ययोरप्युपलक्षणार्थम् । अत एव शुद्धिचन्द्रिकाऽऽह 158—

'सन्ध्या पञ्चमहामखादिविहितं स्मार्तं च कर्म त्रिधा त्याज्यमि'ति । सन्ध्यानिषेधेऽपि 'सूतके सावित्र्या चाञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन् नमस्कुर्यात्' इति पैठीनसिनोक्तं कुर्यात् । अञ्जलेरेकत्वेन तन्त्रयाचारे मूलं मृग्यम् ।

'दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तते ॥' (शङ्खस्मृतिः-15/25)

मलाक्तं गन्धहीनं च वर्जयेदम्बरं बुधः । ततः प्रक्षालयेत्पादौ मृत्तोयेन विचक्षणः ॥' इत्यादि ।

15 —'पर्युदासः स विज्ञेयो यत्र पूर्वपदेन नञ् । प्रतिषेधः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥' इति तदर्थकद्वयोर्लक्षणमुक्तम् । पर्युदासस्याशक्यत्वे प्रतिषेधाश्रयणं स्वीकृतमेव । तत्र ज्योतिष्टोमान्तर्गताङ्गयागातिरात्रे षोडशि-ग्रहणप्रसङ्गे 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाती-तिविचारो भवति । तत्र मीमांसान्यायप्रकाशकार आपदेवो (PP. 263-264) विचारयति यथा—'यत्र तु स (पर्युदासः) आश्रयितुं न शक्यते तत्र तन्-(त्रिकल्प) प्रसक्तावपि निषेध एवाश्रीयते, यथा नातिरात्रे षोडशिनं गृह्णाती-त्यत्र । अत्र ह्यतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तमतिरात्रे षोडशिग्रहणं प्रतिषिध्यत इति विहितप्रतिषिद्धत्वाद्विकल्पप्रसक्तावपि पर्युदासो नाश्रीयतेऽ-शक्यत्वात् । यद्यत्र नञः षोडशिपदेन सम्बन्धः स्वीक्रियते तदाऽतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थः स्यात् । तत्र चातिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधः । अत एवातिरात्रपदेन न नञः सम्बन्धः । अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधात् । अतश्चात्र पर्युदासस्या-नुपपत्तेर्निषेध एव स्वीक्रियते । विकल्पोऽपि स्वीक्रियतेऽनन्यगतेः । अतश्चै-तत्सिद्धम् यत्र तस्य ...। यत्र वा विकल्पाप्रसक्तावपि पर्युदास आश्रयितुं न शक्यते तत्र प्रतिषेधः । यथा नातिरात्रे षोडशिनं गृह्णातीति ।' इत्यादि ।

158—शुद्धिचन्द्रिकायाः (श्लोकः-4) सम्पूर्णवचनमत्र यथा—'सन्ध्यापञ्च-

स्वाध्यायो गुरुतो वेदाध्ययनं स्वतश्च । इदं च वेदाङ्गशिक्षाव्याकरणादेरप्यु-
159 पलक्षणमिति केचित् ।

'आयुर्वेदो धनुर्वेदो गान्धर्वो दण्डनीतयः ।'

इति चरकायुर्वेदधनुर्वेदयोरपि वेदत्वात्तयोरपि त्यागः। तदुक्तं धनुर्विद्यायां गोदावरीशगुरुणा—

'पौर्णमास्यां सन्ध्ययोश्च तथा मृतकसूतके ।
दिनक्षये महावाते विश्रामं कारयेद् गुरुरि'ति ।
'मासिकाब्दे तु सम्प्राप्ते कदाचिन्मृतसूतके ।
वदन्ति शुद्धौ तत्कार्यं दर्शे वाऽपि मनीषिणः ॥'

मासिकाब्दपदं त्रिपक्षषाण्मासिकादेरुपलक्षकम् । तेनाष्टकादीनां पितृकर्मत्वादशौचे लोपः । यथा वा ऋष्यशृङ्गः—

'एकोद्दिष्टे तु सम्प्राप्ते यदि विघ्नः प्रजायते ।
मासेऽन्यस्मिंस्तिथौ तस्मिन् कुर्यादन्तरितं तु यत् ॥'

अन्तरितं वन्दिरोगादिना विघ्नितम् । अन्यथैकादशमासिकादेरप्येकोद्दिष्टत्वाद् ग्रहः । यत्तु,

---

महामखादिविहितं स्मार्तं च कर्म त्रिधा त्याज्यं पैत्रमपि द्विधाऽप्यशुचिका प्रेताम्बुपिण्डं विना । श्राद्धे मासिकवार्षिके तु निखिलः कुर्यात्तदन्ते पुनर्नाशौच्यन्नमृते स्वगोत्रमितरैर्भोज्यं समास्तद्भुजः ॥' इति । सूतकमृतकाशौचद्वये सन्ध्यावन्दनपञ्चमहायज्ञादिविहितनित्यनैमित्तिककाम्यकर्मणां त्यागः कर्तव्यः । प्रेतकर्मविहिततिलोदकपिण्डदानादि विना पितॄणां मासिकवार्षिकश्राद्धादि त्याज्यम् । सर्वे वर्णा अशौचानन्तरं श्राद्धादि सकलं कुर्युः । अशौच्यन्नमसपिण्डैरसमानोदकैर्न ग्रहणीयम् । समानोदकैश्चापि खण्डाशौचानन्तरमशौच्यन्नं न ग्रहणीयम् । अनुपनीतानामशौच्यन्नभक्षणे दोषो नास्ति । तद्भिन्ना अन्येऽशौचिनोऽन्नभक्षणद्वारा समाशौचिनो भवन्तीति ।

159 - अशौचवशात् सर्वासां विद्यानामनध्यायः । ताश्च विद्या याज्ञवल्क्यनुसारं (1/3) चतुर्दश भवन्ति । याज्ञवल्क्यवीरमित्रोदय (1/3) धृतविष्णुपुराणवचनानुसारमष्टादश विद्याः सन्ति यथा—'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥ आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादश स्मृताः ॥' इति ।

'आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥'

इति शङ्खवचनं तद् द्वादशपञ्चदशदिनमासाशौचपक्षे क्षत्रवैश्यशूद्रादिपरमिति प्राञ्चः । वस्तुतस्तु, एकादशेऽहनीतिनिरूढलक्षणया शौचान्तरदिनार्थकत्वेन क्षत्रवैश्यशूद्राणां त्रयोदशषोडशैकत्रिंशत्तमदिनेष्वशौचपातेऽप्येकादशाहश्राद्धमिति शङ्खस्योक्तमाकूतम् । एवं वैकल्पिकदशाहाशौचपक्षेऽपि सर्वेषामेकादशाहाशौचेऽपि तच्छ्राद्धं स्यात् । अन्यथा तस्याशौचबाधे कालान्तरवचनलोपे प्रेतमोक्षाभावः । पूरकदशमपिण्डानन्तरमाद्यविधानात् क्षत्रशूद्रादीनां त्रयोदशैकत्रिंशाद्दिनेषु पूरकदशमपिण्डसमाप्त्या एकादशाह इति तच्छ्राद्धानौचित्यात् । अतएव 'आद्यमेकादशेऽहनी'ति160 याज्ञवल्कीय अशौचान्तरदिन एकादशाहश्राद्धमित्यभिहितम् । कल्पतरौ गोपीनाथवाजपेयिभिश्च तथाऽनूदितम् । अपि च यद्येकादशाहोऽत्र नियम्यते तर्हि त्रिदिनान्तरे पित्रोर्मरणे द्वयोरेकादशाह-

---

160 – एकोद्दिष्टश्राद्धकाला याज्ञवल्क्येन (1/256 प्रदर्शिताः, यथा – 'मृतेऽहनि प्रकर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसम्वत्सरं चैवमाद्यमेकादशेऽहनि ॥' इति । मृतेऽहनि मृततिथौ प्रतिमासं सम्वत्सरं यावदेकोद्दिष्टश्राद्धं कार्यम् । सपिण्डीकरणे जाते प्रतिसम्वत्सरं केवल मृतेऽहनि एकोद्दिष्टं कार्यम् । आद्यमेकादशाहश्राद्धमत्र मरणदिवसादारभ्य सावनमानेनैकादशदिवसे न तु चान्द्रैकादशतिथौ, चान्द्रतिथीनां क्षयवृद्धिवशात् । मरणदिवसाज्ञाने श्रवणतिथौ गमनमासीयामावास्यायां वैकोद्दिष्टश्राद्धं कर्तव्यम् । 'मृतेऽहनी'त्यत्र 'ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत् । अधस्तु कारयेद्दाहादाहिताग्नेर्दिजन्मनः ॥' इति विज्ञानेश्वरधृतजातुकर्ण्यवचनात् 'श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि । प्रत्याब्दिकं तु कुर्वीत प्रमीताहनि सर्वदा ॥' इतिकात्यायन (24/7) वचनाच्च आहिताग्नेस्त्रिपक्षादर्वाग्यत्प्रेतकर्म तद्दाहदिवसादारभ्यैव कार्यम् । त्रिपक्षादूर्ध्वं यत्तन्मरणतिथावेव । विप्रमिश्रेणापि(श्राद्धप्र०P.223)'साग्नेर्दाहावधिकत्रिपक्षे सपिण्डीकरणं त्रिपक्षश्राद्धं च न तु मृताहावधित्रिपक्षे ।' इत्युक्तम् । अनाहिताग्नेस्तु सर्वं मृततिथौ कार्यम् । मितमिश्र 'आद्यमेकादशेऽहनी'ति-याज्ञवल्क्यवचने 'प्रकर्तव्य-स्थाने 'तु कर्तव्यं' पठित्वा तु शब्देन षाण्मासिकयोर्मृताहकर्तव्यत्वव्यवच्छेदः, 'एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः । न्यूनः सम्वत्सरश्चैव स्यातां षाण्मासिके तदा ॥' इति (कात्यायनः-24/9) तत्र कालान्तरबोधनात् ।' इत्यत्राह ।

श्राद्धं पित्रैकादशाहे कार्यमिति विज्ञानेश्वराद्युक्तं 161 कथं सङ्गच्छताम् । तस्माच्चतुर्वर्णानामेकादशाहश्राद्धमशौचेऽपि पूरकदशमपिण्डसमाप्त्यन्ते प्रेतान्नपिण्डवत्कार्यम् । विज्ञानेश्वरेणापि 162

'एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ।
चतुर्णामपि वर्णानामशौचं च पृथक् पृथक् ॥'

इति पैठीनसिवचनमुपन्यस्याशौचेऽपि चातुर्वर्ण्यस्यैकादशाहश्राद्धमित्यभिहितम् । तत्रापि विघ्ने दर्शे श्रवणदिवसे वा 163 मासिकादिवत्कार्यमिति स्थितं सम्यक् । इदं वैकल्पिकं दशाहपक्षे । मासपक्षे द्वादशेऽह्नीत्यस्य द्वात्रिंशत्तमेऽहनीत्याशयः । आधुनिकशूद्रास्तु प्रायशो द्विजवद्वर्षान्ते सपिण्डनमाचरन्ति ।

अथाशौचे विधिनिषेधविचारः ।

'विप्रो दशाहमासीत वैश्वदेवविवर्जितः ।' 164

विप्रपदं कैमुतिकन्यायाच्छूद्रादेरपि ग्राहकम् ।

161—वस्तुतः प्रसङ्गेऽस्मिन् विज्ञानेश्वरवचनं (याज्ञ० मिता० 3/20) यथा—'मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमः स्यात्तदा न पूर्वशेषेण शुद्धिः, किन्तु पितुः प्रायणनिमित्ताशौचकालेनैव शुद्धिः कार्या । तथा पितुः प्रायणनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्राच्छुद्धिः, किन्तु पूर्वाशौचं समाप्योपरि पक्षिणीं क्षिपेत् ।' इति । प्रकृताशौचव्यपगमदर्शनार्थमत्र पितुः शेषेण शुद्धिरुक्ता ।

162—'शुचिना कर्म कर्तव्यम्' इति शुद्धेः कर्माङ्गत्वात् 'अथाशौचापगमे' इति विष्णुवचनात् (21/1) च्चाशौचानन्तरं सर्वेषां वर्णानामाद्यैकोद्दिष्टश्राद्धंकर्तव्यमिति केषाञ्चन मतखण्डनपूर्वकं विज्ञानेश्वरेण याज्ञ० मिता०-1/256) कथ्यते यत्—'आद्यमेकादशेऽहनी'त्याशौचोपलक्षणमिति केचित्; 'शुचिना कर्मे'त्यादि । तदयुक्तम्, 'एकादशेऽह्नि यच्छ्राद्धं....सूतकं च पृथक् पृथक् ॥' इति पैठीनसिस्मरणविरोधात्, 'आद्यं श्राद्धमशुद्धोऽपि....अशुद्धः पुनरेव सः ॥' इति शङ्खवचनविरोधाच्च । मृतदिवसाज्ञाने 'अपरिज्ञाते मृतेऽहनि अमावास्यायां श्रवणदिवसे वे'ति स्मरणात् श्रवणदिवसे गमनमाससम्बन्धिन्याममावास्यायां वैकोद्दिष्टं कार्यम् ।

163—निर्दिष्टदिवसे श्राद्धविघ्ने तन्मासीयामावास्यायां तन्मासे मरणश्रवणतिथौ वा श्राद्धं कर्तव्यम् ।

164—याज्ञवल्क्यमिताक्षरायां (3/17) सम्वर्तवचनमेतत । किन्तु सम्वर्तस्मृतौ

'अकृतं होमयेत्स्मार्ते तदभावे कृताकृतम् ।
कृतं वा होमयेदन्नमन्वारम्भविधानतः ॥
कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥'(कात्या०24/2-3)

इति छन्दोगपरिशिष्टाद्दशपिण्डैर्होमविधानम् 165 ।

'शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ।' 166

इति जाबालवचनाच्च । केवलपदं पक्षादिचरुपिण्डपितृयज्ञनिवारकम् ।

'पिण्डयज्ञं चरुं होममसपिण्डेन कारयेदि'ति 167

जातुकर्ण्यालोचने तु चरुपिण्डपितृयज्ञयोर्विकल्पः । पौर्णमासचरौ कृतेऽमावास्यायामशौचपाते त्वारब्धत्वात् समाप्तिः 168 ।

(1/37) सम्पूर्णवचनं यथा—'विप्रो दशाहमासीत दानाध्ययनवर्जितः । क्षत्रियो द्वादशाहानि वैश्यः पञ्चदशैव तु ॥' इति । दशाहाशौचपक्षस्यास्मद्देशाद् तत्वात् सर्वेषां वर्णानां दशदिनात्मकं वैश्वदेववर्जनमुचितम् ।

165—सूतके मृतके वाऽशौचे कर्मणां विधिनिषेधौ प्रतिपाद्येते कात्यायनेन (24/13), यथा 'सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते । होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैः ॥ अकृतं होमयेत्स्मार्ते...।' इत्यादि । अत्र श्रौतकर्मणां न निषेधः । यद्यपि मृतके 'ब्राह्मणे दशपिण्डास्तु क्षत्रिये द्वादश स्मृताः । वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिताः ॥' इति निर्णयसिन्धौ (P.410) पारस्करेणोक्तं तथापि 'प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान्दद्याद्दशैव तु ॥' इति तेनैवोक्तत्वात् सर्वेषां दशैव पिण्डा ज्ञेयाः । पूरकदशपिण्डदानेनैतत्कर्म कर्तव्यमिति ।

166 - गदाधरपद्धतौ (P. 287) सम्पूर्णं जाबालिवचनं यथा 'जन्महानौ वितानस्य कर्मत्यागो न विद्यते । शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ॥' इति । शालाग्निः स्मार्ताग्निः । अन्यगोत्रजैरशुचिभिन्नैरित्यर्थः ।

167—याज्ञवल्क्यमिताक्षरायां(3/17)सम्पूर्णं जातुकर्ण्यवचनं यथा-'सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत् । पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत् ॥' इति । यद्यपि सम्पूर्णेऽस्मिन्कर्मण्यन्यकर्त्तृत्वं तथाप्यशुचिः स्वद्रव्यत्यागात्मककार्यं स्वयं कुर्यात् ।

168 - यद्यपि 'सूतके मन्त्रवत्कर्म स्मार्तं नैव समाचरेत् ।' इति वक्ष्यमाणस्मृतिवचनात् स्मार्ताग्नौ उक्तकार्यं निषिद्धं तथापि अशौचपातात्पूर्वमुक्तकार्ये

'होमः श्रौते तु कर्तव्यः शुष्कान्नेन फलेन वा ।' इति 169 ।

सूतकमृतकयोः प्रवासो निषिद्धः । तदुक्तं सुप्रकाशे —

'उद्वाहमाङ्गल्यसुराभिषेके सर्वेष्वशौचे न शुभाय यात्रा ।
राज्याभियाने लिखितेऽपि तस्य प्राधान्यमात्रेण सदा विशेषः ॥
मार्जारयुद्धं कलहः कुटुम्बे रजस्वला स्त्री गृहलिप्तकं च ?
तत्कालवृष्टिर्मृतसूतके वा याने ध्रुवं प्राणहराश्च सप्त ॥'

इत्यत्र स्पष्टमभिधानाच्च । अत्र कलहसूतकादीनां सम्बन्धित्वेन यात्रानिषेधाद्रजस्वलास्त्रीको न गच्छेदिति केचित् । रजस्ययं न गच्छेदित्यप्यन्ये । इह च कदाचिद् गणनायनिके कार्ये शुद्धिविधानादग्न्युपस्थापनं कार्यम् 170 ।

अशौचे श्रौतकर्मणामनिषेधः ।
'श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादि'ति स्मृतेः । 171
'नित्यानि निवर्त्तेरन्वैतानवर्जम् । शालाग्नौ चैके" ।

इति कात्यायनीयात् (पारस्करगृह्य० 3/10/32-33) । एव चरुपिण्डपितृयज्ञकर्मापि वैतानवत्कार्यमित्यर्थः ।

प्रारब्धे 'सायमादि प्रातरन्तमेकं कर्म प्रचक्षते । दर्शान्तं पौर्णमास्याद्यमेकमेव मनीषिणः ॥' इति कात्यायन (28/1) वचनात् अशौचपातेऽपि तस्मिन्नेव स्मार्ताग्नौ अन्येन केनचित् तत्कर्म समापनीयमिति ।

169—अशौचे सन्ध्यादिकर्मणां लोपेऽपि होमादिकं श्रौताग्निना कर्तव्यम् । यदि च श्रौताग्निर्नास्ति तर्हि स्मार्ताग्नौ 'होम तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ।' इति सम्वर्तवचनात् (1/43) अन्येन केनचित् असगोत्रेण शुष्कान्नेन फलेन वा तत्कर्तव्यम् ।

170—गदाधरेणापि (P. 288) एवमुक्तम् , यथा—'सूतके मृतके चैव यस्य भार्या रजस्वला । प्रवासे गमने तस्य पुनराधानमिष्यते ॥' इत्यशौचे पत्न्या रजस्यपि प्रवासगमनं निषिद्धमेव । तथाप्यात्ययिके कार्ये शुद्धिविधानादेव विपत्तौ विप्रवासे कार्ये अग्न्युपस्थापनं कार्यम् । तथा प्रवेशोपस्थापनं च पर्वसन्निधावावश्यकत्वात् कार्यम् ।' इति ।

171—अशौचे सकलश्रौतस्मार्तकर्मणां निषेधेऽपि श्रौतकर्मार्थं प्रतिप्रसवः प्रतिपाद्यते याज्ञवल्क्येन (3/17)—'वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् ॥' इति । अत्र विज्ञानेश्वर एवमाह यथा—'अत्र च श्रौतत्वविशेषणोपादानात्स्मार्तक्रियाणां दानादीनामननुष्ठानं गम्यते । अत एव वैया-

'सूतके मन्त्रवत्कर्म स्मार्तं नैव समाचरेत् ।
आपोशानद्वयं मुक्त्वा तथा प्राणाहुतीरपि ॥' इति । 172

समाचरेच्चेत् कुतो वाऽरम्भ इति तन्निषेधोऽप्युक्तप्रायः । मन्त्रवदित्यनेन माघवैशाखस्नानादेर्मन्त्रवत्त्वा 173 दनारम्भे त्याग एव । एवं सङ्क्रान्ति—

घ्रपादेनोक्तम्—'स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके । श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ॥' इति । श्रौतानां च कार्यत्वाभिधानं नित्यनैमित्तिकाभिप्रायेण ।' इति । गार्हपत्याहवनीयदक्षिणाग्निना साध्यं वैतानमग्निहोत्रादिकर्म वर्जयित्वा सन्ध्यावन्दनादिनित्यकर्मणामन्येषां निवृत्त्यर्थं पारस्कराचार्येणापि 'नित्यानि निवर्त्तेरन्' इत्युक्तम् ।

172—सूतकमृतकाशौचे मन्त्रवत्स्मार्तं कर्म आपोशानप्राणाहुतिव्यतिरिक्तं नाचरणीयम् । उपवासातिरिक्तदिनेषु अन्नभक्षणविधानात् आपोशानप्राणाहुतिपूर्वकमन्नं स्वीकर्तव्यम् । आपोशानक्रियार्थं याज्ञवल्क्येनोक्तं (1/ 06) यथा 'आपोशानेनोपरिष्टादधस्तादश्नता तथा । अनग्नममृतं चैव कार्यमन्नं द्विजन्मना ॥' इति । तच्चैवम् - 'ॐब्रह्मणे नमः' इत्यनेनान्नपात्रस्य दक्षिणपार्श्वे प्रथमतः जलं सिञ्चेत् । 'ॐधर्मराजाय नमः', 'ॐचित्रगुप्ताय नमः' इत्येताभ्यां जलसिक्तस्थाने किञ्चिदन्नं स्थापयेत् 'ॐधर्मराजाय स्वाहा' 'ॐचित्रगुप्ताय स्वाहा' इत्येताभ्यामन्नं समर्पयेत् । 'ओममृतोपस्तरणमसि स्वाहा' इत्यनेन जलपानं भोजनारम्भकालीनं प्रथममापोशनं कुर्यात् । 'ॐप्राणाय स्वाहा, ओमपानाय स्वाहा, ओमुदानाय स्वाहा, ॐव्यानाय स्वाहा, ॐसमानाय स्वाहा' इत्येतैः पञ्च ग्रासान्भक्षयेत् । भोजनावसाने 'ओममृतापिधानमसि स्वाहा' इत्यनेन जलपानमपरमापोशनं कुर्यात् । आपोशनमेवापोशानम् । तच्चापि 'हृत्कण्ठतालुगाभिस्तु यथासङ्ख्यं द्विजातयः ।' इति याज्ञवल्क्य (1/21) वचनाद्वर्णानुसारं व्यवस्थितम् । 'नैव समापयेदि'ति क्वचिद् द्वितीयचरणपाठः ।

173—माघवैशाखयोः स्नानमन्त्रौ क्रमानुसारं यथा—'दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च । प्रातःस्नानं करोम्यद्य माघे पापविनाशनम् ॥ मकरस्थे रवौ माघे गोविन्दाच्युत माधव । स्नानेनानेन मे देव यथोक्तफलदो भव ॥' इति निर्णयसिन्धौ (P 159) । 'वैशाखं सकलं मासं मेषसङ्क्रमणे रवेः । प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदन ॥ मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् । निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥ माधवे मेषगे भानौ मुरारे मधुसूदन । प्रातः स्नानेन मे नाथ फलदो भव पापहन् ॥' इति निर्णयसिन्धौ (P.P. 69-70) इति ।

स्नानादेरपि । चण्डालादिस्पर्शवत् शूद्रकृतस्नानादेरमन्त्रत्वात्क्रिया ।

'सूतके मृतके चैव न दोषो राहुदर्शने ।'

इति 174 स्मृतेर्ग्रहणस्नानदानभावः ।

'सर्व एव शुभः कालः सर्वो देशस्तथा शुभः ।
सर्व एव जनः पात्रं स्नानादौ जाह्नवीजले ॥' इति

भविष्यात् वारुणीगङ्गास्नानादे 175 रपि विधिः । अशौचकालस्यापि सतत्त्वेन स..हात् ।

'न च नैमित्तिकोच्छेदः कर्तव्यो हि कथञ्चन ।'

इत्यादिवचनादर्धोदय-गोविन्दद्वादशीस्नानादे 176 रप्यक्षयः । यद्यपि नैमि-

---

174—'तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ।' इति निर्णयसिन्धौ (P.47) वृद्धवसिष्ठवचनस्यापरार्धम् । राहुदर्शने दोषाभावोऽत्र ग्रहणस्नानदानाभिप्रायेण । यद्यपि 'सर्वेषामेव वर्णानां सूतकं राहुदर्शने । सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥' इत्युक्तं तथापि 'ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते । मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ।' इति निर्णयसिन्धुधृत (P. 46) हेमाद्रिवचनात्स्नानदानादि नैमित्तिकत्वात्कर्तव्यमेव । ग्रहणमुक्तौ स्नानाकरणे 'मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके । स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः ॥' इति चतुर्विंशतिमताद्दोषः । चन्द्रग्रहणे रात्रावपि स्नानदानादि कार्यम् । ग्रहणस्नानदानानुष्ठानशङ्कायां सिद्धान्तमाह निर्णयसिन्धुकारः (P.48) यथा 'यदा तु ज्योतिःशास्त्रगम्ये दिने चन्द्रग्रहः, रात्रौ च सूर्यग्रहस्तदा स्नानदानादि न कार्यम्, 'सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा । तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥' इति षट्त्रिंशन्मतात् । स्नानदानादि चात्रामन्त्रकमिति ।

175—चैत्रकृष्णत्रयोदश्यां शतभिषानक्षत्रयोगे वारुणीयोगः । शुभवारादियोगे सा महतीसंज्ञां लभते । तदुक्तं निर्णयसिन्धौ (P 69) स्कान्दे यथा—'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी । गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥ शनिवारसमायुक्ता सा महावारुणी स्मृता । गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा । शुभयोगसमायुक्ता शनौ शतभिषा यदि । महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥' इति । अत्र गङ्गास्नानफलं स्पष्टम् । 'शुभस्त्रयोविंशतितमो योग' इति 'कालसर्वस्वे' ग्रन्थकर्त्ता निर्णीतम् ।

176—अर्धोदयामावास्याविचारो यथा भारते-'अमार्कपातश्रवणैर्युक्ता

त्तिकपदनिमित्तादागतस्य यस्याकरणे प्रत्यवायस्तादृशे ग्रहणादौ योगरूढः तथाप्यत्र दोषाजनकत्वांशत्यागेन बाधादर्धोदयादेरपि सङ्ग्रहात् । इदं च कथञ्चनेतिपदं कष्टदृष्ट्या बहुकालीनानां नैमित्तिकानामर्धोदयादीनामित्यर्थः। स्मृतीनां छन्दस्यतिदेशादामसुपो लुक्। अत एव दूरागतानां दृष्टं फलम्। तथाप्यदृष्टफलं कल्प्यते—

'अस्नाताशी मलं भुङ्क्ते अजपी पूयशोणितम् ।' 177

इत्यल्पकालीनानां केषाञ्चित् स्नानजपादीनां लोपस्त्वाचारात् । सूतकेऽपि,

'एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि ।' (पुलस्त्यः)

इति वचनादेकादशी कार्या । एवम्,

'मुमुक्षवोऽपि हि सदा श्रीरामनवमीव्रतम् ।
न त्यजन्ति सुरश्रेष्ठो देवेन्द्रोऽपि विशेषतः ।।'

वर्षे वर्षे इति वीप्साश्रवणाच्च 178 रामनवमीजन्माष्टम्यादेरप्यलोपः । ब्राह्मे—

'लवणं मधु मांसं च पुष्पमूलफलानि च ।
काष्ठं शाकं तृणं पर्णं दधि क्षीरं घृतं तथा ।।
औषधं तैलमञ्जनं शुष्कमन्नं च नित्यशः ।
अशौचिनां गृहाद् ग्राह्यं स्वयं शस्यं च मूलकम् ।।'

धनप्राप्तिमूल्यं मूलकम् । तस्मात् जातमूलकं क्रीतमिति यावत् ।
अङ्गिराः(उत्त० आ० 8/17-18) —

चेत्पुष्यमाघयोः । अर्धोदयः स विज्ञेयः कोट्यर्कग्रहसन्निभः । तस्मिन्काले तु राजेन्द्र गन्तव्यं पुरुषोत्तमम्। सागरे विधिवत्स्नात्वा दृष्ट्वा नारायणं प्रभुम् ।। कोटिजन्मार्जितं पापं नाशयेत्तत्क्षणाद् ध्रुवम् । स्नानं दानं तथा जप्यमक्षय्यफलभाग्भवेत् ।।' इति । गोविन्दद्वादशी यथा वायुपुराणे 'फाल्गुनस्यामले पक्षे कुम्भस्थे दिवसाधिपे । जीवे धनुषि योगे च शोभने रविवासरे ।। पुष्यर्क्षे यदि सम्पूर्णा गोविन्दद्वादशी स्मृता । गोविन्दद्वादशीं प्राप्य गच्छेच्छ्रीपुरुषोत्तमम् । व्रतमापूर्य तत्रैव विष्णुसायुज्यमाप्नुयात् । महाज्यैष्ठ्या दशगुणं फलमाप्नोति मानवः ।।' इति ।

177 – 'अहुत्वा च कृमीन्भुङ्क्ते अदत्त्वा विषभोजनम् ।' इति नित्याचारप्रदीपे पञ्चमभागकृत्ये जाबालिवचनस्यापरार्धम् ।

178—रामार्च्चनचन्द्रिका-P 134 । 'मुमुक्षवोऽपी'तिश्रवणात् केवलं तदुपासकानामेवेदं व्रतं न नित्यं भवत्यपि च 'तस्मात्सर्वात्मना सर्वैः कार्यं

'गुडो रसस्तथोदश्चिद्धोऽयान्येतानि नित्यशः ।
अश्रुतं चारनालं च ताम्बूलं सक्तवस्तिलाः ।
फलानि पिण्याकमथो ग्राह्यमौषधमेव च ॥'

रसो मरीचलवणादिकन् । मूलकं मृतकिना त्वभक्ष्यम् । तथा च

'सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः ।
पिबेत्पानीयमज्ञानाद् भुङ्क्ते वा संस्पृशेत वा ।
पानीयपाने कुर्वीत पञ्चगव्यस्य प्राशनम् ॥'

(आङ्गिरसस्मृतिः- उत्त० आ०-8/19-20)

कालत्वावले गायत्र्यष्टसहस्राणि वक्ष्यते । अङ्गिराः—

'अशौचं यस्य संसर्गादापतेद् गृहमेधिनः ।
क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेत् ॥'

क्रियाः वैश्वदेवश्राद्धादयः । न लुप्यन्ते पुत्रभ्रात्रादिभिः कार्या इति भावः । गृह्याणां गृहगतभार्यापुत्रादीनां तस्माद् घटपट्टादीनां च। इदं च पितृगताशौचमात्रसङ्ग्राहकम् । तेन ुहितृमृत्यादित्रिदिनाशौचग्रह इति वाजपेय्यादयः । विज्ञानगिरिणा 179 तु गृह्याणां पुत्रभार्याभृत्यादीनां न तदशौचमित्युक्तम् । तेषां सन्ध्यादिक्रिया न लुप्यन्त इत्यर्थात् केवलपुत्रसत्त्वे पितृमात्राधिकारिकवैश्वदेवादेर्लोपः, पितृभ्रात्रादिसत्त्वे तु न तल्लोप इति विभावनीयम् ।

वै नवमीव्रतम् ।' इतिवचनाज्जन्माष्टम्यादिवत्सर्वेषां कृते नित्यम्। तिथितत्त्वे (P. 43) जन्माष्टमीप्रकरणे सम्पूर्णं भविष्योत्तरवचनं यथा—'एवं यः कुरुते देव्या देवक्याः सुमहोत्सवम् । वर्षे वर्षे भगवतो मद्भक्तो धर्मनन्दन !' स्कन्दपुराणवचनं यथा—'ये कुर्वन्ति न जानन्तः कृष्णजन्माष्टमीव्रतम् । ते भवन्ति नरा ग्राहा व्याला व्याघ्राश्च कानने ॥' इतिवचनाज्जन्माष्टमीव्रतस्य नित्यत्वम् । वीप्सादयो नित्यत्वव्यञ्जका अष्टौ । ते यथा—'नित्यं सदा यावदायुर्न कदाचिदतिक्रामेत् । इत्युक्त्वातिक्रमे दोषश्रुतेरत्यागदर्शनात् । फलाश्रुतेवीप्सया च तन्नित्यमिति कीर्तितम् ॥' इति।

179—संसर्गजदोषजनिताशौचेषु शवसंसर्गाशौचपालने याज्ञवल्क्यमिताक्षराकारो (3/17) विज्ञानेश्वर आह यथा—'शवसंसर्गनिमित्ताशौचे त्वङ्गिरसा विशेष उक्तः—'अशौचं यस्य संसर्गात् गृह्याणां च न तद्भवेत् ॥' इति। तदाशौचं केवलं गृहमेधिन एव ; न पुनस्तद् गृहे भवानां भार्यादीनां तद् द्रव्याणां च भवेदित्यर्थः ।' इति ।

'अतिक्रान्ते दशाहे तु पश्चाज्जानाति चेद् गृही ।
त्रिरात्रं सूतकं तस्य न तद् द्रव्यस्य कर्हिचित् ॥'

जानातीत्यस्याशौचमित्यादि । इदं च 'निर्दशं ज्ञातिमरणमि'ति पूर्वोक्तेन विकल्पितमस्मद्देशे नाचर्यते । यत्तु,

'पयो दधि घृतं तक्रमौषधं जलमेव च ।
अशौचिनां गृहाद् ग्राह्यं शुष्कान्नं वाऽपि नित्यशः ॥' इति

जलग्राह्यतोक्ता तत्पयोदध्यादिगतजलपरं साहचर्यादिति । जाते कुमार इत्युपक्रमाज्जन्यशौचस्पृष्टमेव जलं ग्राह्यं न तु मृतकस्पृष्टमित्येके ।

'गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् ।
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ॥
निमन्त्रितस्य विप्रस्य स्वाध्यायादिरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥' 180

गृहीतेत्यादेर्यावज्जीवकत्वाद् षिपञ्चमीकुक्कुटीव्रतादौ 181 कृतनियमस्येत्यर्थः । प्रारब्ध इत्यत्र कुत्र कः प्रारम्भ इति विशेषमाह—

'प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्त्रयोः ।

180—याज्ञवल्क्यमिताक्षरायां (3/28) 'नित्यमन्नप्रदस्यापि कृच्छ्रचान्द्रायणादिषु । निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ॥ इति आदौ, 'प्रायश्चित्तप्रवृत्तानां दातृब्रह्मविदां तथा ।' इति अन्ते चेतिस्मृत्यन्तरवचनमुपन्यस्तम् ।

181—'भाद्रे सितेऽपराह्णे तु पञ्चमी यत्र तिष्ठति । विश्वामित्रऋषिः स्त्रीभिः पूज्यः सन्तानवृद्धये ॥' इतिस्मृतिवचनात्पुत्रसन्तानसमृद्धिकामनया ऋषिपञ्चमीव्रतं यावज्जीवं कुर्यात् । तथैव 'भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये । स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् । पूजयेत तदा तस्यां दुष्प्राप नैव विद्यते ॥' इति भविष्यपुराणवचनादपि सर्वप्राप्तिनिमित्तं कुक्कुटीव्रतं यावज्जीवं कुर्यात् । यावज्जीवशब्दोऽत्र कृत्स्नजीवनपरकः । तद्विचारो यथा जैमिनीयन्यायमालायाम् (2/4/1) 'यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा । कालत्वात्कर्मधर्मोऽतः काम्य एकः प्रयुज्यताम् ॥ न काला जीवनं तेन निमित्तप्रविभागतः । काम्यप्रयोगो भिन्नः स्याद् यावज्जीवप्रयोगतः ॥' इति । उक्तव्रतयोः काम्यत्वेऽपि ग्रन्थकर्त्तुरभिप्रायान्नित्यत्वमिति ।

नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥' (विष्णुः) 182

182—यज्ञसम्पादनार्थं होतृब्रह्माध्वर्यूद्गातॄणां ऋत्विजां सत्कारपूर्वकमावाहनं वरणम् । वृतसत्त्रादीनामनुष्ठानाथ वृतिनः सत्त्रिणां वा नामगोत्राद्युच्चारणपूर्वकमुद्देश्यप्रतिपादनं सङ्कल्पः । सत्त्रे ऋत्विजां वरणाभावः । तदुक्तं माधवाचार्येण जैमिनीयन्यायमालायाम् (0/2/.0) 'ऋत्विजां वरणं सत्त्रे कार्यं नो वाऽत्र सोमवत् । कार्यं मैवं स्वकर्मत्वात् क्रयार्था प्रकृतौ वृतिः ॥' इति । 'अग्निर्मे होतेत्यादिमन्त्रैः सोमे वरणमाम्नातम् । सोमवत् सत्त्रेऽपि तत्कार्यम् । अन्यथा वरणरहितानामृत्विक्त्वाभावात् सत्त्रं न सिध्येत् । अत एव तत्सिद्धये सत्त्रप्रकरणे ये यजमानास्त ऋत्विज इति स्वतः प्रवृत्तानपि यजमानाननूद्य वरणसाध्यमृत्विक्त्वं तेष्वाधातव्यमिति विदधाति । तस्मादृत्विग्वरणं सत्त्रे कार्यम् । मैवम् । सत्त्रं ह्यनुष्ठातॄणां सर्वेषां स्वकर्म । न हि स्वकर्मणि क्रयार्थं वरणमपेक्ष्यते । क्रयार्थं हि प्रकृतौ वरणम् । दानमेव क्रयार्थम् । वरणं त्वदृष्टार्थमितिचेत् , मैवम् । वरणस्य भविष्यद्दानसूचनेनोत्साहजननार्थत्वात् । अन्यथा वरणकाले क्वचित् कल्याण्यो दक्षिणा इत्यृत्विजां प्रश्नः कथं संगच्छेत । न च सत्त्रासिद्धिः शङ्कनीया । तत्र वक्तव्यम् । ऋत्विक्त्वं नाम किं कर्मकरत्वमुत यागकर्तृत्वमिति । आद्ये कर्मकराणां स्वामित्वाभावेन ये यजमानास्त ऋत्विज इति विरुध्येत । द्वितीये तु स्वत एव यागं कर्तुं प्रवृत्तत्वाद्वरणमन्तरेणाप्यृत्विक्त्वं सिध्यतीति । ईदृशमेवार्त्विज्यं वचनेन विधीयते । तस्माद्दानवद्वरणं सत्त्रे लुप्यते ।' इति विस्तरेणोक्तमपि तेन । नान्दी समृद्धिः । 'पिता पितामहश्चैव तथैव प्रपितामहः । त्रयोऽप्यश्रुमुखाश्चैते पितरः परिकीर्तिताः ॥ तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखोषिताः । ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥' इतिश्राद्धदीपधृतवचनात्पितरो नान्दीमुखा भवन्त्येव । नान्दीमुखं त्वत्र नैमित्तिकमाभ्युदयिकं श्राद्धम् । तच्च 'वृद्धिश्राद्धमकृत्वा यो वृद्धिकर्म समाचरेत् । वृद्धिर्नो वर्धते तस्य स्वयं च नरकं व्रजेत् ॥' इतिगदाधरपद्धति -(P. 399) धृतभरद्वाजवचनेन प्रत्यवायश्रवणाद् विवाहाद्याभ्युदयिककर्मारम्भे कर्तव्यम् । अत एवेदं नैमित्तिकत्वेन 'एवं प्रदक्षिणावृत्को वृद्धौ नान्दीमुखान्पितॄन् । यजेत दधिकर्कन्धुमिश्रान्पिण्डान्यवैः क्रियाः ॥' इति याज्ञवल्क्येन (1/20) अभिहितम् । 'अनिष्ट्वा तु पितॄञ्छ्राद्धे न कुर्यात्कर्म वैदिकम् । तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः ॥' इतिकात्यायनेन(1/17) प्रदर्शितत्वात् 'मातुः श्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् । ततो मातामहानां

आदिना देवसरःप्रतिष्ठादिग्रहः । एवं शास्त्रे सत्यपि सर्वत्र सङ्कल्पमात्रेणारम्भ-व्यवहारः 183 ।

'वृतोत्सवविवाहेषु तत्क्षण मृतसूतके ।'

अशौचे पुत्रादिः पितरमश्रावयित्वा तत्क्षणं सेन वृतादि कारयेदिति भावः । विष्णुनामकीर्तनं त्वशौचे प्रारम्भणीयं समापनीयं च ।

'न देशनियमस्तत्र न कालनियमस्तथा ।
नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धक ॥

च वृद्धौ श्राद्धत्रयं स्मृतम् ॥' इति विज्ञानेश्वरधृतशातातपवचनाच्च तत्र श्राद्ध-क्रमोऽवगन्तव्यः । पितृभिः सहाप्यन्याश्च देवता अत्र पूजनीयाः, यथाऽऽह कात्यायनः (1/11-13)—'गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह । गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥ कर्मादिषु च सर्वेषु मातरः सगणाधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥' इति । नान्दीमुखश्राद्धेतिकर्तव्यतायां विज्ञानेश्वरधृताश्वलायनवचनं यथा—'अथाभ्युदयिके युग्मा ब्राह्मणा अमूला दर्भाः प्राङ्मुखो यज्ञोपवीती स्यात्, प्रदक्षिणमुपचारो यवैस्तिलार्थो गन्धादिदान द्विर्द्विः ऋजुदर्भानासने दद्यात् । 'यवोऽसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्पितॄनिमाँल्लोकान्प्रीणयाहि नः स्वाहा' इति यवावपनम् । 'विश्वेदेवा ! इदं वोऽर्घ्यम्, नान्दीमुखाः पितर ! इदं वोऽर्घ्यम्' इति यथालिङ्गमर्घ्यदानम् । पाणौ होमोऽग्नये कव्यवाहनाय स्वाहा, सोमाय पितृमते स्वाहे'त्यादि । वृद्धिश्राद्धादौ विशेषक्रियामाह कात्यायनः, यथा (2/13-14)—'पित्र्यमन्त्रानुद्रवणे आत्मालम्भेऽधमेक्षणे । अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥ मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसम्भवे । निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत् ॥' इति । आभ्युदयिकश्राद्धातिरिक्तपार्वणैकोद्दिष्टश्राद्धेषु पितॄणां श्रद्धायोग्यान्नपाकसम्पादनं पाकपरिक्रिया । आरब्धेष्वेतेष्वशौचं न भवति, 'पूर्वसङ्कल्पितार्थे वा तस्मिन्नाशौचमुच्यते ।' इतिपूर्वोक्तयमवचनादिति ।

183 - सङ्कल्पाभावे दोषश्चोक्तः स्मृतौ, यथा - 'सङ्कल्पेन विना विप्र ! यत्किञ्चित्कुरुते नरः । फलं चानर्थकं तस्य धर्मस्यार्धक्षयो भवेत् ॥' इति । तत्रापि 'मासपक्षतिथीनां च निमित्तानां च सर्वशः । उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत् ॥' इति ब्रह्मभविष्ययोर्वचनात्सर्वं प्रतिपादनीयमिति ।

चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् ।
नाशौचं कीर्तने तस्य स पवित्रकरो हि यत् ॥' इति विष्णुधर्मात् ।
'अशुचिर्वा शुचिर्वाऽपि गच्छन्स्तिष्ठन् स्वपन्निशि ।
वासुदेवस्य नामानि सदा सर्वत्र कीर्तयेत् ॥'
'अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
सङ्कीर्तितमघं पुंसो दहेदेधो यथाऽनलः ॥'(श्रीमद्भागवतम् 6/2/18)
'शयनादुत्थितो यस्तु कीर्तयेन्मधुसूदनम् ।'

इत्यादिना तत्र बाह्याभ्यन्तरशौचानपेक्षणात् ।

'एकाग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः ।'

इति वचनात् कीर्तनस्य जपरूपत्वेन कथं शौचानपेक्षणमिति वाच्यम् । चतुर्थ्यन्तस्य सबीजरामशिवपदादेरुच्चारणं हि जपः । देवमात्रप्रकाशकं सम्बन्ध्यन्तं रामशिवादिपदं तु कीर्तनम् ।

'कृत्व जपो वासुदेवेति मुक्तबीजमनुत्तमम् ।'

इत्यादि चेन् कीर्तनमत्र जपशब्देनोच्यत इति नामकीर्तनकौमुदीकारः ।

'कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
कीर्तयेद्भगवन्नाम वासुदेवेति नित्यशः ॥'

इत्यादिनामकीर्तने सम्बन्धिद्योतनात्

'आहेदमादिपुरुषाखिललोकनाथ ।'

इत्यादौ विपत्काले सम्बन्धेरावश्यकत्वात् । एवम्

'शिवेति परमेशेति शङ्करेति हरेति च ।
पार्वतीप्राणनाथेति वद जिह्वे निरन्तरम् ॥'
'शीतले शीतले चेति यो ब्रूयाद् दाहपीडितः ।'

इत्यादौ सम्बन्धदर्शनम् । अतएव शक्तवैष्णवानाम्

'हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥'

इति षोडशसम्बन्ध्यन्तनामग्रथितानि प्रत्यहकृतानि लक्षनामकीर्तनानि सङ्गच्छन्ते । प्रथमान्तवादिनां पातित्याकाङ्क्षया विशिष्टार्थबोधतौल्यत्वम् । अन्यथैतस्य प्रथमान्तत्वे विष्णुसहस्रशतनामादिवदशौचे लोपापत्तिः ।

सिंहवाजपेयिमिश्चेदं 184 कीर्तनं सूतकादाविव सन्ध्यास्नानाभावाद्यशौचेऽपि स्यादित्युक्त्वा भोजनानन्तरं दिनाष्टमभागे कर्तव्यमिति निर्णीतम् । कृष्णतोषिण्यामपि कीर्तनमशौचे समर्थितम् । न च कीर्तनं तु प्रथमान्तम्, तच्च

'केशवः पुण्डरीकाक्षो माधवो मधुसूदनः ।'

इत्यादिवदशौचेऽपि भवेदिति वाच्यम् । हनुमानञ्जनासूनुरित्यादिनाम्नां शयन इव प्रातर्वचनेन तदशौचमात्रे प्राप्तेऽप्यन्येषां तथात्वे मानाभावात् । तथाप्यशौचकालमात्रलाभाच्च । नामकौमुद्यामप्यत्रैव कीर्तनस्य सम्बन्ध्यन्तं निष्कर्षितम् । तद्यथा – देवतावाचकसम्बन्ध्यन्तपदमात्रोच्चारणं कीर्तनमिति । युक्तं चैतत् ।

'सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ।
सुखेन यां गतिं यान्ति न तां धर्मेऽपि धार्मिकाः ॥'185

इत्यत्र मात्रपदेन स्वादिविभक्तीयैकशब्देन स्वसदृशघटपटादीनां च निरासाभिप्रायात् । न चैवम् 'श्रीकृष्ण विष्णो नृहरे मुरारे' इति नारदीये 'त्वं पाहि न' इत्यनेन पदोच्चारणेन 'कमलनयन वासुदेवे'तिपद्ये त्यज घटेत्याद्यन्तपदोच्चारणेन कीर्तनभङ्गः स्यादिति वाच्यम् । आर्षेतरनामकीर्तननिराकाङ्क्षितपदनिरासस्यैव वचनीयत्वात् । एवम्

'सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्तु ॥'186

इति नारायणे वाग्वल्लीत्यादिस्वरसश्च । अत एव,

184—'उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् ।' इति (दक्षः-2/2) वचनाल्लोकयात्राभावे पुराणश्रवणशास्त्राध्यापनविष्णुनामकीर्तनादिकमिहापि कर्तव्यम् ।' इति नित्याचारप्रदीपेऽष्टमभागकृत्ये (भागः-2, P 235)।

185– विष्णुनामजपेन सुगतिः प्राप्यत इति सिद्धान्तितमत्र । न केवलं जपेनापि च निष्ठासहकारेण विष्णुशरणादुत्तमफलं लभ्यते । तदुक्तं श्रीमद्भगवद्गीतायां (18/66) भगवता श्रीकृष्णेन—'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।' इति ।

186– विष्णुनामश्रवणे वचनस्यास्य पूर्वार्द्धं यथा – 'आर्त्ता विषन्ना शिथिलाश्च भीता घोरेषु यज्ञादिषु वर्त्तमानाः ।' इति । दुःखपदेनात्राध्यात्मिकाधिभौतिकाधिदैविकतापत्रयस्य ग्रहणम् । तत्तापत्रयापनोदने 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।।' इति मनूक्त (1/10) जलवासी जलरूपी वाऽयं नारायणो देवः सततं

'जगन्नाथेति मन्नाम कीर्तयिष्यन्ति ये नराः ।
अपराधशतं तेषां क्षमिष्ये नात्र संशयः ॥'

इत्यादिसम्बन्ध्यन्तमनुकूलम् । लिङ्गादपराधभञ्जनं च । न चैवं तर्हि अकृतविभक्तिकविष्णुनाम्नां कीर्तनत्वापत्तिरिति वाच्यम् । इष्टापत्तेः ।

'साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।' 187

इत्यत्रानुकरणगीतकालादिपादपूरकनिर्विभक्तिकहरिनाम्नां स्तोभपदार्थत्वात् । 'अवशेनापि यन्नाम्नि' इत्यादि नामकौमुद्यामुक्तत्वात् । परन्तु नामपदं साधुनैव प्रयुञ्जीतेति श्रुतिदोषभियासम्बन्ध्यन्तकीर्तनाचार इति सन्तोष्टव्यमायुष्मता । अतएव भक्तिमीमांसा शाण्डिल्यसूत्रव्याख्याने स्वप्नेश्वराचार्यैरुक्तम् (2/2/7) – 'अत्र कीर्तनस्योच्चारणत्वमात्रमिह प्रतीतम्, न तु प्रथमान्तपदेनेत्यादिनियम' इति । अन्यथा 'दुःस्वप्ने स्मर गोविन्दम्' 'रामाय रामभद्राय रामचन्द्राय वेधसे ।' इत्यादिदर्शनात् कीर्तनेच्छया सप्तविभक्तिकं किं न भवेत् । द्वितीयादावनाचार इति केचित् । हरे रामेति लक्षकीर्तनादौ सम्बन्ध्यन्ताचारोऽपि दृढः । तस्मान्नामकीर्तनं स्वीकुरु, सम्बन्ध्यन्तं कल्पस्व वा स्वादिविभक्तिकमिति सर्वथा प्रथमान्तग्रहणम् । नामकीर्तनं तु सम्बन्ध्यन्तपदेनैवेति नेह सन्देहनीयम् । नामकीर्तनानि यथा—

'विद्यामभ्यस्यतां नित्यं जप्तव्यः पुरुषोत्तमः ।
दामोदरं बन्धगतो नित्यमेव जपेन्नरः ॥
केशवं पुण्डरीकाक्षं नेत्रवीप्सासु संस्मरेत् ।
भयेष्वन्येषु सर्वेषु हृषीकेशमनुस्मरेत् ॥
दुःस्वप्ने स्मर गोविन्दं विपत्तौ मधुसूदनम् ।
कानने नरसिंहं च पर्वते रघुनन्दनम् ॥

प्रसिद्धः । अतः 'त्रातुं तापत्रयार्त्तान् स्वयमयमुदकीभूय धर्मद्रवीति व्यक्तो याभ्यां निजाङ्के परिचरति सदा कामदा कामसूर्यौ । व्यञ्ज्योर्ध्वे रेखिके द्वे व्यभजदिव विभुर्यच्चतुर्वर्गसीमाः पादौ निर्वाणहेतोः कलिकलुषभिदौ चिन्तयोपाददीत ॥' इति नारायणशतके (श्लोकः 5) श्रीविद्याकरपुरोहितेन विशेषेणोदितम् । श्रीमद्भागवतेऽपि (6/2/8)—'एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् । यदा नारायणायेति जगाद चतुरक्षरम् ॥' इत्युक्तमिति ।

187 – 'वैकुण्ठनामग्रहणमशेषाघहरं विदुः ।' इति श्रीमद्भागवते (6/2/14) अपरार्धपाठः ।

जलमध्ये च वराहं पावके जलशायिनम् ।
मायासु वामनं देवं सर्वकार्येषु माधवम् ॥
ग्रहनक्षत्रपीडासु चौरव्याघ्रादिसङ्कटे ।
अटवीष्वन्धकारे च नरसिंहमनुस्मरेत् ॥
गरुडध्वजानुस्मरणाद्विषवीर्यं प्रणश्यति ॥'

विष्णुधर्मे 'सर्वार्थशक्तियुक्तस्य वासुदेवस्य चक्रिणः ।
यथातिरोचते नाम तत् सर्वार्थेषु योजयेत् ॥'

गोविन्दादिनाम्नां दुःस्वप्नादिप्रधानफलकत्वेऽपि सर्वविष्णुनाम्नां ज्ञाने सर्वफलकत्वमिति भावः । यद्यत्र पादमे प्रभासप्रकरणे स्वर्गतिस्तस्माद्विद्या-बन्धनिवृत्त्यादिकामनया कोटिलक्षादिगुणितं यत् पुरुषोत्तमदामोदरादिकीर्तनं भवेत् तत्सर्वमुक्तयुक्त्या सम्बन्धयन्तमेव । निष्कामं तु मुख्यसम्बन्धयन्तम्, गौणं प्रथमान्तमिति निष्कर्षः । इदं हरिकीर्तनं सर्ववर्णाधिकारकम्, बाह्याभ्यन्तराशौचबाधं सबीजपापनाशकं चेति ।

'अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम् ।'

इति भागवतात् 188 । चक्रायुधस्य नामानीत्युक्तेश्च । सबीजपापक्षयो यथा षष्ठस्कन्धे (2/17)—

'तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः ।
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥'

तथा— 'नामसङ्कीर्तनं नित्यं क्षुतप्रस्खलनादिषु ।
प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन् ।
नारायणमवाप्नोति सद्यः पापक्षयो नरः ॥
तन्नास्ति कर्मज लोके वाग्जं मानसमेव च ।
यत्तु न क्षीयते पापं कलौ गोविन्दकीर्तनात् ॥
नाम्नोऽस्य यादृशी शक्तिः पापनिर्हरणे हरेः ।
तावत्कर्तुं न शक्नोति पातकं पातकी नरः ॥'

188—श्रीमद्भागवतस्य तृतीयस्कन्धत्रयस्त्रिंशाध्याये देवहूतिकृता भगवत्स्तुतिः प्रतिपादिता । तत्र भगवन्नामोत्कर्षप्रदर्शनाय देवहूत्या विज्ञाप्यते, यथा (श्लोकौ 6,7)—'यन्नामधेयश्रवणानुकीर्तनाद् यत्प्रह्वणात्स्मरणादपि क्वचित् श्वादोऽपि सद्यः सवनाय कल्पते कुतःपुनस्ते भगवन्नु दर्शनात् ॥ अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यम् । तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥' इति ।

विष्णुपुराणे 189—'प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने !
न याति नरकं शुद्धः सङ्क्षीणाखिलपातकः ॥'

महाभारते—'सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम् ।
न तथा फलदं सौते ! नारायणकथा यथा ॥'(शान्ति०-343/2)

'प्रातर्निशि तथा सन्ध्ये'ति वाक्यं 'तस्मादहर्निशं विष्णुमि'त्यस्यावयुत्यानुवाद इति सर्वेश्वरः । अत एव विष्णुनामकीर्तनेऽनुपनीतानामप्यधिकारः, नापि तत्र जातिशौचाद्यपेक्षेति गर्भाधानपद्धतौ वाजपेयी गोपीनाथोऽप्युचिवान् । यद्यपि—

'सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् ।
बद्धपरिकरस्तेन मोक्षाय गमनं प्रति ॥' इति

एवं प्रातर्निशीतिपद्ये सद्यः पदेनाप्येकानेकाभिधानादेकानेककीर्तनेषु मोक्षपापक्षयादिफलं तुल्यम् । न च लोके एकानेकदीपेषु प्रभातारतम्यवत्तत्कीर्त-

---

189—विष्णुपु०-2/6/37,43 । पापक्षयार्थं नैमित्तिकधर्मत्वेन सम्पादनीयं कर्म प्रायश्चित्तम् । तच्च 'प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥' इति अङ्गिरसा (उत्त०आ० 4/1) उक्तम् । 'प्रायः शब्देन अभोजनमात्रमुच्यते । तच्चात्र विशिष्टं तपः शास्त्रविहितानशनप्राजापत्यादीत्यर्थः ।' इति प्रायश्चित्तविवेकतत्त्वार्थकौमुदीकारेण गोविन्दानन्दकविकङ्कणाचार्येण लक्षितम् । 'अकुर्वन् विहितं कर्म निन्दितं च समाचरन् ।' इति प्राक्प्रपञ्चितादशुभानि कर्माणि कृत्वा मनुष्यः पापक्षयार्थमनुरूपाण्यशेषाणि प्रायश्चित्तानि कुर्यात् । कृच्छ्रचान्द्रायणादीनां तेषां प्रायश्चित्तानामनशनादिरूपेण साधनेऽपि प्रकारान्तरमाह मनुः यथा (11/227)—'ख्यापनेनानुतापेन तपसाध्ययनेन च । पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥' इति । तथा च श्रीमद्भागवतषष्ठस्कन्धे (1/13-16) 'तपसा ब्रह्मचर्येण शमेन च दमेन च । त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः । क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वन्ति कार्त्स्न्येन निहारमिव भास्करः ॥ न तथा ह्यघवान् राजन् ! पूयेत तप आदिभिः । यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥' इति ।

नेऽपि तथा स्यादिति वाच्यम् । न हि परिच्छिन्नमहिमले हरिनाम्नि एकस्मिन् भूयसि वा एकानेकचिन्तामणिकामधेनुष्विव फलतारतम्यं वक्तुं कार्यम्, एकानेकयोः समत्वात् । तार्किकमते कालाकाशदिगात्मचतुर्णां तदन्यतमस्य च परिमाणतौल्यवत् । दीपादीनां न्यूनाधिकप्रभत्वेन फलतारतम्यस्य सुवचत्वादिति तथापि नामावृत्तिराशङ्कितजन्मान्तरभूतत्वाद् विदुरिति क्षयार्थम् । भाविपापस्यातर्कितत्वेऽपि तत्समशिष्टाचारात, भरतजयविजयादिनिष्पापवैष्णवानामपि कदाचित् पापसम्भवाच्चेत्यादि विस्तृतं नामकौमुदी वैष्णवसर्वस्वादावित्युपरम इति । केचिन्मधुसूदनकीर्तने प्रत्यक्षतः पञ्चाङ्गकरन्यासादिकं कृत्वा

> 'प्रलयजलधितोयो जानुदघ्ने स्वकर्णो-
> त्थितमधुदनुजस्य च्छेदने यत्नवन्तम् ।
> धृतसरसिजहस्तं शङ्खकौमोदकीभ्यां
> करविनिहितचक्रं तं भजे चोग्रमूर्त्तिम् ॥'

इति ध्यानमपि पठन्ति । मन्त्रेषु ध्यानन्यासादिसत्त्वेऽपि कीर्तने तददर्शनात् । अन्यथा गोविन्दपुरुषोत्तमादिकीर्तनेष्वपि ध्यानकरन्यासापत्तिः । यद्यपि

> 'यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
> न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥' (स्कन्दपु०)

इति नामकीर्तनं नित्यं कर्माङ्गं तथापि संयोगपृथक्त्वन्यायात् 190 पापप्रायश्चित्तमपीति श्रीधरस्वामी । एतेन शिवदुर्गादिनाम्नां कर्माङ्गत्वमिति भ्रान्तिः, वचनानुपात्तत्वादिति स्यात्कथम् ? एतत् साङ्गाह्निक पद्यं यच्चास्मद्भक्तिसर्वस्वे –

190—नित्यत्वे काम्यत्वे सति उभयरूपतया संयोगपृथक्त्वम् । तस्य च न्यायस्य विचारो यथा जैमिनीयन्यायमालाविस्तरे (4/3/3)—'दध्ना त्विन्द्रियकामस्य नित्येऽन्यद्धुत तद्धि । अन्यत्स्यात्पूर्ववन्मैवं संयोगस्य पृथक्त्वतः ॥ अग्निहोत्रे श्रूयते । दध्नेन्द्रियकामस्य जुहुयादिति । तत्र दध्नः काम्यत्वान्नित्येऽग्निहोत्रे पूर्वन्यायेन न तद्धि प्रयोक्तव्यम् । किन्तु अन्यदेव किञ्चिद् द्रव्यमिति चेत् । मैवम् । दध्ना जुहोतीत्यस्मिन् वाक्यान्तरे कामसंयोगमनपन्यस्य नित्यहोमसंयोगेन दधिविधानात् । तस्मादेकस्यापि दघ्नो वाक्यद्वयेन नित्यत्वं काम्यत्वं चाविरुद्धम् । एवमग्नीषोमीयपशौ खादिरे बध्नाति । खादिरं वीर्यकामस्य यूपं कुर्वीतेत्याद्युदाहरणीयम् ।' इति ।

'निर्बीजे पापनाशे भवति फलमये जातिदिग्देशकाला-
शौचादेश्चानियत्यामपि सकृदसकृन् कीर्तनं नो भवेद् वा ।
ज्ञानाज्ञानोपपत्तौ शुचिवरसुधियोऽपीदृशं नाम हित्वा
पूर्त्तेष्टादौ यतन्ते श्रमकृतिफलिनो न्यायसिद्धान्तितांशे ॥' ?

अथ प्रकृतमुच्यते ।

'अन्यदेवगृहे नीत्वा पूजनीयः सदाशिवः ।'

इति वचने सदाशिवपदस्य विष्णुसूर्यादिसर्वदेवोपलक्षणत्वात् सर्वदेवपूजा शुचिनाऽन्येन कार्या । यत्तु,

'मया भक्त्या प्रकर्तव्यं पूजनं सर्वदा तव ।'

इति स्कान्दे विष्णुशर्मप्रतिज्ञायां सर्वदापदादशुचिनाऽपि विष्णुपूजा कार्येति सिंहवाजपेयिनोक्तम् । तन्न सामाचारिकम् । प्रतिज्ञावशान्महतो विष्णुशर्मणस्तत्करणेऽपि अन्येषां सङ्गवद् विष्णुपूजायां मानाभावात् ।

'अशुचिर्भिन्नमर्यादो यः कुर्याद् विष्णुपूजनम् ।
न तत्फलमवाप्नोति नरकं प्रविशेत्पुनः ॥'

इति वृहद् गौतमीयात् । अन्यथा

'नित्यं नामसहस्रं तु पठनीयं प्रयत्नतः ।'

इत्यस्यापि तदाचरणादशौचे सहस्रनामपाठे बहूपवासप्रसङ्गः । यदि तु

'सूतके मृतके विष्णुमस्पृष्ट्वैव प्रपूजयेदि'ति

आलोच्यते तदा नित्यं विष्णुपूजकानां स्पर्शरहिता पुष्पाञ्जल्यादिक्षेपोत्थिता हरिपूजाऽस्तु । विष्णुपदस्योपलक्षणत्वेन शिवसूर्यादीनामपीदृशी पूजा निर्बाधेत्यपि केचित् ।

वृषोत्सर्गस्यापि काम्यत्वादशौचे निषेधः,

191 'एकादशे त्रिपक्षे च षण्मासे वत्सरे तथा ।
वृषोत्सर्गं प्रकुर्वीत यः पितुः स्वर्गमिच्छती'तिकात्यायनीयात् ।
'यदि पुत्रवती नारी म्रियेत भर्तुरग्रतः ।

191—प्रसङ्गेऽस्मिन् पारस्करगृह्यसूत्र (3/9) हरिहरभाष्ये स्मृतिवचनमेवम्, यथा—'एकादशेऽह्नि सम्प्राप्ते यस्य नोत्सृज्यते वृषः । प्रेतत्वं हि स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥' इति । पण्डितसर्वस्वकारेणापि तत्प्रकरणे 'एकादशाहे त्रैपक्षे षण्मासे वत्सरे तथा । वृषोत्सर्गं सुतः कुर्यात्पितुश्चेत्स्वर्गमिच्छति ॥' इत्युपन्यस्तमिति ।

वृषं नैवोत्सृजेत्तस्या यावज्जीवति तत्पतिः ॥' 192

यावदित्यनेन पतिमरणानन्तरं कालान्तरे सत्त्वे तु वृषोत्सर्गः कार्य इति सूचितम्। पैठीनसिः —

'विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि ।
न तत्र सूतकं तद्वत्कर्मयज्ञादि कारयेत् ॥'

विवाहपदमासन्नरजस्कायाः सन्निहितदिनानि त्यजेत् । एवं ग्रहयज्ञपदं कृतसम्भारस्य दिनान्तरालाभपरम्। एवमन्यत्र। कारयेदिति चान्येन प्रतिनिधिना विवाहग्रहयज्ञादि समापयेदित्यर्थः । ज्योतिष्टोमादीनां श्रौतत्वात् 'वैतानोपासनाः कार्या' इति वचनाद् 'वसन्ते ज्योतिष्टोमेन यजेते'ति श्रुतौ वीप्सावकाशाच्चाशौचेऽपि तदारम्भे ध्रौव्यम् । एतेन प्रवासज्योतिष्टोमादिकमशौचे निषिद्धमिति वाजपेयिमतं दूरीकृतम् । सिंहराजपेयिमतत्रदशौचे तदाचारे क्षयाभावात् । विवाहदुर्गेति पैठीनस्युक्तं देशविशेषपरमिति केचित् 193 । विष्णुः 194— ''न देवप्रतिष्ठोत्सवविवाहेषु । न देशविभ्रमे, आपद्यतिकष्टायामशौचम् ।' देवप्रतिष्ठेत्यत्र कृतसम्भारेष्वित्यादि । तडागारामप्रतिष्ठादेरपि विवक्षितत्वाद् देवेत्यत्रान्तर्भावः । आपस्तम्बः 195—

'देवद्रोण्यां विवाहे च यज्ञेषु प्रततेषु च ।
सङ्कल्पितं सिद्धमन्नं नाशौचं मृतसूतके ॥'

192—गदाधरपद्धतौ (P. 410) 'पत्युरग्रतः' इति गोभिलवचनद्वितीयचरणे पाठान्तरम्। एतेन विधवाया मरणे वृषोत्सर्गः कार्यो न तु जीवत्पतिकायाः। जीवत्पतिकामरणे धेनुदानव्यवस्था प्रदर्शिता निर्णयसिन्धुकारेण (P.420), यथा—'पतिपुत्रवती नारी भर्तुरग्रे मृता यदि । वृषोत्सर्गं न कुर्वीत गां तु दद्यात्पयस्विनीम् ॥' इति ।

193—विज्ञानेश्वरेण (याज्ञ०मिता०-3/29) इत्थमुपन्यस्तम्, यथा - 'विप्लवाभावेऽपि क्वचिद्देशविशेषेण पैठीनसिना शुद्धिरुक्ता - 'विवाहदुर्गयज्ञेषु ..।' इति ।

194—विष्णुस्मृतिः-22/53, 54, 55 । 'न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः ।' इति पाठान्तरमिति ।

195—'कल्पितं सिद्धमन्नाद्यम्' इति (आप०-10/16) पाठान्तरम् ।

देवद्रोणी स्वयम्भुविष्णुशिवादिपूजा, सिद्धान्नं शुचिभिरन्यैर्देयमिति भावः । यद्यपि यज्ञे वरणं विवाहादौ नान्दीमुखं च प्रारम्भो निरुक्तस्तथाप्येतद्वचनात् सर्वकर्मसु ताम्रपात्रकृतसङ्कल्प 196 स्यारम्भत्वविकल्पः । प्रजापतिः—

'अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचं न बाधकम् ।।'

तदुत्तरपुत्रजन्मप्रेताशौचवदितिभावः । तात्कालिकीति जातकर्माङ्गगोहेमवस्त्र-दानादौ 197 नान्यत्रेत्याशयः । यत्तु निरूढपशुबन्धसोमयोः पर्वान्तरे सावकाशत्वान्नाशौचेऽनुष्ठानमिति सिंहवाजपेयिभिरुक्तम्, तदसत् । स्मार्तनिषेधवाक्याच्छ्रौतकर्मण्यवृत्तौ दौर्बल्यं प्रयोजकम् । न तु

'वैतानोपासनाः कार्याः',
'श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ।'

इत्यादिवाक्यस्य दिनान्तरासाध्यश्रौतकर्मस्वेवाशौचे प्रतिप्रसवो न तु दिनान्तर-साध्येषु तेष्वित्यत्र मानमस्ति । तथा सति पौर्णमासेष्ट्या अपि अशौचानन्तर-ममावास्यायां समासेन क्रियालाभात् लोपापत्तौ स्वोक्तिविरोधः । अत एव गुर्वादित्यगुर्वस्तसिंहबृहस्पत्यादिनिषेधो न सोमयागादौ बाधकः । शुक्रास्तमलमासादिकृतनिषेधस्तु,

'बाले वा यदि वा वृद्धे शुक्रे वाऽस्तमुपागते ।
अग्न्याधेयादिकं सर्वं वर्जयेन्मलमासवत् ।।' 198

196—सर्वत्र साधारण्येन ताम्रपात्रकृतसङ्कल्पव्यवस्था प्रतिपाद्यते कालमाधवकारेण (P. 343), यथा 'गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः । उपवासं तु गृह्णीयाद्यद्वा वार्येव धारयेत् ।।' इति ।

197 संस्कारेषु चतुर्थोऽयं जातकर्माख्यसंस्कारो जाते पुत्रे तस्य मेधाजननायुष्यकरणादिसाधनकर्मविशेषः । तमभिप्रेत्य याज्ञवल्क्यमिताक्षराकारेण (3/19) वृद्धयाज्ञवल्क्यवचनमुपन्यस्तम्, यथा - 'कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वाजवासःशय्यासनादिषु ।। तत्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत् । भक्षयित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत् ।।' इति । पराशरेण (12/23) कार्येऽस्मिन् रात्रावपि दानमुक्तम्, यथा—'पुत्रजन्मनि यज्ञे च तथा चात्ययकर्मणि । राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि ।।' इति ।

198—'बाले वा यदि वा वृद्धे शुक्रे वाऽस्तं गते गुरौ । मलमास इवैतानि

इति वचनात्पाल्यते । किञ्चैवमाश्रयणमपि निर्वर्त्तते । अनन्यगतिकत्वात् तत्कृतौ तस्यैव नियामकत्वेन वैतानवर्जमिति श्रौतसामान्यानर्थक्यम् । अमावास्याष्टकादेरनन्यगतिकत्वादशौचे क्रियापत्तिश्च । अत एव विज्ञानेश्वर-माणिक्यदेवादिभिरेतद्विशेषेणोदितम् । 'वसन्ते वसन्ते ज्योतिषा यजेत, पशिवज्या सम्वत्सरे सम्वत्सरे प्रावृषी'ति कल्पसूत्रवीप्सया तयोरशौचेऽपि क्रियाऽऽवश्यकीत्यास्तां तावत् ।

पराशरः 199—'अज्ञानाद् भुञ्जते विप्राः सूतके मृतकेऽपि वा ।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ॥
गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्रसूतके ।
विशः पञ्चशतेनैव क्षत्रियस्य शतेन च ॥
ब्राह्मणस्य यदा भुङ्क्ते प्राणायामेन शुद्ध्यति ।
अथवा वामदेव्येन साम्ना चैकेन शुद्ध्यति ॥'

ज्ञानेन भोजने तु विष्णुः (22/8-10, 16)—'ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य तावदशौचं यावत्तेषाम् । अशौचापगमे प्रायश्चितं

वर्जयेद् वदर्शनम् ॥' इति निर्णयसिन्धौ (P. 11) वृहस्पतिवचनम् । बाल्यादिपरिमाणं तत्र (P.12) वृत्तशते-'बालः शुक्रो दिवसदशकं, पञ्चकं चैव वृद्धः, पश्चादह्नां त्रितयमुदितः, पक्षमैन्द्र्यां क्रमेण । जीवो वृद्धः शिशुरपि तथा, पक्षमन्यैः शिशू तौ, वृद्धौ प्रोक्तौ दिवसदशकं, चापरैः सप्तरात्रम् ॥' इति । मलमासवर्ज्यान्युक्तानि कालादर्शे, यथा— 'अनन्यमनिमित्तं च दानं यन्महदादिकम् । अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणम् ॥ देवारामतडागादिप्रतिष्ठा मौञ्जीबन्धनम् । आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः ॥ राजाभिषेकः प्रथमश्चूडाकर्मव्रतानि च । अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम् ॥ स्नानं विवाहो नामानि तथाऽऽपन्नं महोत्सवम् । विद्यारम्भं समाप्तिं च कर्म काम्यं च पाप्मनः ॥ प्रायश्चित्तं च सर्वं हि मलमासे विवर्जयेत् ॥' इति ।

199—पराशरस्मृतौ (11/17-19) 'वैश्ये पञ्चसहस्रेण त्रिसहस्रेण क्षत्रिये । ब्राह्मणस्य यदा भुङ्क्ते द्विसहस्रं तु दापयेत् ॥' इति पाठान्तरम् । वामदेव्यम् 'कयानश्चित्र आभुवत्' इत्यादि तृचम् । शुक्लयजु० 36/4-6 यथा—'कयानश्चित्र अभुवदतीसदा वृधः सखा । कया शचिष्ठया वृता ॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळ्हा चिदारुजे वसु ॥ अभीषु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः ॥' अत्र गीयमानं साम वामदेव्यमिति ।

कुर्यात् । सवर्णाशौचे द्विजो भुक्त्वा स्रवन्तीमासाद्यतन्निमग्नस्त्रिरघमर्षणं 200 जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेत् । शूद्राशौचे द्विजो भुक्त्वा प्राजापत्यं चरेत् ।' सकृदेवान्नमित्यत्रान्नं भक्तम् । द्विजो भुक्त्वेत्यत्र भोजनं गुडधान्य-लाजादीनाम् । यत्तु शातातपीये

'यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निक्षिप्य तं ग्रास स्नात्वा विप्रो विशुद्ध्यति ॥
भक्षयित्वा तु तं ग्रासमहोरात्रेण शुद्ध्यति ।
अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुद्ध्यति ॥'

इति वाक्ये अशुचिपदं सूतकमृतकाशुच्यर्थमिति हलायुधेनोक्तम् तदसत्, स्नात्वेतिलिङ्गेन तस्य शूद्रोदक्यास्पर्शादिबाह्याशौचार्थकत्वात् । अन्यथा दशाहमध्येद्दशस्नानेनापि शुद्ध्यभावेनादशाहान्तमुपवासापत्तिः । भक्षयित्वे-त्यह्नोर्द्ध्वासङ्गतिश्च । न च सूतकीतिप्रकरणगतत्वेन तत्परमिदमिति वाच्यम् । प्रकरणसत्त्वे मानाभावात् । श्रुतिलिङ्गवाक्यप्रकरणेषु लिङ्गात् प्रकरणस्य दुर्बलत्ववचनाच्च ।

'मृतकान्ते द्वितीयेऽह्नि शय्यां दद्याद्विचक्षणः ।
काञ्चनं वसनं तच्च फलवस्त्रसमन्वितम् ॥'

इति मात्स्यात् द्वितीयेऽह्नीतिस्वरसात् एकादशाहश्राद्धवन्मृतशय्या एकादशाहेऽ-शौचेऽपि देयेति माणिक्यदेवः । शुचिना त्वेतद्दानं कार्यमिति दिक् ।

अथाङ्गाशौचम् ।

देवलः 201 —'दशाहादित्रिभागेन कृते सञ्चयने क्रमात् ।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः ॥
त्रिचतुःपञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु ।'

200—ऋतं च सत्यं चेत्यादिसूक्तम् अघमर्षणेन द्रष्टव्यम् ,यथा(ऋक् 3/8/48)— 'ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधिसम्वत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥' इति ।

201—'भोज्यान्नो दशभिर्विप्रः शेषा द्वित्रिषडुत्तरैः ।' इति वीरमित्रोदय-शुद्धिप्रकाशे (P. 91) देवलवचने द्वितीयश्लोकस्यापरार्धम् ।

व्यासः — 'प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके ।
अस्थिसञ्चयनं कार्यं बन्धुभिर्हितबुद्धिभिः ।।'

प्रथम इत्येकाहपक्षे स्नानानन्तरमङ्गाशौचस्पर्शः द्वितीय इति त्रिदिनपक्षे, तृतीय इति चतुःपञ्चषड्दशपक्षेषु, चतुर्थ इति दशाहपक्ष इति विवेकः । गोभिलीयानां द्वितीये तृतीये वाऽस्थिसञ्चय इति केचित् 202 । वृद्धहारीतः —

'सर्वेषामेव वर्णानां त्रिभागात् स्पर्शनं भवेत् ।
त्रिचतुःपञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु ।।'

अयं त्रिभागादिपक्षो ज्यायान्, खण्डपूर्णाशौचानुगमकत्वात् ।
संवर्तः 203—'माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ।'

दशाहेनेति द्वितीयादस्थिस्पर्श एव । पुत्रजन्मनि स्नानात् प्राक् पिता त्वस्पृश्य इति भावः ।

'यदि पत्न्यां प्रसूतायां नरः सम्पर्कमृच्छति ।
सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित् ।।' 204

सम्पर्केति तद्वाक्याशौचविवक्षणात् सूतिवदस्पृस्यसूचकम्, सूतकादिदिनसङ्ख्यकम्; कर्मानर्हास्पृश्यसूचकम् प्रायश्चित्तान्तरसत्त्वेऽपि वचनादेतत् समुच्चयमुररीकृत्य प्राप्नोति । पत्न्यामिति लिङ्गात् नरः पतिः । सम्पर्कं सम्भोगम् । सम्पर्कस्य स्पर्शार्थत्वापत्तिः । 'सत्रप्रसवित्रीस्पृश्ये तत्तत्वयमस्पृश्यत्वं कर्मानर्हत्वादशौचमि'ति गोपीनाथवाजपेयिनः । तदाचारविरुद्धम् ।

संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ।।'

202— छन्दोगपरिशिष्टेऽप्यनुरूपं प्राप्यते, यथा (23/9)- 'अपरेद्युस्तृतीये वा अस्थ्नां सञ्चयनं भवेत् ।' इति । अस्थिसञ्चयनविधिरपि तत्र (23/9-13) दर्शितः, यथा 'यस्तत्र विधिरादिष्ट ऋषिभिः सोऽधुनोच्यते ।। स्नानान्तं पूर्ववत्कृत्वा गव्येन पयसा ततः । सिञ्चेदस्थीनि सर्वाणि प्राचीनावीत्यभाषयन् ।। शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः । आज्येनाभ्यज्य गव्येन सेचयेद् गन्धवारिणा ।। मृत्पात्रसम्पुटं कृत्वा सूत्रेण परिवेष्ट्य च । श्वभ्रं खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः ।। पूरयित्वा घटं पङ्कपिण्डशैवालसंयुतम् । दत्त्वोपरि समं शेषं कुर्यात्पूर्वाह्णकर्मणा ।।' इति ।

203 'जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ।' इति संवर्त (1/42-43) वचने प्रथमार्धपाठः ।

204-'सम्पर्कं कुरुते द्विजः' इतिद्वितीयचरणपाठान्तरं पराशरस्मृतौ (3/27) ।

इति सामान्यतः स्नानाच्च । अस्तु वा सम्पर्कपदं रागकामकृतस्पर्शबोधकमिति ध्येयम् । सिंहराजपेयिनस्तु,

'सर्वं गात्रमसंस्पृश्यं तत्र स्यात् सूतके सति ।'

इति ब्राह्मणान् सूतकमध्येऽन्यसूतके तयोर्यावत्कालं योगस्तावदङ्गाशौचं स्यात् । एवं मृतकमध्ये तयोर्योगे अङ्गाशौचमिति सिद्धम् । न चैवं तर्हि सूतकमृतकयोर्योगेऽप्यङ्गाशौचं स्यादिति वाच्यम् । पूर्वत्रासिद्धमिति तयोर्पूर्वं प्रति परासिद्ध्या पूर्वापरबाधाभावन्यायेन सूतकेन सूतकस्य बाधाज्जन्यग्नियोगाभाववन् तयोर्योगाभावादिति वदन्ति । वस्तुतस्तु, प्रत्येकमवृत्तिमतः समुदायवृत्तित्वेनेति शास्त्रसिद्धान्ता । प्रत्येकसूतिकावृत्तेरङ्गाशौचस्य कथं सूतकद्वयवृत्तित्वमापाद्यम् । द्रव्यत्वघटत्वादेः प्रत्येकवृत्तित्वेनैव समुदायवृत्तित्वाभ्युपगमात् । अतएव नव्यतार्किकाः घटादिबहुत्वादेः समवायसम्बन्धेनैकैकघटादिवृत्तित्वमुपगम्य पश्चात् पर्याप्तिसम्बन्धेन तत्समुदायवृत्तित्वमुपयन्ति । घटपटादेः परमाणुपञ्चभिन्नैकद्रव्यरूपत्वादेव प्रत्यक्षत्वाबाधात् । किञ्च वचनबलात् सूतकयोर्योगेऽङ्गास्पर्शेऽपि मृतकद्वययोगे तत्कल्पने बीजाभावः । प्रत्येकवृत्तेः समुदायवृत्तिर्नियमादिति चेत् सिद्धमस्मन्मतानुप्रवेशेन । तस्माद् ब्राह्मणे सूतकपदस्य कर्मलोपकत्वादिसादृश्यमूलगौणीलक्षणया मृतकार्थकत्वात् तत्र मृतौ मृत्यन्तरयोगे सतीत्यर्थापनीयम् । दशाहं सूतकी भवेदित्यादौ सूतकस्य मृत्यर्थदर्शनात् । प्रागेवमुक्ते माणिक्यदेवकालिदासादिकृतग्रन्था अपि मृत्योर्योग एवाङ्गाशौचमित्यर्थे सुयोगाः । तस्मात्

'सर्वं गात्रमसंस्पृश्यं तत्र स्यात् सूतके सति ।'

इति ब्राह्मणं मृतत्रिभागप्राप्ताङ्गाशौचस्यावयुत्यानुवादः । विध्यन्तरकल्पने गौरवात् । किञ्च सूतकद्वययोगेऽङ्गस्पर्शो नाचारसिद्धः ? सूतकमृतकयोर्बाध्यबाधकत्वेन योगासम्भवेऽयुक्तवचनादापाद्ययोगे अङ्गाशौचापत्तिश्चेदास्तां तावत् ।

अथ प्रथमाब्दनियमाः ।

'प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नैव पित्र्यं वा यावत्पूर्णो न वत्सरः ॥' 205

205 – निर्णयसिन्धौ (P. 432) 'न दैवं नापि वा पित्र्यमि'ति पाठान्तरेण

यमः 206—'तीर्थस्नानं महादानं श्राद्धं चैवान्यतर्पणम् ।
प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने ॥'

अन्यतर्पणं प्रकृतनित्यपितृमातृतर्पणभिन्नम् भ्रातृपितृव्यभीष्मादितर्पणम् 207 । श्राद्धं युगाद्यमहालयादिकम् 208 । इदं योजनायोजनतुल्यम् , आचारात् । श्रा. स्थाने स्वाध्यायमिति क्वचित्पाठः ।

'पित्रोरब्दमशौचं स्यात् षण्मासं मातुरेव च ।
मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥' (वृहन्मनुः)

देवलवचनम् । दैवं देवतापूजनसम्बन्धीयतीर्थस्नानाग्नितर्पणाभ्युदयिकश्राद्धादिकर्म, पित्र्यं पितृतर्पणश्राद्धादिकर्म । वार्षिकश्राद्धात्पूर्वमेतत्कर्म न कर्तव्यमिति ।

206—मुद्रितयमस्मृतौ नास्ति । किन्तु अत्रिस्मृतौ (श्लोकः-393) एवमुक्तम् , यथा—'तीर्थस्नानं महादानं यच्चान्यत्तिलतर्पणम् । अब्दमेकं न कुर्वीत महागुरुनिपाततः ॥' इति । तीर्थस्नाननिषेधोऽत्र समन्त्रस्नानमुण्डननिवारणपरक इति ।

207—माघशुक्लाष्टम्यां भीष्मतर्पणम् । तदुक्तं निर्णयसिन्धौ (P. 164) पाद्मे—'माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम् । श्राद्धं च ये नराः कुर्युस्ते स्युः सन्ततिभागिनः ॥' इति । 'एतत्करणे द्विजानामधिकारः । तर्पणमन्त्रश्च तत्रोक्तः, यथा-'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः । आभिरद्भिरवाप्नोति पुत्रपौत्रोचितां क्रियाम् ॥ वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च । अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥ वसूनामवताराय शान्तनोरात्मजाय च । अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे ॥' इति । जीवत्पितृकस्याप्यत्राधिकार इति ।

208—युगादिनिरूपणं यथा ब्राह्मे—'वैशाखशुक्लपक्षे तु तृतीयायां कृतं युगम् । कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेऽहनि ॥ तथा भाद्रपदे कृष्णत्रयोदश्यां च द्वापरम् । माघे तु पौर्णमास्यां च घोरं कलियुगं स्मृतम् ॥ युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥' इति । मघानक्षत्रयुक्ता त्रयोदशी 'महालया' इत्युच्यते । तद्विचारे यथा वृहन्मनुः—'नभस्यस्यापरः पक्षो यत्र कन्यां व्रजेद्रविः । स महालयसंज्ञः स्याद् गजच्छायाऽऽह्वयस्तथा ॥' इति । आदिपदेन मन्वादिरपि गृह्यते । तत्र श्राद्धविचारो मात्स्ये—'कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता । मन्वन्तरादयश्चैते दत्तस्याक्षयकारकाः ॥' इति ।

मातुः कनिष्ठमातुः । भार्याभ्रातृपुत्रादीनां त्रिमासाद्यशौचे बहूनां काम्यलोपो निर्मूलः ।

'तथैव काम्यं यत्कर्म वत्सरात् प्रथमादृते ।' 209

इति वचनान्नित्यनैमित्तिकयोर्न हानिः । काम्यं गणेशव्रतमाघस्नानादिकम् 210, नित्यं कार्त्तिकव्रतादिकं 211 तु कार्यम् । एवमन्यत् ।

'एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा ।' 212

इत्यादिसपिण्डीकरणेऽष्टकालव्यवस्था । गालवः—

'सपिण्डीकरणश्राद्धमुक्तकाले न चेत्कृतम् ।
रौद्रे हस्ते च रोहिण्यां मित्रभे च समाचरेत् ॥
अशौचान्ते भवेद्राज्ञो वैश्यानां च सपिण्डनम् ।'

मात्स्ये — 'सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।

209—'अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा ।' इति निर्णयसिन्धौ (P 432) हारीतोक्तेः पूर्वार्धम् ।

210—'विनायकं समभ्यर्च्य चतुर्थ्यां यदुनन्दन ! सर्वविघ्नविनिर्मुक्तः कार्यसिद्धिमवाप्नुयात् ॥' इति भविष्यपुराणे गणेशव्रतम् । 'आयुरारोग्यसम्पत्तौ रूपे सुभगतागुणे । येषां मनोरथस्तैश्च न त्याज्यं माघमज्जनम् ॥' इति माघस्नानम् । फलश्रवणादुभयोः काम्यत्वम् ।

211 कार्त्तिकव्रतमत्र चातुर्मास्यव्रतपरकम् । तत्कर्तव्यता यथा महाभारते 'वार्षिकान् चतुरो मासान् व्रतं किञ्चित्समाचरेत् । असम्भवे तुलार्के तु कर्तव्यं तत्प्रयत्नतः ॥ वार्षिकान् चतुरो मासान्केनचिद्वाहयेन्नरः । व्रतेन तेन नाप्नोति कल्मषं वत्सरोद्भवम् ॥' इत्यनेनास्य नित्यत्वमिति ।

212 'एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा । षष्ठे चैकादशे वाब्दे सम्पूर्णे वा शुभागमे । सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः ॥' इति निर्णयसिन्धौ (P. 427) सम्पूर्णं कालादर्शवचनम् । तत्र च साग्निनिरग्निभेदेन व्यवस्था उक्ता, यथा—'साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नौ तृतीयकः । अनग्नेस्तु द्वितीयाद्याः सप्त काला मुनीरिताः । रोहिणीरौद्रहस्तेषु मैत्रभे वाऽपि तच्चरेत् ॥' इति । सपिण्डीकरणव्यवस्थोक्ता याज्ञवल्क्येन, यथा 1/253,254)—'गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् । अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् । एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥' इति ।

वृत्तिपूर्त्तेष्टियोग्यश्च गृहस्थश्च ततो भवेत् ॥'

पार्वणमित्यत्र वर्षादूर्ध्वमित्यादि । अन्यथा प्रथमवर्षे युगाद्यत्यागाद्यापत्तिः । 'तीर्थस्नानं महादानमित्यस्य पितर्युपरत इति वक्ष्यमाणस्य च विरोधात् । पार्वणभुक् मासिकाद्येकोद्दिष्टाभावभुगिति वा तस्यार्थः ।

'दीपदानं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
प्रथमेऽब्दे न कुर्वीत योजनेऽपि कृते सति ॥' वृहन्मनुः)

योजनं सपिण्डीकरणम् , तस्य पितामहादिना सह वा सार्थकत्वात् । आपरपक्षिकममावास्यामहालयादिकम् । यत्तु

'अर्वाक् सपिण्डीकरणं यस्य सम्वत्सराद्भवेत् ।
तस्याप्यन्नं सोदकुम्भं दद्यात्सम्वत्सरं द्विजे ॥' 213

इति याज्ञवल्क्ये उक्तं तत्सपिण्डीकरणानन्तरं मासिकक्रियापक्षे । योजनात् पूर्वमिव तदनन्तरमपि मासिकादौ वचनसत्त्वात् । वर्षमध्ये त्रिपक्षादौ योजने कृतेऽपि पुनः वर्षानन्तरं तत्क्रिया निर्णेया, वार्षिकश्राद्धस्य सपिण्डीकरणकालापकर्षेण निष्पन्नत्वात् । महालयाश्राद्धस्य मुख्येऽपरपक्षे प्रथमाब्दत्वशाद् बाधे तु न पुनस्तदनन्तरदीपामायां तत्क्रिया , 'सकृद् गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवे'ति न्यायात् । न च तर्हि अशौचे अपरपक्षे महालयाबाधे दीपमायां तत्कृतं स्यादिति वाच्यम् । इष्टापत्तेः । 'पुनः प्रसङ्गविज्ञानात् सिद्धमि'ति दोषाश्रयाद् वा तदस्तु । शास्त्रीयनिषेधस्यैव बाधपदार्थत्वेन प्रवासवन्ध्यादीनामपरपक्षे लौकिकबाधे सत्येव गौणदीपामायां तच्छ्राद्धावकाशात् । वृत्तिपूर्त्तेष्टीत्यत्र वृत्तिर्याजनप्रतिग्रहहोमादि । पूर्त्तं यथाऽऽग्नेये –

'वापीकूपतडागादिदेवतायतनानि च ।

213—याज्ञ०-1/255 । वृद्ध्यादिनिमित्तेन सम्वत्सरादर्वाक् पूर्वोक्तसप्तकालेभ्योऽन्यतमे काले यस्य सपिण्डीकरणं भवेत्तस्य प्रेतस्योद्देश्येन सम्वत्सरं यावत्सोदकुम्भमन्नं द्विजाय दद्यात् । अपिशब्दात् सपिण्डीकरणं यस्य नाचरितं तस्योद्देश्येन द्विजाय सम्वत्सरं यावत् सोदकुम्भान्नदानव्यवस्था ज्ञातव्या । प्रेतत्वे निवृत्ते कर्मेदं न कर्तव्यम् । दानमत्र कर्त्तुःशक्त्यनुसारेण । 'नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥' इति विज्ञानेश्वरधृतवचनाद् बहुषु भ्रातृषु सत्स्वप्येकेनैतत्कर्तव्यम् । तेष्वपि ज्येष्ठस्यैवाधिकारः । सन्न्यासिनामेतत्कर्म न कर्तव्यम्, तस्य प्रेतत्वाभावादिति ।

ग्रहोपरागे यद्दानं सूर्यसङ्क्रमणे तथा ।

द्वादश्यादौ च यद्दानं पूर्त्तं तदिदमादिकम् ॥' 214

इष्टमाह कश्यपः —

'अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ।

आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥'

वेदानामित्यनेन ब्रह्मयज्ञादिकं ग्राह्यम् । गृहस्थः प्रथमोद्वाही ।

'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।' 215

इत्यादिवचनात् । तेन द्वितीयत्रिवाहस्तु सपिण्डीकरणात्पूर्वमपि प्रथमाब्दे च स्यादिति केचित् । प्रथमविवाहे निषिद्धे द्वितीयादेः सुतरां बाध इत्यर्थ इत्यप्यन्ये । न दैवं नैव पित्र्यं वेति लिङ्गात् स्त्रीणां मृतपित्रब्दनियमाभावः । क्वचिन्मृतपित्रब्दनियमश्च वक्ष्यमाणमहागुरुपदेन भर्त्तुर्ग्रहात् । शातातपः—

'आमश्राद्धं परान्नं च मधु मांसं तथैव च ।

वर्जयेदब्दमेकं च महागुरुनिपातने ॥'

'मधु मांसं परान्नं च मैथुनं चान्यतर्पणम् ।'

अन्यतर्पणं त्वर्थापितं प्राक् । आमश्राद्धपरान्नान्यतर्पणानां योजने कृते च प्रथमाब्दे निषेधः । मैथुनादेस्तु योजनात्पूर्वमिति भेदः । यमः—

'माङ्गल्यमुत्सवं चैव परपाके च भोजनम् ।

प्रथमेऽब्दे न कुर्वीत पुत्रो गुरुनिपातने ॥'

पुत्रपदादौरसपुत्रग्रहः । 216

'गुर्वन्नं मातुलान्नं च श्वशुरान्नं तथैव च ।

पितुः पुत्रस्य यदन्नं न परान्नमिति स्मृतम् ॥'

'श्वशुरान्नं तु यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ।'(बौधायनः)

214—गदाधरपद्धतौ (P. 292) पूर्त्तविचारो यथा—'वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामाः पूर्त्तधर्मं च मुक्तिदम् ॥ ग्रहोपरागे यद्दानं सूर्यसङ्क्रमणेषु च । द्वादश्यादौ च यद्दानं पूर्त्तं तदपि नाकदम् ॥ 'इति ।

215—प्रजापतिस्मृतिवचनमिदमिति धर्मशास्त्रशब्दकोषे गृहशब्दव्याख्याने अस्मद्गुरुपादाः कुलमणिमिश्राः ।

216—पुत्रास्तावद् द्वादशप्रकाराः स्मृतिशास्त्रेषु दर्शिताः । ते च दायादादायादभेदेन मनुना (9/159-160) उक्ताः, यथा—'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ कानीनश्च

इति निन्द्यश्वशुरपरम्। माङ्गल्यं कौमुदीपूर्णिमापुष्यावन्दापनादिकम्। 217

शङ्खः – 'पितर्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते।
मातर्युपरतायां तु पितुः श्राद्धादृते समाः।'

मातृश्राद्धादन्वष्टकादेः। ऋते समा इत्युभयसम्बन्धात्पित्रोरन्योन्यं वार्षिक न कार्यम्।

'तस्या न वत्सरं कुर्यात् प्रेते पितरि कुत्रचित्।'

इति वाक्यप्रामाण्ये तु पितृमृतिवर्षे मातृमृतिवार्षिकश्राद्धस्य विकल्पः। न चैवमेतत्तत्र वर्षे पित्रोर्मृतौ सुन्दोपसुन्दन्यायेन 218 द्वयोर्मासिकत्रैपक्षिकादिक लुप्येतेति वाच्यम्।

'अन्येषां प्रेतकार्याणि महागुरुनिपातने।
कुर्वीत वत्सरात्पूर्वं नैकोद्दिष्टं न पार्वणम्॥'

सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षड्दायादबान्धवाः॥' इति। औरसभिन्नानामन्येषां पुत्राणां 'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥' इति मनु (9/180) वचनाद्गौणत्वादौरसपुत्रग्रहणमत्र मुख्यत्वेन ज्ञातव्यम। अपि च 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।' इति तेनोक्तत्वात् (9/ 63) यतः सर्वधनाधिकारी औरसपुत्रो भवति तस्मात्पित्रन्द्रनियमसवश्यं स पालयेदिति।

217-आश्विनपूर्णिमा कौमुदीपूर्णिमेति कथ्यते तद्विचारो यथा निर्णयसिन्धौ (P. 142) लैङ्गे -'आश्विने पौर्णमास्यां तु चरेज्जागरण निशि। कौमुदी सा समाख्याता कार्या लोकेविंभूतये॥ कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावते स्थितम्। सुगन्धैर्निशि सर्वेशमक्षैर्जागरणं चरेत॥' तथ 'निशीथे वरदा लक्ष्मीः को जागर्तीतिभाषिणी। तस्मै वित्त प्रयच्छामि अक्षैः क्रीडां करोति यः॥' इति। पुष्यावन्दापना यथा ब्राह्मे –'इदं जगत्पुरा लक्ष्म्या त्यक्तमासीत्ततो हरिः। पुरन्दरश्च सोमश्च तथा शुक्रबृहस्पती॥ पञ्चैते पुष्ययोगेन पौर्णमास्यां तपोबलात्। अलङ्कृतं पुनश्चक्रुः सौभाग्योत्साहलक्ष्मीभिः॥ तस्मान्नरैः पुष्ययोगे तत्र सौभाग्यवृद्धये। धनैर्विप्रांश्च संतर्प्य नवैर्वस्त्रैश्च शोभितान्॥ ततः पुष्टिकरं हृद्यं भोक्तव्यं घृतपायसम्। पुष्ययोगेषु कर्तव्या राज्ञां वन्दापना सदा॥' इति। मङ्गलवृद्धिकार्यत्वात् पित्रोर्मृतिवर्षे सपिण्डीकरणे जातेऽप्येतन्न कर्तव्यमिति।

218–सर्वेषु शास्त्रेषु व्यवहृतोऽयं लौकिकन्यायविशेषः। एतत्प्रसङ्गे

इत्यनेन पित्रन्येषां प्रेतकार्याभावेऽपि तयोरलोपात् ।

'ज्येष्ठभ्राताऽनग्निमांश्चेत् कनिष्ठः साग्निको भवेत् ।
कनिष्ठेनैव कर्तव्या सपिण्डीकरणक्रिया ॥' 219

अनग्निमान् दर्शत्रयादिनोच्छिन्नाग्निः । अथवा अनग्निमानेकाग्निः । भूम्नि मतुप् । यद्वा प्राशस्त्ये मतुप् । उभयत्र साग्निपदं मत्वग्निप्रशस्ताग्न्यर्थकम् । अनधिकारेणानाहिताग्निर्वा । इति सङ्क्षेपः ।

अथोपवासविचारः ।

'अपत्ये भ्रातरि गुरौ कलत्रे च मृते सति ।
स्नात्वोपवासं कुर्वीत श्रुत्वा कालान्तरेष्वपि ॥'

इत्यशौचादावुपवासकथनात् तन्निरूप्यते । ननु किं नामोपवासत्वम् ? उपपूर्ववसतेर्भोजनाभावबोधकत्वाद्भोजनाभावत्वं 220 तत् । अचेतनेऽपि घटादावुपवसतीति प्रयोगापत्तेः । न च चैतन्यविशिष्टं तत् , पशुपक्ष्यादौ तदापत्तेः । भोजनस्य गलोदरकवलसंयोगरूपत्वेनाव्याप्यवृत्तित्वाद् भुञ्जानोऽप्युपवसतीति प्रयोगापत्तेश्च । न चात्र प्रतियोगिवैयधिकरण्यं निरवच्छिन्नत्वं

काचिदाख्यायिका वर्त्तते । सा चैवम्—'पुरा सुन्द उपसुन्दश्चेतिनामकौ द्वौ राक्षसभ्रातरावास्ताम् । द्वावपि भ्रातरावेकस्यां योषिति कामविह्वलितौ जातौ । योषितश्चातुर्येण तामेक एवोपभोक्तुमुभौ विचेष्टितौ । तेन राक्षसभ्रातृद्वयमध्ये युद्धं जातम् । अन्तिमे तावुभौ मृतावभवताम् ।' इति । सुन्दोपसुन्दसङ्घर्षजनितफलमिव पित्रोर्द्वयोर्मृतौ वर्षमध्ये किमुद्दिष्टा क्रिया कर्तव्या किमुद्दिष्टा वा नेति विवादे उभयोरपि लोपः कर्तव्य इति ।

219—अनेकविधेषु पुत्रेषु सत्सु औरसपुत्रेण सकलकार्यं सम्पादनीयमिति उक्तम् । औरसेष्वपि ज्येष्ठेनैव विद्यमानेन । तदभावे 'मातापित्रोर्मृतेः काले ज्येष्ठे देशान्तरस्थिते । कनिष्ठेन प्रकर्तव्यं सपिण्डीकरणं तथा ।' इति कार्ष्णाजिनिस्मृतेस्तथा च 'गते वा रोधिते ज्येष्ठे पित्रा वा प्रोषिते सति । षण्मासान्न निवर्तेत तदा कार्यं कनीयसा ॥' इति वचनात् कनिष्ठेन पितृकर्म सम्पादनीयम् । अपि च सति ज्येष्ठे औरसपुत्रेऽनग्निमति साग्निकः कनिष्ठ औरसपुत्रः सकलं कुर्यात् 'आहिताग्निः कनिष्ठस्तु कुर्यादेव; अन्यथा पितृयज्ञासिद्धेः । एवमावश्यकवृद्धावपि कनिष्ठोऽन्यः सपिण्डो वा कुर्यात् ।' इति निर्णयसिन्धुकार (P. 428) वचनादिति ।

220—उपवासस्य पाकनिवृत्तित्वं सूचितमाङ्गिरसस्मृतौ(पू०भा०श्लो०-974),

वा विशेषणीयम् । एवमप्युपमात्रस्य पूर्वोपदिनकृतभोजनरूपप्रतियोगिसामान्याधिकरण्येनासम्भवापत्तिः । देशवत्कालस्यापि अवच्छेदकत्वाच्च । अन्यथा रूपाभावसाध्यकपृथित्वसद्धेतौ परमाणुघटादौ साध्याभावरूपस्यापि प्रतियोगिवैयधिकरण्येन व्याप्तिसिद्धान्तलक्षणाप्रसरः स्यात् । किं च फलोपधायकोपवासस्य प्रकृतोपयोगित्वे निष्फलकस्याद्युपवासस्यार्थान्तरत्वम् । न चैवं काम्यप्रतिकारदानादिकृतोपवासस्य प्रधानद्वारा सफलत्वेऽपि प्रकृतनैमित्तिकपित्रादिमृत्युपवासादेः कथं फलवत्त्वमिति वाच्यम् । तत्र फलाश्रवणेऽपि नित्य इव विश्वजिन्न्यायेन 221 स्वर्गस्य दोषाभावस्य वा फलत्वकल्पनात् । अत्रोच्यते । अङ्गिराः—

'सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद्भक्तं चतुष्टयम् ॥' 222

तया च सफलत्वे स आद्यन्तदिनद्वये सायं भोजनाभावविशिष्टमध्यदिनप्रातः सायं

यथा—'उपावृत्तिस्तु पापेभ्यो यस्तु वासो गुणैः सह । उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥' इति । गौतममिताक्षराकारस्तु (3/1/15) निष्क्रयणेषु पठितम् उपवास इन्द्रियनिग्रहः, 'व्यावृत्तस्यैव दोषेभ्यो यस्तु वासो गुणैः सह । उपवासं तमाहुस्तु न शरीरस्य शोषणात् ॥' इति पुराणे दर्शनादित्याहेति ।

221—उपवासस्य कर्तव्यता सूचिता । तत्र फलाश्रवणे किमर्थं कर्तव्यतेति शङ्कायां समाधानार्थं ग्रन्थकारेण विश्वजिन्न्याय आश्रीयते । तस्य च न्यायस्य विचारो जैमिनीयन्यायमालाविस्तरे (4/3/5) माधवाचार्येण प्रदर्शितः, यथा 'नैवास्ति विश्वजिद्यागे फलमस्त्युत नाश्रुतेः । भाव्यापेक्षाद्विधेः कल्प्यं फलं पुंसः प्रवृत्तये । इदमाम्नायते, विश्वजिता यजेतेति । तत्र फलस्याश्रुतत्वान्नास्ति विश्वजिद्यागे फलमिति । मैवम् । फलस्य कल्पनीयत्वात् विश्वजिन्नाम्ना यागेन कुर्यादित्युक्ता भावना भाव्यमपेक्षते । किं कुर्यादित्याकाङ्क्षाया अनिवृत्तेः । अतो भाव्याकाङ्क्षापूरणाय किञ्चित्फलमवश्यमध्याहर्तव्यम् । अध्याहृते च तत्कामिनः पुरुषस्यात्र प्रवृत्त्या यागानुष्ठानं सिध्यति । अन्यथा निरधिकारित्वादननुष्ठाने विधिर्निरर्थकः स्यात् । तस्मात्फलं कल्पनीयम् ।' इति ।

222—कालमाधवे काम्योपवासक्रमप्रकरणे उद्धृतम् । बृहन्नारदीयपुराणे (2 /5) उपवासविचारोऽप्यनुरूपः, यथा—'उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयम् । पूर्वापरदिने रात्रावहोरात्रं तु मध्यमे ॥' इति ।

भोजनान्यतराभावत्वमुपवासत्वमिति लक्षणं फलितम् । मध्यदिने भोजनैक्येऽप्युभयाभावसम्भवादन्यतरानुधावनम् । नित्यनैमित्तिकयोरपि दोषाभावादिफलस्य प्राक्कथनात् फलप्रेप्सुरित्युक्तम् । अशक्तानां त्वयमुपवास आद्यन्तसायं भोजनाभावरूपविशेषेण त्यागेनोपचर्यते । शुद्धान्यतराभावस्य विशिष्टस्याभिन्नत्वेनाभेदस्य प्रतीतीत्यादिवच्छक्यसम्बन्धत्वात् ।

'स्वार्थादन्येन रूपेण ज्ञाता भवति लक्षणा ।' 223

इति न्यायात् । स्वार्थात् सशक्यात् । तथा चोक्तम्—

'विशेषनियमाशक्तोऽहोरात्रं भुक्तिवर्जितः ।'

इति । विशेषनियमः आद्यदिनद्वये हविष्याशनम् । अतएव विज्ञानेश्वरेण 224

'सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।'

इत्यत्र स्वस्वत्वध्वंसमपहाय विद्यादाने परस्वत्वोत्पादनमात्रेणापि दानत्वमानीतम् । यद्यपि निर्विशेषणमिदं दानं नित्यैकादश्यादिपरं सविशेषणं तु काम्यमहादानादिपरमिति माधवादिभिरुक्तं तथापि नित्यैकादशीजयन्त्यादौ त्रिदिनोपवासस्य अपि शिष्टाचारादुभयसमं तद् द्वयं शक्ताशक्तयोर्वर्जनीयम् । एवं विनिगमनाविरहाद् विशेषणत्यागवर्जशेषमात्रत्यागेऽपि सायं भोजनाभावरूपविशेषणेऽखण्डेऽप्युपवासत्वं निर्वाह्यम् । शुद्धपुरुषसत्त्वेऽपि शिखिनि शिखिनि नष्टः, दण्डी पुरुषो नास्तीत्यादौ शिखादण्डध्वंसाभाववत् । क्वचित्

---

223 अभिधेयार्थाद्भिन्नार्थावगमनार्थं सम्बन्ध्यर्थस्वीकारे लक्षणा भवति । तद्विचारो यथा काव्यप्रकाशद्वितीयोल्लासे –'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥' इति । 'गङ्गायां घोष' इत्यादौ मुख्यप्रवाहार्थबाधे प्रयोजनवशात् सामीप्यसम्बन्धगततटार्थस्वीकारेऽत्र लक्षणाबोध इति ।

224—दानात्फलमुक्तं सर्वत्र । दानविशेषेणापि विशिष्टफलप्राप्तिर्भवतीति प्रतिपाद्यते याज्ञवल्क्येन (1/2.2), यथा –'सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः । तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम् ॥' इति । सर्वधर्ममयं ब्रह्म अवबोधकत्वेन सर्वदानेभ्योऽधिकतमस्तद्दानेनाध्यापनादिद्वारेण ब्रह्मलोकप्राप्तिफलं मिलति । यद्यपि स्वस्वत्वनाशः परस्वत्वोत्पत्तिरेव दानं तथाप्यत्र परस्वत्वोत्पादनमात्रेण दानत्वं सिद्धम् । अत एव अत्र च ब्रह्मदाने परस्वत्वोत्पादनमात्रं दानम्, स्वत्वनिवृत्तेः कर्तुमशक्यत्वात् ।' इति विज्ञानेश्वरः तत्र प्रतिपादयतीति ।

द्रव्यत्वमित्यत्र द्रव्येतरासमवेतमात्रवच्च । अतएव विप्रमिश्रैः 225 गयाश्राद्धे स्वस्वत्वध्वंसमात्रेणापि दानत्वमानीतम् । यद्यपि गयाश्राद्धे काम्ये प्रतिग्रहात्मकाङ्गानुष्ठानमावश्यकं तथापि नित्य इव काम्येऽत्र स्थले परस्वत्वरूपाङ्गाभावकेऽपि फलम् , वचनात् । तथा च स्मृतिः—

मनसा पात्रमुद्दिश्य ततो भूमौ जलं क्षिपेत् ।
विद्यते सागरस्यान्तस्तस्यान्तो न हि विद्यते ।।'

यद्यपि स्वदाने सर्वविशेषादित्यधिकारेण स्वस्वत्वध्वंसपरस्वत्वोत्पादनयोर्द्वयोरेव दानत्वमुक्तं तथाप्युक्तवचनबलादन्यतरस्यापि दानत्वं सुवचनम् । अतस्तद् विशेषणविशेष्ययोरङ्गत्वेऽप्यन्यतरत्यागोऽशक्तपर इति साधूक्तम् । अयं विशेष्यत्यागो नैमित्तिकस्थले वचनोन्नेयः । यथा—

'माक्षिकं गोरसं क्षारं स्नेहान्नं घृतमेव च ।
हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनम् ।।' 226

इति पराशरीये । यथा वा 'दण्डयोत्सर्गे राजैकरात्रमुपवसेत् ।' इति वसिष्ठ स्मृतौ (19/40) । दिनमात्रे रात्रिमात्रे च भोजनाभावत्वस्योपवासत्वमाश्रीत्य तावतैव उक्तवचने चरितार्थे न च हस्तदत्तघृतादिस्वीकृते द्रव्ये शुद्ध्यर्थं दिवा

225—दातुः स्वत्वनाशेन प्रतिग्रहीतुः स्वत्वोत्पत्तिद्वारेण च यथा दानं सिध्यति तथा गयाश्राद्धे परस्वत्वाभावदर्शनात्कथं तत् सिध्यतीतिविचारे श्राद्धप्रदीपकारेण (P. 8) विप्रमिश्रेण कथ्यते यत् 'ननु स्वस्वत्वध्वंसपरस्वत्वोत्पत्तिफलकत्यागस्य दानत्वात् गयाश्राद्धादौ तदभावात्कथं दानतेति चेत् , परस्वत्वापत्तेः दानपदार्थानन्तर्गतत्वात् , प्रतिग्रहस्य वृत्त्यर्थत्वेन प्राप्तत्वात् विधेयत्वाभावात् । इत्यादि । 'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ।।' इति मनुना (10/76) वृत्त्यर्थत्वेन प्रतिग्रहस्योक्तत्वात् गया श्राद्धे स्वस्वत्वध्वंसमात्रेण दानत्वं सिद्धमिति ।

226—गौतममिताक्षरायां (3/5/26) हस्तदत्तानि एतानि भुक्त्वा सान्तपनव्रताचरणनिमित्तं व्यवस्था प्रदर्शिता, यथा 'यमः—माक्षिकं फाणिकं शाकं गोरसं लवणं घृतम् । एतानि हस्तदत्तानि भुक्त्वा सान्तपनं चरेत् ।।' इति । सान्तपनमत्र द्विदिनसाध्यं कृच्छ्रव्रतम् , 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ।।' इति मनुवचनात् (11/212) । एकरात्रमत्राहोरात्रपरकमिति ।

सायं विशेषणार्थं रात्रौ चेति द्विकालाभोजनप्राप्त्याऽहोरात्रोपवासः स्यादिति वाच्यम् । शक्तानामधिकं प्रविष्टमिति न्यायेनेष्टापत्तेः । यद्वा

'शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने ।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥'

इति सायं प्रातः समानभुक्तित्यागलिङ्गादाद्यन्तगतयोरेकतरलाक्षणिकम् । प्राग्वदेव भेदः शक्यसम्बन्धः, एकेतराभाव इत्यर्थः । तेनाद्यन्तयोर्दिवा भोजनाभावविशिष्टसायं भोजनमपि कदाचित्त्वे नोपवासक्षतिः । सायमाद्यन्तयोरिति सायं पदे प्रातःपदं पूरणीयम् । तेन षट्पञ्चकालभोजनाभावेनोपवासत्वम् । तस्यापि तदभ्युपगमे तु माऽस्तु मात्रपदमिति मन्तव्यम् । न च दिनमेकमभोजनम् । राजैकरात्रमुपवसेदित्युक्तस्थले दिनपदं रात्रिपदञ्चाहोरात्रार्थकमिति वाच्यम् । लक्षणया तदुपन्यासात् । अध्याहारे मानाभावाद्वाक्यभेदाच्च । अन्यथोपवासस्य दिवामात्रकृत्ये रात्रिमात्रकृतत्वानुपगमे—

'नित्यानां कर्मणां लोपे प्रायश्चित्तमभोजनम् ।' 227

इति दिनमात्रे नित्यकर्मलोपे दिवा भोजनाभावः, रात्रिमात्रे तथात्वे रात्रौ भोजनाभाव'इतिशिष्टवचनं विरुध्येत । एवं 'शेषेषूपवसेदहरि'त्यादि(मनु० 5/20) पून्नेयम् । वस्तुतस्तु, दत्तं निमित्तोपवासलक्षणम् । तन्निमित्ताव्यवहितोत्तरवचनसङ्ख्यकदिनरात्र्यन्यतरं यावत्क्षणं शिष्टविहितभोजनाभावत्वं तत्तन्नैमित्तिकोपवासत्वम् । अव्यवहितोत्तरसङ्ख्यकान्तञ्च द्वयं दिनरात्र्यन्य-

---

227 - अकरणे प्रत्यवायश्रवणान्नित्यकर्माकरणे प्रायश्चित्तव्यवस्था प्रदर्शिता मनुना, यथा (11/203)—'वेदोदितानां नित्यानां कर्मणां समतिक्रमे । स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥' इति । वेदोक्ताग्निहोत्रादिकर्मणां विशेषतः स्नातकधर्माणामपालने प्रायश्चित्तं कर्तव्यम् । तत्तु एकाहमात्रमनशनं कुल्लूकभट्टो मनुते । 'एतच्च राजन्ब्राह्मणयोरेव स्नातकव्रतानुष्ठानं तदतिक्रमे प्रायश्चित्तं च विधीयते । तथा च स्मृत्यन्तरम्—राजन्ब्राह्मणयोरेव नेतरेषां कथंचन' इति गौतममिताक्षरा (1/9/2) धृतवचनात्स्नातकपदेनात्र ब्राह्मणक्षत्रिययोः ग्रहणम् । अकामतो नित्यकर्मलोपेऽनशनमेकदिनात्मकम्, किन्तु कामतो नित्यकर्मलोपे 'अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः । चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥' इति मनु (11/41) वचनात् चान्द्रायणप्रायश्चित्तं कर्तव्यम् ।

तद्विशेषणम् । तदन्यतरसम्बन्धिनो योऽवशेषस्तद् वृत्तिचर्याविहितभोजनाभावस्तत्त्वमित्यर्थः ।

यथा – 'भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम् ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥' 228

इत्यादौ दिवा भोजनकाले स्रावे तत्स्रावक्षणमारभ्यैकरात्र्यन्तं यावत्क्षणास्तावदुपवासः । एवं रात्रौ स्रावे तत्क्षणमारभ्यागाम्यव्यवहितदिनतत्क्षणं यावत् तथा विधः । एवं हस्तदत्तगृतादौ दिवोपवासो यत्र, सङ्ख्यानवचनात्प्राप्तस्तत्र भाष्याख्यातदिवैकत्वमुपवासदिने कल्प्यम् , अध्याहार्यं वा । विशेषणमहिम्ना तत्रैकत्वग्रहणे वाक्यभेदानवकाशात् । यथा –

'सम्वत्सराद् द्विमासोनात्पुनस्तीर्थं व्रजेद्यदि ।
मुण्डनञ्चोपवासश्च सर्वतीर्थेष्वयं विधः ॥' इति ।

न च मुण्डनवदुपवासस्याप्यैकत्वलाभ इति शङ्का । उपवासस्याभावरूपत्वेनानेकाहोरात्रसाध्यस्याप्येकरूपत्वात् । किं चैकः, पूर्वपरयोरित्येवज्ञापकाद् विधेयसङ्ख्याग्रहो न नियतः । अन्यथा 'आद् गुणः' (पाणिनि० 6/1/87), 'वृद्धिरेचि' पाणिनि०-6/1/88) इत्यादिसूत्रैकत्वलाभे व्यर्थमेकपदं स्यात् । एवं पितृमात्रादिसृतौ उक्तरीत्या नैमित्तिकखण्डोपवासेन सिद्धावपि गुरुमृतानां श्रवणोत्तरं पूर्णाहोरात्रोपवासो ज्यायान् । अशक्तानां कस्यचिद्भक्ष्यस्य कल्पनं वा । यदा तु निमित्तोत्तरमातुरवृताङ्गभोजनादेः प्राप्तिस्तदाऽव्यवहिताङ्गत्यागाद् दिनान्तरे तादृशोपवासः कार्यः । तत्रापि 'अपत्ये भ्रातरि गुरावि'त्याद्युक्त्या प्रत्ययलभ्यस्य श्रवणक्षणध्वंसाधिकरणकालवृत्तूपवासस्यापि दिनान्तरे सम्भवात् । प्रत्ययादिवत्पाठक्रमग्रहेऽपि मुण्डनं चोपवासश्चेत्यनयोर्दिनान्तरे लाभाच्च ।

'त्रिरात्रमेवोपवसेच्छुना दष्टश्च सर्वतः ।' इति

छागलेयस्मृतौ –'अज्ञानाद् भुञ्जते विप्राः सूतके मृतकेऽपि वा ।
प्राणायामशतं कृत्वा शुद्ध्यन्ति शूद्रसूतके ॥

228–प्रसङ्गेऽस्मिन् आपस्तम्बवचनमनुरूपम् , यथा (9/1-2) 'भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम् । उच्छिष्टस्याशुचेस्तस्य प्रायश्चित्तं कथं भवेत् ॥ पूर्वाशौचं तु निर्वर्त्य ततः पश्चादुपस्पृशेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥' इति । गुदस्रावोऽत्र मलमूत्रविसर्जनपरकः, गुदेन सहोपस्थस्योत्सर्जनक्रियायां समभावापन्नत्वादिति ।

वैश्ये षष्टिर्भवेद्राज्ञि विंशतिर्ब्राह्मणे दश ।
एकाहं च त्र्यहं पञ्चसप्तरात्रमभोजनम् ॥
ततः शुद्धिर्भवत्येषां पञ्चगव्यं पिबेत्ततः ॥'

अत्र त्रिपञ्चसप्तसङ्ख्याद्वारा यावदिति तावदेवोपवासः । रात्रिपदमहपदं चान्यतररूपोभयार्थकम् । अन्यतरपदस्य च तद्रूपभिन्नकूटवत्त्वेन प्रत्येकं द्वयोरपि सङ्ग्रहात् । एवमन्यत्र । यावत्पदं च तादृशयत्किञ्चित्क्षणवृत्ति-भोजनोत्तरस्याभाववारणाय । तावत्पदं च रात्रौ सकृद्भोजनोत्तरं तद्रात्रिशेषं यावत्क्षणवृत्तिभोजनाभावस्य नैमित्तिकत्ववारणाय ।

'सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।' 229

इति स्मृत्या रात्रौ सकृद्भोजनानन्तरमन्यभोजनाविधानात् । गलोदरग्रास एव दिवसे । गलोदरग्रासयोगाभावरूपोपवासस्य केवलान्वयित्वेऽपि तावत्क्षणेषु प्रतियोगिवैयधिकरण्यं विशेषणीयम् । 'अशिताऽनशिता तथा' इति वचना-ज्जलाशनं तु भोजनम् ।

'अज्ञानान्नक्तभोजी स्यादहोरात्रं तु कामतः ।' 230

229—'नान्तरा भोजनं कुर्यादग्निहोत्री समाहितः ।' इति संवर्तवचने(1/12) उत्तरार्धम् ।

230—अज्ञानपूर्वकं कृते पापे लघु प्रायश्चित्तं, ज्ञानपूर्वकं कृते च गुरु प्रायश्चित्तं कर्तव्यमिति ज्ञापनार्थं वचनमेतत्सुरुचिरम् । ज्ञानाज्ञानकृतचण्डालखातजलपाने प्रायश्चित्तव्यवस्थोच्यते पराशरेण (6/25),यथा—'चण्डालखातवापीषु पीत्वा सलिलमग्रतः । अज्ञानाच्चैकनक्तेन त्वहोरात्रेण शुद्ध्यति ॥' इति । तथा च याज्ञवल्क्यमिताक्षरायां (3/289) आपस्तम्बः—'म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा । जानुदघ्नं शुचि ज्ञेयमधस्तादशुचि स्मृतम् । तत्तोयं यः पिबेद् विप्रः कामतोऽकामतोऽपि वा । अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः ॥' इति । तन्नक्तं चात्र विविच्यते । उपवासस्त्रिविधः, एकभक्तं नक्तमयाचितं चेति । दिवा भोजनाभावविशिष्टं रात्रिभोजनं नक्तस्वरूपं कालसर्वस्वे ग्रन्थकारेण निर्णीतम् । तन्नक्तस्य कालद्वयमुक्तम् , यथा निर्णय-सिन्धौ (P. 15) भविष्ये 'मुहूर्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः । नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ॥' इति । अत्र कालद्वयादधिका रभेदः प्रदर्शितो देवलेन, यथा - 'नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् । यते-र्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते ॥' इति ।

इति अकामतश्चण्डालखातजलपाने सकृद्भोजनाभावः । कामात्तु दिवारात्रे भोजनाभाव इत्यर्थः । अहोरात्रपदस्यादौ रात्रिः पश्चादहरितिव्युत्क्रमेऽप्यशक्तानामुपवासो निर्वाहः । पाठक्रमस्य त्वङ्गत्वेऽपि 231 सर्वशक्त्यधिकरणन्यायान्नित्यवन्नैमित्तिकेऽप्यत्राद्यलोपः । अत एव स्मार्तभट्टाचार्यैः षोडशश्राद्धानां मध्ये पञ्चमषष्ठादेः यस्य कस्यचिद् भ्रमादकरणेऽपि यस्य श्राद्धस्य विस्मृतिस्तस्यैव पुनः क्रिया, न पुनः प्रथमादिक्रमावृत्तिः,

---

231—प्रयोगविधौ विधेयानुष्ठानस्याविलम्बसिद्धिनिमित्तं नियमितः क्रम आश्रीयमाणो भवति अन्यथा कस्मादनन्तरं किं कर्तव्यं किं वा नेति ज्ञानं न स्यात् । स च क्रमो विततिविशेषः पौर्वापर्यरूपो वेति आपदेवाचार्येण मीमांसान्यायप्रकाशे लक्षितः । तस्य क्रमस्य श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिभेदेन षट् प्रमाणानि सन्ति । तत्र पदार्थबोधकवाक्यानां यःक्रमः स पाठक्रमः । मन्त्रपाठो ब्राह्मणपाठश्चेति पाठक्रमोऽपि द्विविधः । प्रयोगकालीनार्थस्मरणहेतुतयोपयोगान्मन्त्रपाठ 'इदमेव कर्तव्यमि'ति केवलमेवावबोधकाद् ब्राह्मणपाठात् सततं बलवान्, 'अत एवाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठादादावग्नीषोमीयानुष्ठानं पश्चादाग्नेयानुष्ठानमित्येवं क्रमं बाधित्वा मन्त्रपाठादादावाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्येव क्रम इत्युक्तमिति। आपदेवाचार्येण (मीमांसान्यायप्रकाशः P. 177) उक्तत्वात् । एतेन पाठक्रमस्याङ्गत्वं सिद्धमेव । इत्थम् उपवासे अहोरात्रशब्दवाच्यर्थयोर्मध्ये उभयस्याप्यङ्गत्वं प्राप्तम् । अङ्गिन उपवासस्य सिद्धिनिमित्तमङ्गद्वयस्याहः रात्र्याश्च ग्राह्यत्वे सति कथं तयोर्व्युत्क्रम अन्यतरलोपो वेति शङ्कायामुच्यते सर्वशक्त्यधिकरणन्यायात् । काम्यफलप्राप्त्याकाङ्क्षायामशक्तानां काम्योपवासादावनधिकारः किन्तु नित्ये नैमित्तिके वाऽधिकार एव । प्रसङ्गेऽस्मिन् काम्येऽशक्तानामनधिकारः सर्वशक्त्यधिकरणन्यायो विचार्यते जैमिनीयन्यायमालाविस्तरे (6/1/2) माधवाचार्येण, यथा—'अन्धादेश्चास्त्यसौ नो वा स्वर्गेच्छुत्वात् स विद्यते । प्रधानोक्त्यनुसारेण यथाशक्त्यङ्गवर्णनम् ॥ नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना । क्रतुं प्रति विधिस्तस्मान्नाशक्तस्याधिकारिता ॥ अन्धः पङ्गुर्बधिरो मूको गवाश्वादयश्च तिर्यञ्च इत्यादीनां चेतनत्वेन निरतिशयसुखरूपे स्वर्गे कामना सम्भवति । अथोच्यते । केषुचिदङ्गेषु शक्तिर्नास्ति । तथाहि, अन्धो नाज्यमवेक्षितुं क्षमः । पङ्गुर्विष्णुक्रमेष्वशक्तः । बधिरो नाध्वर्युप्रोक्तं शृणोति । ततः क्लृप्तीर्वाचयतीति विहितस्यानुष्ठानं

'तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ।' 232

न सिध्येत् । मूकोऽनुमन्त्रणादावशक्तः तिर्यञ्च बहुष्वशक्ता इति । तत्र यथाशक्त्यङ्गानामनुष्ठेयत्वात् स्वर्गकामो यजेतेत्यनेन प्रधानवाक्येन सर्वाधिकारः प्रतीयते । स चाज्यावेक्षणाद्यङ्गवाक्यानुसारेण न सङ्कोचयितुं युक्तः । किन्तु प्रधानानुसारेणाङ्गानुष्ठानमेव सङ्कोचयितुं युक्तम् । तस्मादन्धादेरप्यस्त्यधिकार इति प्राप्ते ब्रूमः । यद्याज्यावेक्षणादयः पुरुषार्थतया विधीयेरन् तदा तल्लोपेऽपि न क्रतोर्वैकल्यम् । इह तु क्रत्वङ्गतया ते विहिता इति तल्लोपे क्रतुरेव न निष्पद्येत । तस्मादशक्तस्य नास्त्यधिकारः ।' इति । काम्ये कर्मणि सर्वाङ्गानुष्ठानशक्तस्यैवाधिकारकथनात् अशक्तानामनधिकारः । किन्तु नित्ये नैमित्तिके वोपवासादिकर्मण्यङ्गानुष्ठानविकलेऽपि मुख्यकर्मसिद्धिः । तेनाहोरात्रेऽह्नि रात्रौ वैकतरोपवासकरणेन नैमित्तिकत्वाद्दोषो नास्तीति प्रतिपाद्यते । उपवासे अशक्तानां यथा फलमूलादिभक्षणं तथाहोरात्रोपवासासामर्थ्येऽन्यतरस्मिन् भागे उपवासो वेदितव्य इति ।

232 श्राद्धेतिकर्तव्यतायामध्यादिदाने वा आचार्यैरन्योन्यप्रकार उपदिष्टः । तदीयानां कर्माधिकारिणां तत्तत्प्रकाराननुष्ठानेऽक्रिया । सा चाक्रिया कात्यायनानुसारं त्रिविधा, यथा (3/1) – 'अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम् । अक्रिया च परोक्ता च तृतीया चायथाक्रिया ॥' इति । 'अयथाकरणं च पौर्वापर्यविपर्यासेनानुष्ठानमि'ति प्रभाटीकाकारः । कर्मसमाप्तावन्यथाकरणज्ञाने यद्यदन्यथाकरणं जातं तावदेव क्रमानुसारं पुनः कर्तव्यं न तु सर्वं कर्म, यथोक्तं कात्यायनेन (3/5)—'समाप्ते यदि जानीयान्मयैतदयथाकृतम् । तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः ॥' इति । पुनरनुष्ठानमत्राविलम्बे सुकरत्वे च ज्ञातव्यम् । यत्र प्रधानकर्मणोऽकरणमङ्गानुष्ठानं जातं च तत्र यत्कर्तव्यं तदुच्यते कात्यायनेन (3/6)—'प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः । तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ॥' इति । प्रधानकर्माकरणे पुनरङ्गानुष्ठानेन सह प्रधानकर्म कर्तव्यमित्यत्र ज्ञातव्यम् । अङ्गमात्राकरणे कृतस्य प्रधानकर्मणो नावृत्तिर्नापि वा अङ्गकर्मणामनुष्ठानम् । परिशिष्टप्रकाशकारस्त्वत्र 'तत्समाधानार्थम् 'अज्ञानाद्यदि वा मोहात्प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद् विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥' इति योगियाज्ञवल्क्योक्तमनुष्ठेयम् । एवं समाप्ते प्रयोगे अन्यथाकरणज्ञानेऽप्येतदेव समाधानमि'ति सिद्धान्तं सुस्पष्टमाहेति ।

इति कात्यायनादिति सिद्धान्तितम् । किञ्चाहोरात्रमिति चान्योन्यसमानपदार्थयोरेवैकक्रियान्वयि शाब्दम् । न त्वव्यवहितोत्तरत्वसम्बन्धेन पूर्वविशिष्टपरस्य । विनिगमनाविरहेण परविशिष्टपूर्वस्यापि प्रसङ्गेन गौरवाल्लक्षणायां मानाभावाच्च । अत एव षष्ठाध्याये 233 राजपुरोहितौ सायुज्यकामौ यजेयातामिति लक्षणाभाव वन्द्य इत्युक्तम् । एवं विशिष्टविधि 234 गौरव-

---

233—भिन्नकल्पयोः यज्ञेऽधिकारविशिष्टविचारः प्रकट्यते माधवाचार्येण जैमिनीयन्यायमालाविस्तरे (6/6/2), यथा—'सायुज्यकामौ यजतोऽनेन राजपुरोहितौ । राज्ञः पुरोहितौ राज्ञोस्तौ वा राजात्मकावुत ।। द्वयोर्द्वन्द्वसमासो वा तुल्यत्वायाग्रिमो द्वयोः । सिद्ध्यै द्वितीयो राजोक्तिसार्थत्वाय तृतीयकः ।। अभ्याहृत्यै चतुर्थः स्याद्वचनाद् भिन्नकल्पता । तनूनपान्नराशंसौ विकल्पेते समत्वतः ।। कुलाययज्ञं प्रकृत्य श्रूयते । एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति । तत्र राज्ञः पुरोहितस्य च भिन्नप्रयाजकल्पत्वादभिन्नप्रयाजकल्पत्वाय पुरोहितयोरधिकारो वाच्यः । तथा सति राज्ञः पुरोहिताविति षष्ठीसमास इत्याद्यः पक्षः । पुरोहितं वृणीत इत्युपादेयगतस्यैकत्वस्य विवक्षितत्वाद्राजद्वयमन्तरेण पुरोहितद्वयासम्भवाद्राजपुरोहितश्च राजपुरोहितश्चेत्यस्मिन्नर्थे कृतैकशेषत्वादुभयो राज्ञोः पुरोहिताविति द्वितीयः पक्षः । अराज्ञः पुरोहिताभावाद् व्यावर्त्याभावे राजपदं व्यर्थम् । ततो राजानौ च तौ पुरोहितौ चेति कर्मधारयसमास इति तृतीयः पक्षः । राजत्वपुरोहितत्वधर्मौ भिन्नजातिवर्त्तिनावेकस्मिन् व्याहतौ । तस्माद्राजा च पुरोहितश्चेति द्वन्द्वसमास इति चतुर्थः परिशिष्यते । तत्र वचनबलाद्भिन्नकल्पयोरपि सहाधिकारः । उभयोः समप्रधानत्वान्नराशंसतनूनपातौ विकल्पेते ।' इति । अत्राभिधेयार्थप्रतिपादनाल्लक्षणाभावः । इति ।

234—'स्वाध्यायोऽध्येतव्यः' इत्यनेन सकलस्य वेदस्याध्ययनकर्तव्यता बोध्यते । स च प्रयोजनवदर्थपर्यवसायी वेदो विधिमन्त्रनामधेयनिषेधार्थवादात्मकः । तत्राप्राप्तार्थविधानं विधिः यथा—'अग्निहोत्रं जुहुयात्स्वर्गकामः ।' इति । अग्निहोत्रहोमेन स्वर्गं भावयेदित्यत्रार्थो बोध्यते । यत्राग्निहोत्रकर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन 'दध्ना जुहुयात् ।' इति गुणमात्रविधानेन दध्ना होमं भावयेदिति बोधो जायते । यत्र तु कर्मगुणोभयमप्राप्तं तत्र विशिष्टविधिराश्रीयते । तद्विचारो यथा मीमांसान्यायप्रकाशे (PP. 17-18)—'यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते । तदुक्तम्—'न चेदन्येन शिष्टाः' इति ।

मपि नास्ति । न च शक्यां गतमन्यायम् । विशिष्टविधिगौरवमितिविकृतौ शब्दत्वादित्यधिकरणन्यायात् । अत एव 'वषट्कर्तुः प्रथमभक्षः' इत्यत्र 235 प्राथम्यस्य समासे गुणत्वात् तद्विशिष्टभक्षविधौ च गौरवाद्भक्षान्तर विधिरयमिति मीमांसकैरुक्तम् । अस्तु वा वचनात्क्वचिद् विशिष्टविधिः । अत्र तु हृत्कल्पनं पर्वजम् । किं चैकार्थिभावपक्षस्यैव सिद्धान्तत्वेनाहोरात्रम् इत्येकपदजन्ये बोधे क्रमाभावः । अत एव 'पितरौ भ्रातरस्तथे'तिवाक्ये 236 पितरावित्यत्र मातुः पितुश्च क्राद्धनभागित्वं वदन्तं विज्ञानेश्वरमेकपदोत्थिते बोधे क्रमो न नियत इति संदृश्य तत्क्रमे वचनान्तरं मृग्यमिति शब्दकौस्तुभे निरुक्तम् । अयं व्युत्क्रमोपवासः कदाचिन्नैमित्तिकोपवासप्रायश्चित्तयोः सम्भवन्नपि नित्यकाम्ययोर्न प्रसारणीयः । असमाचारात् । शक्तानां रात्रौ चण्डालखातजलपाने रात्रावाद्यमहोरात्रं चेति त्रिवारभोजनत्यागः । अधिकं प्रविष्टमिति न्यायात् । एवम्

शिष्टा उपदिष्टा इत्यर्थः । यथा 'सोमेन यजेत' इति । अत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम्, 'सोमवता यागेनेष्टं भावयेत्' इति । न चोभयविधाने वाक्यभेदः, विशिष्टस्यैकत्वात् ।' इति ।

235—वषट्कर्तुः प्रथमभक्षविचारो माधवाचार्येण कृतः, यथा जैमिनीयन्यायमालाविस्तरे (3/5/10)—'आद्यभक्षे वषट्कर्तुर्विधिः प्राथम्य एव किम् । किं वा तद्युक्तभक्षे स्याद्वषट्कार निमित्तके । अप्राप्तेरग्रिमो मैवं समासस्थित्यसम्भवान् । विशिष्टस्य विधिस्तस्माद्वषट्कारोऽपि कारणम् ॥ वषट्कर्तुः प्रथमभक्ष इत्येवं श्रूयते । वषट्कर्त्ता होता । तस्य भक्षणं समाख्यया प्राप्तम् । प्राथम्य त्वप्राप्तमिति तदेवात्र विधीयत इति चेत् । मैवम् । प्रथमभक्ष इत्यस्य समस्तपदत्वेन यो भक्षः स प्रथम इत्येवं विच्छिद्यान्वेतुमयोग्यत्वात् प्राथम्यविशिष्टं भक्षणमत्र विधीयते । तस्मिन्भक्षणे वषट्कारः कारणम् ।' इति ।

236—दायभागप्रकरणे अपुत्रपुंधनविभागदशायां पुत्रातिरिक्तानामन्येषां दायादक्रम उच्यते याज्ञवल्क्येन, यथा (2/135,136)—'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः ॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः । स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥' इति । अत्र पितराविति व्याख्यानावसरे मिताक्षराकारो विज्ञानेश्वर आह यथा -'तदभावे (दुहित्रभावे) पितरौ मातापितरौ धनभाजौ । यद्यपि

'शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥' 237

इति संवर्तीये सर्वत्र शक्ताशक्तभोजने एवं व्यवस्था । एवम्

'अहोरात्राद्भवेच्छुद्धिर्बाले त्वकृतचूडके ।' 238

इत्यादौ शक्ताशक्तभोजने क्रमाक्रमावुन्नेयौ । यत्र तु लिङ्गमस्ति तत्र क्रमविवक्षा नियता ।

युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते, तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वं श्रवणात्पाठक्रमादेवार्थक्रमावगमाद्धनसम्बन्धेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक्, तदभावे पितेति गम्यते ।...... मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहणं युक्ततरम् । तदभावे पिता धनभाक् ।' इति । विग्रहवाक्योक्तक्रमोऽत्र न नियतः, 'अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि' इति विष्णुनोक्तत्वात् । मनुनापि (9/185) 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च ।' इति पितुरेव प्रथमतो धनभागित्वमुक्तम् । 'अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा । तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः ॥' इति याज्ञवल्क्यवीरमित्रोदयधृतकात्यायनीयपाठक्रमाच्चापि मातुः पूर्वं पितुः धनभागित्वं स्पष्टं भवत्येवेति ।

237—साधारणतो भावप्रतिदूषिते न भोक्तव्यमिति मनुना निर्णीतम्, यथा (4/65)—'न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ।' इति । अपि च तदन्तर्गतशूद्रस्पर्शविषये मनुना कथ्यते, यथा 'नाद्याच्छूद्रस्य पक्वान्नम्' (मनु०-4/223) इत्यादि । संवर्तस्त्वत्र शूद्रसम्पर्कविशिष्टप्रायश्चित्तव्यवस्थां प्रदर्शयति, यथा (संवर्त०श्लो०-29/31) - 'शूद्रहस्तेन योऽश्नीयात्पानीयं वा पिबेत्क्वचित् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ शूद्राणां भाजने भुक्त्वा···पञ्चगव्येन शुद्ध्यति ॥' इति । आपस्तम्बस्तु (8/7) शूद्रसम्पर्कात् कुफलं प्रदर्शयति, यथा—'शूद्रान्नं शूद्रसम्पर्कः शूद्रेणैव सहासनम् । शूद्राज्ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ॥' इति ।

238 - मृताशौचशुद्धिव्यवस्थायां पराशरमाधवे (भाग० 1, P. 606) शङ्खवचनम्, यथा—'अजातदन्ततनये सद्यः शौचं विधीयते । अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके । तथैवानुपनीते तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः ॥' इति । साधारण्येन सर्ववर्णानां बालमरणाशौचविषयकमेतदिति ।

यथा — 'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः ॥' इति

जाबालिस्मृतौ प्रातःपदं क्रमनियामकम् । अन्यथा पिबेत्सायमिति ब्रूयात् । इति दिक् ।

अयमिह सारसङ्ग्रहः ।

एकदिनोपवासवचनस्थले भोजनात्पूर्वं दिवोपवासनिमित्तपाते एकसूर्यास्तान्त उपवासः । एवमेकरात्रमुपवासवचने भोजनात्प्राक् रात्रौ निमित्ते तत्सूर्योदयान्तमभोजनम् । भोजनानन्तरं दिवा निमित्ते दिनशेषसहितरात्र्यन्त उपवासः । भोजनानन्तरं रात्रौ तत्पाते तु रात्रिशेषसहितदिवान्त उपवास इति व्यत्ययः । अहोरात्रवचने तु क्रमाद्दिवा रात्रौ चेति दिवारात्रभोजनाभावः । क्वचिन्निमित्तानुसाराद्रात्रौ दिवा चेति × × × द्वयाभावश्च । एवं पञ्चरात्राद्युपवासे मध्याह्नभोजनाभावविशिष्टपञ्चरात्रादनन्तरभोजनम् । नित्यकाम्योपवासेपूत्तमशक्तानां 'सायमाद्यन्तयोरि'तिचतुर्वारभोजनत्यागात् क्वचित्पञ्चानां षण्णां वा भुक्तीनां त्यागः स्यात् । मध्यमानां त्रिवारभुक्त्यभावात् । अधमानां तु मध्यमदिने द्विवारमात्रभोजनत्यागात् । उक्तोपवासस्थाने वृताङ्गभोजनप्राप्तौ तदुत्तरं भोजनमित्याद्यूहनीयम् । एकदिनेदृशसाम्यरूपकृतात्ववशकृतस्य भ्रात्रपमृतिजन्यस्याधोरात्रीयहस्तदत्तघृताद्यनशनकृतं स्यात् ? एकादशीजन्माष्टम्यादिकृतानेकोपवासप्राप्तौ एकादशीजयन्त्याद्युपवासस्य नित्यकाम्यत्वेन प्रबलत्वात् स एवोपवासस्तादृशस्तत् । तेनैकेन तन्त्रादन्योपवासनिर्वाहः । गजच्छायायां मृताहापरपक्षयुगाद्यनेकश्राद्धानां युगपत्प्राप्तौ काम्यैकश्राद्धेऽन्तर्भाववत् । तेनैकादश्यादिकृतपूजाजागरद्वादशीपारणादिबोधः । एकादश्यादीन् चतुरुपवासान् तन्त्रेणाहं करिष्य इति सङ्कल्पः । एव तद्दिने क्रमात्तस्य प्राजापत्याद्युपवासस्य कालभेदेऽपि प्रसङ्गान् सिद्धिश्च । सान्निध्यासादितेपु तेपु प्रकृतौ प्रयाजस्यानुष्ठाना × × × पशिवज्येतीति पशौ प्रसङ्गवत् । एवं भ्रातृपित्रादिकृतेऽप्यनेकदिनोपवासे 'सर्वाशौचविशोधकं गुरुतमं पित्रोरशौचं ध्रुवमि'ति गुरुत्वात्पित्रोरुपवासस्तत् । तेनाशक्तकृतसक्थ्वादिभक्षणनिषेधः, भ्रात्राद्युपवासेऽशक्तानां फलमूलाद्यशनस्य कैश्चिदुक्तत्वात् । इति सङ्क्षेपः ।

इतिश्रीकौत्सकुलकैरवशरन्निशाकरन्यायवैशेषिकपूर्वोत्तरमीमांसाऽशेषभाष्यादिशास्त्राकूपारपारङ्गमसाहित्यसङ्गीतपाटीवीजज्योतिच्छन्दोगर्वसर्वङ्कषमहामहोपाध्यायाष्टादशविद्यानिपुणकविकोविददीनकृष्णमिश्रविरचिते शुद्धिसर्वस्वे आभ्यन्तराशौचनिर्णये सोपवासं सूतकमृतकप्रकरणम् ॥

[समाप्तोऽयं ग्रन्थः]

* * *

— बोधिनीकृद्विवृत्तिः —

भरद्वाजकुलोत्पन्नानाचार्यकुलमण्डनान् ।
मिश्रोपाह् वान् गुरुश्रेष्ठान् कुलमणीतिभाषितान् ॥
ध्यायनधिगतार्थान् तान् कृष्णमिश्रांश्च कोविदान् ।
कृतेयं टिप्पणी सूक्ष्मा तृप्ता भवन्तु ते सदा ॥
काश्यपगोत्रसम्भूतो नवघनः सदाशयः ।
यदुनाथ इति श्रीमान् विवेकवान् तदात्मजः ॥
यदुनाथात्मजः सोऽहं विश्वनाथो दरिद्रधीः ।
गुरुभ्योऽधिगतं यत्तु तदत्र प्रत्यपादयम् ॥
शुद्धिसर्वस्वबोधिन्यामन्यथा चेत्कृतं च यत् ।
सुधीभिः क्षमणीयं तदौदासीन्येन सर्वदा ॥

...O...

सहायकग्रन्थसूची

ऋग्वेदसंहिता—सायणभाष्योपेता, चौखम्बा ।

शुक्लयजुर्वेदसंहिता, मोतीलालबनारसीदासः ।

ऐतरेयब्राह्मणम्—सायणभाष्योपेतम्, आनन्दाश्रमग्रन्थमाला ।

मनुस्मृतिः मन्वर्थमुक्तावलीसहिता, चौखम्बा ।

याज्ञवल्क्यस्मृतिः—वीरमित्रोदयमिताक्षराटीकाद्वयोपेता, चौखम्बा ।

वामनपुराणम् - चौखम्बा ।

कूर्मपुराणम् चौखम्बा ।

गौतमधर्मसूत्रम्—मिताक्षरासहितम्, चौखम्बा ।

आपस्तम्बधर्मसूत्रम्—उज्ज्वलासहितम्, चौखम्बा ।

बौधायनधर्मसूत्रम्—विवरणसहितम्, चौखम्बा ।

अग्निपुराणम्—चौखम्बा ।

नैषधमहाकाव्यम्—चौखम्बा ।

वीरमित्रोदयशुद्धिप्रकाशः—चौखम्बा ।

कालमाधवः—चौखम्बा ।

विष्णुस्मृतिः—वैजयन्तीसहिता, चौखम्बा ।

सुश्रुतशारीरकसूत्रम्—चौखम्बा ।

स्मृतीनां समुच्चयः—आनन्दाश्रमग्रन्थमाला ।

महाभारतम् (मूलमात्रम्)—गीताप्रेस ।

विष्णुसहस्रनामशाङ्करभाष्यम्—गीताप्रेस ।

मत्स्यपुराणम्—गीताप्रेस ।

श्रीमद्भागवतम् (मूलमात्रम्)—गीताप्रेस ।

पराशरमाधवीयम् - एसियाटिक् सोसाइटी, कलिकता ।

कर्मप्रदीपः—परिशिष्टप्रकाशप्रभाटीकाद्वयसमेतः, एसियाटिक् सोसाइटी, कलिकता ।

शुद्धिकौमुदी—एसियाटिक्सोसाइटी, कलिकता ।

आचारसारः—एसियाटिक्सोसाइटी, कलिकता ।

वासिष्ठधर्मशास्त्रम्—भण्डारकरप्राच्यविद्यासंशोधनसंस्थानम, पूना ।

मीमांसान्यायप्रकाशः—प्रभाटीकासहितः, ,, पूना ।

नित्याचारप्रदीपः (द्वितीयार्धः)—सदाशिवके०संस्कृतविद्यापीठम् , पुरी ।
प्रायश्चित्तविवेकः—तत्त्वार्थकौमुदीसहितः, स०के०सं० विद्यापीठम् , पुरी ।
पारस्करगृह्यसूत्रम् हरिहरभाष्यसहितम् , चौखम्बा ।
हारलता –स०के०सं० विद्यापीठपुस्तकालयः ।
रामार्च्चनचन्द्रिका - स०के०सं० विद्यापीठपुस्तकालयः ।
निर्णयसिन्धुः (मूलमात्रम्)—निर्णयसागरप्रेस ।
नारदस्मृतिः – संस्कृतकलेज, कलिकता ।
सिद्धान्तकौमुदी – सरलाटीकोपेता, संस्कृतकलेज, कलिकता ।
स्मृतितत्त्वम् , कलिकता ।
काव्यप्रकाशः - श्रीधरटीकासहितः, संस्कृतकलेज, कलिकता ।
अष्टादशस्मृतयः श्रीवेङ्कटेश्वरप्रेस, वम्बइ ।
शाण्डिल्यभक्तिसूत्रम्—स्वप्नेश्वरभाष्योपेतम् , भारतमनीषा ।
आङ्गिरसस्मृतिः—आड्यारलाइव्रेरी, माड्रास ।
जैमिनीयन्यायमालाविस्तरः, विद्यारण्यविद्यापीठम् ।
वृहन्नारदीयपुराणम् , कृष्णदासविद्यास्थानम् ।
परिभाषेन्दुशेखरः, लालवहादुरके०सं० विद्यापीठम् , दिल्ली ।
कालसर्वस्वम्—म०म० कृष्णमिश्रप्रणीतम् (मत्सम्पादितम्) ।
गदाधरपद्धतिः (नूतनसंस्करणम्) धर्मग्रन्थस्टोर, कटकम् ।
नारायणशतकम्—विद्याकरपुरोहितप्रणीतम् , प्राचीसमितिः, कटकम् ।
पण्डितसर्वस्वम् धर्मग्रन्थष्टोर, कटकम् ।
शुद्धिचन्द्रिका—कालिदासप्रणीता, दाशरथिपुस्तकालयः, कटकम् ।
धर्मशास्त्रशब्दकोषः - पं०कुलमणिमिश्रप्रणीतः,उत्कलसर्वकारः (संस्कृतिविभागः), भुवनेश्वरम् ।
श्राद्धप्रदीपः – रश्मिसहितः, डा० वृजकिशोरस्वाईं ।
श्रीमद्वाल्मीकीयरामायणम् (मूलमात्रम्), गीताप्रेस ।
श्रीमद्भगवद्गीता – शाङ्करभाष्योपेता, गीताप्रेस ।
विष्णुपुराणम् , गीताप्रेस ।

—000—

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक....13802

S
JAC